Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

BHANDARKAR ORIENTAL RESEARCH INSTITUTE

Post-graduate and Research Department Series No. 1.

# NĪTIKALPATARU

ascribed to

## VYĀSADĀSA KṢEMENDRA

Critically edited for the first time

BY

V. P. Mahajan, M.A., Ph.D.

Bhandarkar Oriental Research Institute

POONA

1956

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

BHANDARKAR ORIENTAL RESEARCH INSTITUTE

Post-graduate and Research Department Series No. 1.

# NĪTIKALPATARU

ascribed to

## VYĀSADĀSA KṢEMENDRA

Critically edited for the first time

By

V. P. Mahajan, M.A., Ph.D.

Bhandarkar Oriental Research Institute

POONA

1956

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

**Price Rs. 5**

Printed and published by Dr. R. N. Dandekar, M.A., Ph.D., at the
Bhandarkar Institute Press, Bhandarkar Oriental
Research Institute, Poona 4.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# FOREWORD

The Post-graduate and Research Department of the Bhandarkar Oriental Research Institute was started in 1927 with a view to preparing candidates for post-graduate degrees in Sanskrit and Ancient Indian Culture of the Bombay University and training young scholars in scientific methods of research. When, in 1948, the University of Poona came into existence, this Department of the Institute was completely reorganised and a full-time Director and some additional staff was appointed. Soon the University recognised the Department as one of its Constituent Post-graduate Institutions. Since then the members of the staff of the Department have been actively participating in the work of post-graduate instruction and guidance in Sanskrit and Ancient Indian Culture organised by the University.

Apart from this normal work, the Department has undertaken various other academic projects in the field of Sanskrit research, such as, collection of manuscripts, critical editions of unpublished Sanskrit and Prakrit texts, new editions of texts which have become unavailable, and preparation of original monographs on Indological subjects. As this work began to show some progress, the authorities of the Institute thought it fit to start a new series of publications called the 'Bhandarkar Oriental Research Institute Post-graduate and Research Department Series', in which mainly the works written and edited by teachers and students in the Department were to be published. Accordingly, this edition of the *Nītikalpataru* prepared by Dr. V. P. Mahajan is now being issued as the first Volume in that Series.

From 1952 to 1954, Dr. Mahajan worked in the Post-graduate and Research Department for his Doctorate on "Kṣemendra: Author-Study". In the course of his work, he came across

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



certain works which were traditionally ascribed to Kṣemendra but which were not published. One such work of particular interest was the *Nītikalpataru*, a treatise on polity, governmental administration, and worldly wisdom. Fortunately, the only known manuscript of this work was available in the Government Manuscripts Collection deposited at the Bhandarkar Oriental Research Institute. So Dr. Mahajan's teacher and guide, Prof. R. D. Karmarkar, advised him to undertake to edit that work critically. In view of the fact that he had to rely on a single manuscript, Dr. Mahajan's task was by no means an easy one. It was also his first excursion in the field of critical editing of Sanskrit texts. Inspite of all this Dr. Mahajan worked on his job industriously and may be said to have accomplished it fairly satisfactorily.

Several other works, big and small, are at present under active preparation in the Post-graduate and Research Department of the Institute and it is hoped that the next Volume in this Series will be issued before long.

Bhandarkar Oriental Research
Institute, Poona 4
15th August, 1956

R. N. Dandekar

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# PREFACE

The present edition of the *Nītikalpataru* ascribed to Vyāsadāsa Kṣemendra has been prepared from a single manuscript, which was available in the Bhandarkar O. R. Institute. This being so, in many places, the readings given by me had to be conjectural. However, I have tried to keep myself as faithful to the original as possible. I am grateful to the authorities of the B. O. R. I. for having agreed to publish this edition of the *Nītikalpataru* as the first Volume in their newly started Post-graduate and Research Department Series.

A pleasant task of thanks-giving has to be done. At the outset I must express my sincerest thanks to my Revered Guru, Prin. R. D. Karmarkar, Director, Post-graduate and Research Department, B. O. R. I., but for whose encouragement and help I would not have been able to undertake and finish this work. I have also to thank Dr. R. N. Dandekar, Hon. Secretary, and Dr. P. K. Gode, Curator, of the B. O. R. I., for the help they rendered to me. I am also conscious of the help given by my friends in the Institute and I thank them all. I also thank the authorities of the University of Poona for the grant which they have sanctioned for the publication of this work.

I now offer this work to scholars with the following words:

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
ममैषा प्रणतिस्तस्मात् क्षन्तव्योऽयं जनो बुधैः ॥

B. O. R. I.
Poona 4
10th August, 1956

V. P. Mahajan

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# नीतिकल्पतरुः ।


| | | |
|---|---|---|
| ( i ) | Foreward | |
| ( ii ) | Preface | |
| ( iii ) | Introduction | i-xix |
| ( 1 ) | नीतिमाहात्म्यवर्णनं कुसुमम् | 1 |
| ( 2 ) | अदृष्टबलवत्त्वकथनम् | 7 |
| ( 3 ) | दैवबलेऽपि नीत्यपरित्यागाभिधानम् | 8 |
| ( 4 ) | नीतिस्वरूपकथनम् | 10 |
| ( 5 ) | नीतिगोपनाभिधम् | 15 |
| ( 6 ) | समेत्यकारणाभिधम् | 16 |
| ( 7 ) | मकराख्यानम् | 18 |
| ( 8 ) | संभ्रमविचारफलाभिधम् | 21 |
| ( 9 ) | व्यावहारिकपण्डितसाक्षाल्लक्षणाभिधम् | 23 |
| (9A) | संकीर्णगुणकथने आर्थिकपण्डितलक्षणम् | 25 |
| ( 10 ) | सर्वार्थपरिज्ञाने भयनिरूपणाभिधम् | 46 |
| ( 11 ) | बलप्रज्ञयोः प्रज्ञैव बलीयसीति कथनम् | 47 |
| ( 12 ) | प्रज्ञापराक्रमयोः प्रज्ञाबलाभिधम् | 48 |
| ( 13 ) | दुष्टसंगतित्यागकथनम् | 49 |
| ( 14 ) | क्षुद्रपरिवारराजपरिवर्जनाभिधम् | 51 |
| ( 15 ) | अल्पशक्तिना परोपदेशो न हेय इति कथनम् | 52 |
| ( 16 ) | मूर्खोपदेशोऽनर्थकादिति वर्णनम् | 53 |
| ( 17 ) | दुष्टबुद्धिसुबुद्धिफलकथनम् | 53 |
| ( 18 ) | स्वयमशक्तावन्याश्रयकथनम् | 54 |
| ( 19 ) | बुद्धिविलासाभिधम् | 55 |
| ( 20 ) | राजचरित्रे बुद्धिवर्णनम् | 56 |
| ( 21 ) | राजबुद्धिसूक्ष्मताकथनम् | 58 |
| ( 22 ) | राजबुद्धिबलकथनम् | 61 |
| ( 23 ) | राजधैर्यकथनम् | 62 |
| ( 24 ) | स्त्रीरक्षाप्रकारकथनम् | 64 |
| ( 25 ) | स्त्रीदुश्चरित्रकथनम् | 66 |
| ( 26 ) | गृहदासीदुश्चरित्रकथनम् | 70 |
| ( 27 ) | सदाचारपालनाख्यम् | 71 |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| | | |
|---|---|---|
| (28) | धूर्तचरित्रं नाम | 72 |
| (29) | मित्रविशेषनाम | 76 |
| (30) | बुद्धिपरीक्षाभिधम् | 78 |
| (31) | स्वामिभृत्यानुकूल्यप्राज्ञधीकथनम् | 82 |
| (32) | न्यायधीपरीक्षाभिधानम् | 88 |
| (33) | सूक्ष्मधीवर्णनाभिधम् | 90 |
| (34) | सत्यप्रतिज्ञाफलकथनम् | 93 |
| (35) | मन्त्रिनैपुणयकथनाभिधानम् | 96 |
| (35A) | प्रजासर्गराजसर्गकथनाभिधम् | 98 |
| (36) | अस्थानोपदेशकथनाभिधम् | 102 |
| (37) | धर्मविचाराभिधम् | 107 |
| (38) | विधिवक्रतायां गुणार्जनवैफल्यकथनम् | 112 |
| (39) | सूक्ष्मधर्मविचारणाख्यम् | 115 |
| (40) | साक्षान्मूर्खकुसुमम् | 122 |
| (41) | आर्थिकमूर्खलक्षणाभिधम् | 124 |
| (42) | अगुरुदाहकाख्यमूर्खकथनाभिधम् | 126 |
| (43) | तिलकार्पिकाख्यमूर्खकुसुमम् | 126 |
| (44) | मासारोपकाख्यमूर्खकुसुमम् | 127 |
| (45) | तूलिकाख्यमूर्खाभिधम् | 127 |
| (46) | मन्त्रिमूर्खाभिधानम् | 128 |
| (47) | लवणाशिमूर्खाभिधम् | 128 |
| (48) | गोदोहिमूर्खाभिधम् | 129 |
| (49) | ग्राम्यमूर्खाभिधम् | 129 |
| (50) | धनमूर्खाभिधम् | 130 |
| (51) | अर्थमूर्खाभिधम् | 130 |
| (52) | दायभागिनाममूर्खाभिधम् | 132 |
| (53) | व्याघातिमूर्खाभिधम् | 132 |
| (54) | धनलोभमूर्खाभिधम् | 133 |
| (55) | साहसिमूर्खाभिधम् | 133 |
| (56) | राजमूर्खाभिधम् | 134 |
| (57) | धनमूर्खाभिधम् | 135 |
| (58) | मूर्खजन्मसाफल्याभिधम् | 135 |
| (59) | मूढप्रभुकथनाभिधम् | 136 |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| | | |
|---|---|---|
| (60) | संख्याविभ्रमराजमूर्खाभिधम् | 136 |
| (61) | स्वश्वश्रकमूर्खाभिधम् | 137 |
| (62) | उच्छिष्टक्षन्मूर्खाभिधम् | 138 |
| (63) | विलासिमूर्खाभिधम् | 139 |
| (64) | हृदयस्फोटिमूर्खाभिधम् | 139 |
| (65) | मूर्खशेखराभिधम् | 140 |
| (66) | कदर्यमूर्खाभिधम | 140 |
| (67) | जलरोधकमूर्खाभिधम् | 142 |
| (68) | सामिकारिमूर्खाभिधम् | 144 |
| (69) | असंतोषिमूर्खाभिधम् | 144 |
| (70) | अपूपमूर्खाभिधम् | 145 |
| (71) | पतियन्त्ररक्षकमूर्खाभिधम् | 146 |
| (72) | चक्राह्वमूर्खाभिधम् | 146 |
| (73) | पणपूर्वकृन्मूर्खाभिधम् | 147 |
| (74) | कीनाशमूर्खाभिधम् | 147 |
| (75) | अन्योन्यद्वेषिमूर्खाभिधम् | 148 |
| (76) | अविशेषज्ञमूर्खाभिधम् | 149 |
| (77) | तण्डुलभक्षकमूर्खाभिधम् | 150 |
| (78) | केवलोद्यामिमूर्खाभिधम् | 150 |
| (79) | केवलतर्किमूर्खाभिधम् | 151 |
| (80) | साहसिकमूर्खाभिधम | 152 |
| (81) | स्वस्वीयघातककारिमूर्खाभिधम् | 153 |
| (82) | सुजनतानिरूपणाभिधम् | 154 |
| (83) | सच्छास्त्रोद्देशाभिधम् | 156 |
| (84) | धूर्तवर्जनाभिधम् | 158 |
| (85) | सच्छास्त्रार्थवर्णनाभिधो जीवब्रह्मैक्यवर्णनाभिधश्च गुच्छकः | 161 |
| (86) | प्रासङ्गिककथनाभिधम् | 166 |
| (87) | एकादिदशपर्यन्तज्ञानं नाम कुसुमम् | 168 |
| (88) | एकादिसप्तकान्तज्ञानाभिधम् | 173 |
| (89) | धीमाहात्म्यकथनाभिधम् | 174 |
| (90) | राजलक्षणाभिधम् | 174 |
| (91) | मन्त्रिलक्षणम् | 177 |
| (92) | पुरोहितलक्षणाभिधम् | 178 |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(93) दैवज्ञलक्षणम् 178
(94) राज्ञीलक्षणम् 179
(95) नारीरागविरागकथनम् 179
(96) महाराजलक्षणाभिधम् 181
(97) राज्ञीलक्षणाभिधम् 183
(97A) हस्तिलक्षणशाखा 183
(98) अश्वलक्षणशाखा 188
(99) छत्रलक्षणम् 197
(100) चामरलक्षणम् 198
(101) आसनलक्षणाभिधम् 199
(102) वस्त्रासनलक्षणम् 200
(103) शरलक्षणम् 200
(104) धनुर्लक्षणम् 201
(105) हीरमणिनिरूपणाख्यम् 202
(106) मौक्तिकलक्षणशाखा 205
(107) मरकतलक्षणाभिधम् 208
(108) पद्मरागाख्यशोणमणिलक्षणमूल्यकथनाभिधम् 218
(109) खड्गलक्षणम् 210
(110) सेनानीलक्षणम् 212
(111) पुंस्त्रीलक्षणशाखायां दैवपौरुषकालानुस्यूतताभिधःस्तबकः 212
(112) सामुद्रिकशाखायां पुरुषलक्षणशाखा 215

(1) सामर्थ्य (2) रोम (3) ललाट (4) शिरो (5) भ्रू (6) नेत्र (7) ओष्ठ (8) कर्ण (9) नासा (10) ग्रीवा (11) आस्य (12) मुख (13) दन्त (14) स्वर (15) स्कन्ध (16) अंस (17) कपोल (18) जिह्वा (19) तालु (20) स्तन (21) वक्षस् (22) कुक्षि (23) पृष्ठ (24) नाभि (25) कटि (26) हस्ताधिकार (27) लिङ्ग (28) शुक्र (29) जङ्घा (30) गति and (31) पाद

(2) स्त्रीलक्षणशाखा

(1) पाद (2) जङ्घा (3) जानु (4) ऊरु (5) कटि (6) नितम्ब (7) स्फिग् (8) भग (9) जघन (10) बस्ति (11) गन्ध (12) पार्श्व (13) हृदय (14) स्तन (15) जत्रु (16) स्कन्ध (17) कक्षा (18) कर-पृष्ठनख (19) ग्रीवा (20) चिबुक (21) कपोल (22) आस्य (23) अधर (24) दन्त (25) जिह्वा (26) तालु (27) स्मित (28) नासा (29) लोचन (30) भ्रू (31) ललाट (32) केश (33) स्वर and (34) लाञ्छनावर्त

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(3) सुलक्षणषोडशकम्
(4) कुलक्षणषोडशकम्
(5) नारीरञ्जनाविधाः
(6) अथ बाल्यादिलक्षणम्
(7) पद्मिन्यादि वर्णनम्
(112B) सौभाग्य कुसुमम् 247
(113) सहायसंपत्तिनिरूपणाभिधम् 248
(114) यामिकलक्षणम् 251
(115) द्वाःस्थलक्षणम् 252
(116) दूतसन्धिकारकलक्षणम् 252
(117) चरकथनाभिधम् 252
(118) पुररक्षककथनाभिधम् 253
(119) करिपालकथनाभिधम् 253
(120) अश्वपालकथनाख्यम् 254
(121) सारथिकुसुमम् 254
(122) धर्माधिकारिकुसुमम् 254
(123) व्ययाधिकारिकुसुमम् 255
(124) दुर्गाधिकारिकुसुमम् 255
(125) धनाधिकारि ,, 255
(126) सूदक्रियापौरोगवलक्षणाभिधम् 255
(127) अस्त्राचार्यकुसुमम् 256
(128) स्थपतिलक्षणम् 257
(129) लेखकलक्षणम् 257
(130) सभ्यकुसुमम् 257
(131) वेयसब्रह्मचारिलक्षणाख्यं कुसुमम् 258
(132) शुद्धान्ताधिकारिकुसुमम् 259
(133) प्रसादलक्षणाभिधं कुसुमम् 259
(134) व्याधकुसुमम् 263
(135) श्वरवलक्षणाभिधम् 263
(136) कर्मोचितपुरुषकथनाख्यम् 266
(137) परम्परागतभृत्यनिरूपणाख्यम् 266
(138) जनसंग्रहणम् 267
Notes. 268
Important words. 284
Abbreviations. 284
Suggested Readings. 285
Errata 289

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

# नीतिकल्पतरुः।

ॐ स्वस्ति श्रीगणेशायनमः।

नत्वोमातनयं गौरीं व्यासमुख्यमुनीश्वरान्।
श्रीव्यासदासः क्षेमेन्द्रो 'नीतिकल्पतरुं' व्यधात्॥

नीतिर्नाम नरस्य चक्षुरुदितं दिव्यं यदाश्लेषतो
देवत्वं नितरां परं तु बलिनी मान्या परेहा बुधैः।
तत्राप्यत्र पदं विदां विदधतां किं नाम नाप्यं यया
स्मार्यं[1] समुपैति सिद्धिममला प्रज्ञा च सोक्तान्ततः॥ १॥

निबन्धकारोऽविघ्नेन चिकीर्षितसंपत्तिं कामयान 'आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखमिति' शिष्टोक्तरीत्या नीतिरूपवस्तुनिर्देशादेव मङ्गलं मन्यमान उपक्रमते। **नीतिरिति** :— अस्ति मर्त्यानामपि पशुभिः साधारणं चक्षुर्द्वयमिति किंलक्षणं तद्वैलक्षण्यापादकममीषां मर्त्यत्वमिति तत्त्वापादकममीषां वैलक्षण्यमुत्थापयति। **दिव्यं चक्षुरिति** :— व्यवहितदेशकालविप्रकृष्टसूक्ष्मादिग्राहकत्वं दिव्यत्वमिति। तथा च व्यवहितविप्रकृष्टसूक्ष्मादिना पराशयग्रहणं ग्रहणाशक्तत्वाच्चर्ममयचक्षुर्द्वयसत्त्वेन पशुसाधारण्येऽपि मर्त्यानामनेन नीतिमयदिव्यचक्षुषा तद्वैलक्षण्यं सिध्यतीति। तथा च प्रामाणिका 'बुद्धिजीवी नरः प्रोक्तस्तद्विहीनः पशुः स्मृत' इति। बुद्धिविशेष एव नीतिरिति समनन्तरमेवाग्रे भविष्यतीति। न केवलं पशुवैलक्षण्यमेवामीषामनया यावदमर्त्यत्वमपीत्यवतारयति। **यदाश्लेषत** इतिः— यस्या नीतेराश्लेषतः समाश्रयणादमीषां मर्त्यानां देवत्वममर्त्यत्वमिति। व्यवहितादिग्रहणेन तत्समानयोगक्षेमत्वादिति। **तद्वदितिः**— देवकृच्च विभूत्यादिविराजमानत्वमित्यर्थः। अथ च यदाश्लेषतो देवत्वमेव साक्षादुत्पद्यते एषा चार्थान्तरप्रतीतिर्नितरामित्यनेन द्योत्यते। अर्थाच्च यदनाश्लेषात्पश्वादिस्थावरान्तरत्वं सुलभमेव। तथा चोक्तं सुशीलशैल्याम् :—

---

1 Corrupt.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'नीतेरेव फलं सर्वं चित्रा या भुवनावली ।
तथा च दृश्यते सम्यग्यथासौ विहितास्पदा ' ॥ २ ॥

असाविति नीतिः ।

आश्रित्य नीतिमिह सोऽपि महोत्पलस्थः
सम्यग्विधाय च परां विधिराद्यसृष्टिम् ।
तत्तत्पदेषु च निधाय निजांस्तनूजा–
नास्ते सुखेन परमेश्वरयोगनिष्ठः ॥ ३ ॥[2]

किं वर्ण्यो (२अ) महिमास्य साधुजनतानन्दप्रदानोद्यतो
वेदोक्ताखिलधर्मपालनमतिस्तत्पीडनो योगिनः ।
संहर्तुं दनुजाधिपान्हतमतीन्यः साम्प्रतं चाप्यहो
भूबिम्बं चरणाब्जरेणुभिरलं संभूषयत्यद्भुतम् ॥ ४ ॥

ईशानः स च सर्वदेवमहितो गौरीपतिः शंकरो
भूतीशः स चराचरस्य जगतः कर्ताथ संहारकः ।
चिद्भ्रान्तां[1] नियतिं नयज्ञकुशलः संस्थाप्य बद्धाजिनो
जूटोत्तड(?)तनुर्निरंतरसुखासक्तो[1] भवत्संयमी ॥ ५ ॥

नयज्ञकुशलः कृती स खलु देववृन्दाधिपो
विभज्य विविधाः कृतीरधिकृतांश्च रात्रिंदिनम् ।
गुरुं गुरुतरं धिया सुचतुरं पुरोधाय[3] तं
विवेकनिरतोऽस्त्यलं प्रशमयन्स्थितो दानवान् ॥ ६ ॥

इत्थं यस्य यथाविधोऽस्ति विभवो नीतेः फलं तद्विदु–
स्तस्माद्यस्य नये रतिः सचतुरा यादृक्छुभा जायते ।

---

1 Corrupt.
2 Here the ms. adds the following in the margin.
पूर्वजन्मसाधितनीतिरूपफलमेव ब्रह्मणो ब्रह्मत्वमिति । एवमग्रेऽपि
3 पुरोधाय पुरोहितं कृत्वा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ताद्दङ्नीतिफलं बुधैर्निगदितं ब्रह्मादिकीटान्तकं
सर्वं नीतिफलं विचार्य मतिमांस्तस्माच्छुभां तां श्रयेत् ॥ ७ ॥

शुभेति:— अशुभाया अप्युपलक्षणं तु तच्च ब्रह्मादिकीटान्तकमिति सुस्थम् । असावपि नीतेरेव यत्फलं ब्रह्मादिशुभपदवीलाभः । असावपि च नीतेरेव यस्याः कीटादिनिनिन्द्ययोन्याप्तिरिति तात्पर्यम् । एतदेव निबध्नाति ।

आसीत्स कोऽपि जन्तुर्येनाहो स्वीयबुद्धिवैकल्यात्
संप्राप्य कीटयोनिं चण्डालसूतौ सुखेनास्ताम् ॥ ८ ॥

अहो स्वबुद्धिवैकल्यान्मनुजाः पशुतां गताः ।
ताड्यमानाः पुरो यान्ति नासासंप्रोतरज्जवः ॥ ९ ॥

बुद्धिवैकल्यमाहात्म्यादहो मलिनकर्मतः ।
केचिद्विचेतना लोके स्थावरत्वमुपागताः ॥ १० ॥

( २ब ) विचेतना विरुद्धबुद्धयः शास्त्रविरुद्धकारिण इत्यर्थः । केचिद्विमोहितधियः क्रूरकर्मस्वभावतः संभूता भीमनरकोदरगह्वरपूरका । इत्थं सूचिकटाहाद्यन्यायमार्गेण पण्डितैः नीतिशक्तिः परं ज्ञेया तत्तच्छक्तिस्वरूपिणी स्वयं स्वातन्त्र्यशक्तिं तां स्वीकृत्य परमेश्वरः अंशांशिकातोऽप्यन्यत्र[1] यत्तां स्थापितवानभूत् ।

ये तां समन्ववेक्षन्ते तेऽत्र सम्यग्व्यवस्थिताः ।
मनाक् प्रच्यवते तस्याः क्षणात्ते स्युः पदच्युताः ॥ ११ ॥

तथा च निदर्शयति ।

अस्तीन्द्रपदवीरम्यास्थानं तस्य महीशितुः ।
तच्छक्तिपालनाद्भुक्ता कैर्न धीरैर्गतज्वरम् ॥ १२ ॥

तथा हि भुवने वास्मिन्सिद्धराज्ञां द्वयी गतिः ।
सूर्यासोमविभेदेन नयोऽसौ तत्र कारणम् ॥ १३ ॥

सगरभगीरथजनका इक्ष्वाकोर्ये[1] धरणिभर्तृतां याताः ।
संस्थाप्य कीर्तिममलामिह ते यत्संस्थिताश्च सा नीतिः ॥ १४ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्रार्थः । इहलोके समुद्रत्रिपथगादिदर्शनान्निर्मलां कीर्तिं संस्थाप्य यत्स्वर्लोकेऽमृतभोजिनः स्थिताः सा नीतिर्नीतिफलमेतदित्यर्थः ।

सन्यायाधियं धीराः पश्यत नीतिं च तस्य रघुसूनोः ।
मुनिभिः सार्धं भगवान्ययावतीर्णो भुवं पुपुषे[1] ॥ १५ ॥

नहुष इति पुराऽभून्मेदिनीमण्डलेशः
सुचरितनयशाली कीर्तिसंक्रान्तलोकः ।
त्रिदिवकलनदक्षं यं विचिन्त्यामरेन्द्रा
अभिसिषिचुरवन्ध्यप्रार्थनाः स्वर्गलोके ॥ १६ ॥

कथं वर्ण्यो भूमाविरलमतिभि... श...[1]
गृहे यस्योद्भूतेरकलिततपोवीर्यमहसः ।
स्वयं स श्रीनाथो निखिलभुवनाद्योऽमरगुरु-
र्वतीर्योर्वीभारं सकलमनयच्छून्यकलनाम् ॥ १७ ॥

यस्मिन्कुन्तिरभूत्सकीर्तिविमलो नर्थेन्धनौघानलः
स च्छ्रेयो निधिरङ्कवर्तिकमलो निर्धूतशात्रव्रजः ।
येनासौ भुवि रोपिता सुविमला सत्कल्पवल्लीसुता
यस्याः पञ्चसुताः बभूवुरमला लोके फलानि ध्रुवम् ॥ १८ ॥

यस्मिन्सोऽपि बभूव रंजितप्रजः श्रीकार्तवीर्यो नृपो
येनासौ स्वशिरोब्जतर्पितभवो बद्धोविवद्रावणः ।
सत्कीर्तिध्वजभूषितां च धरणिं कृत्वा मृतिं लब्धवा-
नार्चीका...रामवत्[1] कृतमतिर्वीरार्च्यपत्पङ्कजः ॥ १९ ॥

अविवत् मेषवत् । (३अ) अर्चीकादृचीकपुत्राद्भार्गवात् । कृतमतिर्योगप्रभावात् ।

यत्राभूच्छशबिन्दुरित्यमलधी राजा प्रजारञ्जना-
यस्यासन्सदने चतुर्दशमहारत्नानि सम्राट्पदं ।

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गाम्भीर्येण सरित्पती रविरथो कान्त्याधियागीष्पति-
नीत्या दैत्यगुरुर्बलेन पवनो योऽसावभूद्भूतले ॥ २० ॥

'चक्रं रथो मणिः खड्गश्चर्म रत्नं च पञ्चमम् ।
केतुर्निधिश्च सप्तैवं प्राणहीना निचक्षते ॥ २१ ॥
भार्या पुरोहितश्चैव सेनानी रथकृच्च यः ।
पत्त्यश्वौ कलभश्चेति प्राणिनः सप्तकीर्तिताः' ॥ २२ ॥
इति चतुर्दशमहारत्नानि सम्राट्चिह्नम् ।

भीष्मः सोऽपि बभूव यत्र भगवान्गाम्भीर्यभूतोदधि-
र्बाल्याद्योव्रतचार्य[1] यो गुरुवशः कृष्णाङ्घ्रिधूलिगतिः ।
यो भक्तिं पुरतो विधाय कृतवान्संत्यक्तसन्धं हरिं
कालं चापि कृतव्यलीकमिव यः कृत्वेच्छयौ....[1] तनुम् ॥२३॥

धर्मन्यायतपःसमाधिसमतासत्यादिसीमाभुवः
श्रीमत्कृष्णपदाब्जरेणुशरणा दैत्याटवीवह्नयः ।
ते पञ्चापि बभूवुरन्तरविदः कुन्तीतपोमूर्तयो
यत्राहो सुरपादपा इव फलं नीतेर्विदुस्तद्बुधाः ॥ २४ ॥

कुरुत कुरुत नीतिं बुद्धिधारां विधाय
क्व कुलमिदमशेषानर्थगाढं मुरारेः ।
क्व च स च कुलरत्नं रञ्जिताशेषनाथः
स्वपरजनकमात्रानन्दकोऽभूत्कुमारः ॥ २५ ॥

पीडां गाढामसहत विषाद्यादिभिर्दाह्यमानो-
ऽप्यानन्दाब्धौ गत इव परं ज्ञातसारो मनीषी ।
तातज्ञातीकुलमपि तथा योऽपुनाद्भक्तिशाली
तस्यै तावत्फलमविकलं नीतितत्त्वस्य बोध्यम् ॥ २६ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोके सैव परं बुधा विजयते नीतिः समास्फालना-
घस्याः सोऽपि गुरुर्व्यहन्दतिसुतानास्थाय मूर्तिं पराम् ।
तद्धानेः कविरप्यसौ गतधृतिः स्वार्थाहतः शिष्यका-
न्याजघ्ने कुपितः कुतो धृतिसुखे भ्रष्टस्य नीतेरतः ॥ २७ ॥

नीतिं समाश्रित्य विभीषणोऽपि
स शास्ति राज्यं क्षणदाचराणाम् ।
( ३ब ) सन्त्यक्तनीतौ खलरावणोऽपि
चन्द्रं विहायासकलङ्कलेखा ॥ २८ ॥

आसाद्यापीन्द्रपदवीमिन्द्रा उत्पथगामिनः ।
भ्रष्टास्तस्मात्पदात्तूर्णं तस्मात्तामनुपालयेत् ॥ २९ ॥

नहुष इति स राजा प्राप्य नाकाधिपत्यं ।
हतमतिरवरुद्धो बोधहीनः खिलात्मा ।
अभवदवनिपृष्ठे क्षुत्तृडार्तोऽहिजाति-
र्निखिलहसितपात्रं यद्विनीतेः फलं तत् ॥ ३० ॥

इत्थं ये भुवि पार्थिवाभृतप्रजाः ख्याता द्वयेप्यादृता[1]-
स्तेऽर्थान्नीतिभरान्समर्ज्य विविधान्भुक्त्वाथ कामान्सुखम् ।
सत्कीर्तिध्वजशालिनीं शुभततिं स्वस्तीर्थमास्फाल्य य-
त्प्रापुर्मुक्तिमलं फलं सुविमलं तन्नीतिवल्ल्या ध्रुवम् ॥ ३१ ॥

अहो विततगह्वरं दुरवबोधभावोम्भितं
महार्घमणिगर्भितं विरलतत्त्वभीतिप्रदम् ।
गभीरमतिशिक्षितैर्विहिततीर्थतीर्थमना-
ग्विशन्ति नयशासनं जगति केऽपि धीशालिनः ॥ ३२ ॥

तीर्थं विवरणं, तदेव तीर्थमुपायः ।

आस्तां तावदियं पुराणधरणीशानां कथामञ्जरी
सन्तीवालमथाधुनापि भुवनाधाने गृहीतव्रताः ।

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूमीशा रविसोमवंशमणयो यद्वाहुलग्ना मही
स्वस्था विस्मृतदिक्कुलाद्रिकलनासौ हृष्टपुष्टाजनैः'[1] ॥ ३३ ॥

इति सिद्धं यदाश्लेषतो देवत्वमिति ।

**इति नीतिकल्पलतायां नीतिस्वरूपनिरूपणाख्यप्रथममञ्जर्यां नीतिमाहात्म्यवर्णनं नाम प्रथमं कुसुमम् ।**

---

## [ २ ]

( ४ अ ) इत्थं बुद्धिजीविनां नीत्याख्यया सद्बुद्ध्येह देवसमानत्वममुत्र तु साक्षाद्देवत्वमेवेति स्थितेऽप्यदृष्टस्य बलीयस्त्वात्क्वचिद्व्यभिचारो न दोषायेति समर्थयन्नाह ।

**परंत्विति**:— बुधैः साक्षात्कृतपरावरैः परेहा परस्यादृष्टस्य दैवलक्षणस्येश्वरेच्छा या वेहा चेष्टा बलिनी बलवती मान्या बोध्या बलवत्त्वादेव पूज्या च तद्बले समापतिते नीतिबलमकिंचित्करतां यातीति । तथा च संजयं प्रति युधिष्ठिरवाक्यम् ।

'उत सन्तमसन्तं वा बालं धीरं च संजय ।
उताबलं बलीयांसं धाता प्रकुरुते वशे ' ॥ १ ॥ इति

अथ वा तदिच्छया जडापि नीतिफलभाजो भवन्ति पण्डिता अपि व्यर्थप्रयासा भवन्तीति । तथा च स एव

'उत बालाय पाण्डित्यं पण्डितायोत बालताम् ।
ददाति सर्वमीशानः पुरस्ताच्छुक्रमुच्चरन् ' ॥ २ ॥ इति

अथ वा तथा प्रेरयति यथा संपत्तावनयं कुर्वन्तो दृश्यन्ते केचित्, आपत्तावपि नयं कुर्वन्तः केचिदिति । तथा च धृतराष्ट्रं प्रति संजयः—

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



‘ परप्रयुक्तो पुरुषो विचेष्टते सूत्रप्रोता दारूमयीव योषा ।
इमं तु दृष्ट्वा नियमं परस्य मन्ये परं कर्म दैवं मनुष्यात् ॥ ३ ॥
इमं च दृष्ट्वा तव कल्मषं विभो पापोदर्कं धोरमवर्णरूपम् ’ ॥ ४ ॥ इति ।

मनुष्यात् एतज्जन्मपुरुषकारात् । यदसावापद्यपि धर्ममेव शरणमाश्रयते भवांस्तु स्वास्थ्येऽपि न तथेति प्राचीनमेव कर्म बलवदिति भावः ।

धृतराष्ट्रवाक्यं विदूरं प्रति । :—
‘ नदिष्टमप्यतिक्रान्तं शक्यमन्येन केनचित् ।
दिष्टमेव ध्रुवं मन्ये पौरुषं हि निरर्थकम् ’ ॥ ५ ॥

तथा

‘ कुष्टार्ताङ्घ्रियुगः शिखी बहुपदं गृह्णाति धावन्नहिम्
भानुः पादसहस्रभाक्प्रतिपदं संचार्यते नूरुणा ।
वञ्चन्त्ये बलिनोऽपि यल्लघुबलैः सामर्थ्यहीनैश्च य-
द्भ्राम्यन्ते परिपूर्णवृत्तय इदं दैवस्य लीलायतम् ’ ॥ ६ ॥

## इत्यदृष्टबलवत्त्वकथनं नाम द्वितीयं कुसुमम् ।

---

## [ ३ ]

भवतु परेहा बलिनी तथापि नीत्यैव सदा वर्तितव्यं न तु जा( ४ ब )-त्वसौ त्याज्येतीदमेव बुद्धिमतां बुद्धिमत्त्वमित्यवतारयति । **तत्रापीति**:— तत्रापि उक्तनयेन परेहा या बलवत्त्वे सत्यपीत्यर्थः । अत्रैतस्मिन्नये विदां विदुषां ज्ञातपरावराणां पदं स्थानं स्थितिमापद्यप्येतदच्युतिलक्षणामेतत्पालनेनैवावश्यं विधेयपारं यास्यामीति व्यवसायं वा विदधतां कुर्वन्तां विशेषेण वा धारयतां यत्किंनाम दुर्घटं यन्नाप्यं न यदाप्यते तज्जगति न किञ्चनाप्यस्तीति दुर्घटमपि सर्वमेतदाश्रयेणाप्यते इत्यर्थः । एतच्च सर्वं प्रागेव गतप्रायमिति न पुनस्तन्यते । तथापि किंचिन्मात्रेण प्रदर्श्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शल्यराजे पाण्डवान्समागतान्निशम्य उन्मेलनार्थमागते दुर्योधनेन चार्धमार्गादेव स्वीकृत इति दैवं बलिष्ठं मत्वा युधिष्ठिरो नयान्नाचलदिति । तथा च उद्योगपर्वणि शल्य उवाच । :—

' युधिष्ठिरस्य पुरुषाः किं नु चक्रुः सभामिमाम् ।
आनीयन्तां सभाकाराः प्रदेयार्हा हि मे मताः ॥ १ ॥
गूढो दुर्योधनस्तत्र दर्शयामास मातुलम् ॥ २ ॥
तं दृष्ट्वा मद्रराजस्तु ज्ञात्वा यत्नं च तस्य तम् ।
परिष्वज्याब्रवीत्प्रीत इष्टार्थो गृह्यतामिति ' ॥ ३ ॥

दुर्योधनः

' ऋतवान्भव कल्याणवरो वै मम दीयताम् ।
सर्वसेनाप्रणेता मे भवान्भवितुमर्हति ' ॥ ४ ॥

वैशम्पायनः

' कृतमित्यब्रवीच्छल्यः किमन्यत्क्रियतामिति ।
कृतमित्येव गान्धारिः प्रत्युवाच पुनः पुनः ॥ ५ ॥
शल्यो जगाम कौन्तेयानाख्यातुं कर्म तस्य तत् ॥ ६ ॥
ततोऽस्याकथयद्राजा दुर्योधनसमागमम् ।
तच्च शुश्रूषितं सर्वं वरदानं च भारत ' ॥ ७ ॥

इति दैवावनिष्टे जाते बुद्धिमद्भिस्तथा नीतौ समाधेयं यथा परस्य प्रतिज्ञातोऽर्थोऽपि पूर्णो भवेन्न च स्वार्थच्युतिरित्यत्र निदर्शनं युधिष्ठिरः । युधिष्ठिर उवाच—

' सुकृतं ते कृतं राजन्प्रहृष्टेनान्तरात्मना ।
दुर्योधनस्य यद्वीर त्वया वाचा प्रतिश्रुतम् ।
एकं त्विच्छामि भद्रं ते क्रियमाणं महामते ॥ ८ ॥
भवानिह महातेजा वासुदेवसमो युधि ।
कर्णार्जुनाभ्यां सं [ ५ अ ] प्राप्ते द्वैरथ्ये राजसत्तम ।
कर्णस्य भवता कार्यं सारथ्यं नात्र संशयः ॥ ९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र पाल्योऽर्जुनो राजन्यदि मे प्रियमिच्छसि ।
तेजोवधश्च ते कार्यः सौतेरस्मज्जयावहः ।
अकर्तव्यमपि ह्येतत्कर्तुमर्हसि मातुल ' ॥ १० ॥ इति

**इति दैवबलेऽपि नीत्यपरित्यागाभिधानं तृतीयं कुसुमम् ॥**

---

[ ४ ]

इयत्ताडम्बरेण यत्र भारोऽयं विहितः कासौ नीतिरिति तत्स्वरूपमाह । **अमलेत्यादिः**— असौ नीतिर्यद्यपि चतुरप्रज्ञैर्बृहस्पत्यादिभिः स्वस्वरूच्या बहुलक्षणा प्रोक्ता तथापि अन्ततःपर्यवसानेऽमला प्रज्ञासाविल्यर्थः । स्वपरहितत्वं चामलत्वं । यया प्रज्ञया स्वपरहितं निश्चयेन भवेदसौ प्रज्ञा नीतिरित्यर्थः । तथा च सुशीलशैल्याम् ॥

' नयोऽयं निश्चिता लोके यासावद्या निसर्गधीः ।
तयात्र चरता लोके कासौ सिद्धिर्न हस्तगा ' ॥ १ ॥ इति

आद्या निसर्गधीरिति विकल्पकल्लोला कलुषिताय यासावीश्वर ऐश्वर्यं समास्फाल्यन्स्वपरहितं कुरुत इति । कथमत्र भरो न विधयित इति भावः । इत्थं च अमलेति विशेषणात्सर्वतः शोधितापि कौटिल्यमलभरिताधीरनर्थकारणमिति नीत्याभास एव असाविति मन्तव्यम् । तथा च युधिष्ठिरं संजयनीतिवाक्यजातं सर्वतः शोधितमपि प्रज्ञाभास एव । यथाः—

' न चेद्भागं कुरवोऽन्यत्र युद्धा-
त्प्रयच्छन्तीमे तुभ्यमजातशत्रो ।
भैक्षचर्यामन्धकवृष्णिराज्ये
श्रेयो मन्ये न तु राज्यं कदापि ॥ २ ॥
अल्पकालं जीवितं यन्मनुष्ये
महास्रावं नित्यदुःखं चलं च ।
भूयश्चतद्वयसो नानुरूपं
तस्मात्पापं पाण्डव मा प्रकार्षीः ॥ ३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निबन्धिनी ह्यर्थतृष्णेह पार्थ
तामिच्छतां बाध्यते धर्म एव ।
धर्मं तु यः प्रवृणुते स बुद्धः
कामी वृद्धे हीयतेऽर्थानुरोधी ॥ ४ ॥

धर्मं कृत्वा कर्मणां तात मुख्यं
महाप्रतापः सवितेव भाति ।
ह्यानेन धर्मस्य महीमपीमां
लब्ध्वा नरः सीदति पापबुद्धिः ॥ ५ ॥

वेदोऽधीत[ ५ ब ]श्चरितं ब्रह्मचर्यं
यज्ञैरिष्टं ब्राह्मणेभ्यश्च दत्तम् ।
परं स्थानं मन्यमानेन भूय
आत्मा दत्तो वर्षपूगं सुखेभ्यः ॥ ६ ॥

सुखं प्रियं सेवमानोऽतिवेलं
योगाभ्यासे यो न करोति कर्म ।
वित्तक्षये हीनसुखेऽतिवेलं
दुःखं यायात्कामवेगेन नुन्नः ॥ ७ ॥

एवं पुनरप्यर्थकामप्रसक्तो
हित्वा धर्मं यः प्रकरोत्यधर्मम् ।
अश्रद्दधत्परलोकाय मूढो
हित्वा सुखं तप्यते प्रेत्य मन्दः ॥ ८ ॥

न कर्मविप्रणाशोऽस्त्यमुत्र
पुण्यात्मनां यदि वा पापकानां ।
पूर्वं कर्तुर्गच्छति पुण्यपापं
पश्चाच्चेदनुयातीह कर्ता ॥ ९ ॥

न्यायोपेतं ब्राह्मणेभ्यो यदन्नं
श्रद्धोपेतं गन्धरसोपपन्नम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वाहार्येषूत्तमदक्षिणेषु
तथा रूपं कर्म विख्यायते ते ॥ १० ॥
इह क्षेत्रे क्रियते पार्थ कार्यं
न वै किञ्चिद्विद्यते प्रेत्यकार्यम् ।
त्वया कृतं पारलोक्यं च कार्यं
पुण्यं महात्मभिरनुष्ठितं च ॥ ११ ॥
जहाति मृत्युं न जरां भयं च
न क्षुत्पिपासे मनसश्चाप्रियाणि ।
न कर्तव्यं विद्यते तत्र किञ्चि-
दन्यत्र वाचेन्द्रियप्रीणनार्थात् ॥ १२ ॥
एवंरूपं कर्मफलं नरेन्द्र
मात्रावता हृदयस्य प्रियेण ।
स क्रोधजं पाण्डव हर्षजं च
लोकावुभौ मा प्रहासीश्चिराय ॥ १३ ॥

क्रोधजेन हर्षजेन मात्रावताल्पकालभोज्येन कामफलेनेत्यर्थः ।

नाधर्मे ते दीयते पार्थ बुद्धि-
र्न संरम्भात्कर्म चकर्थ पापम् ।
अद्धा तत्किं कारणं यस्य हेतोः
प्रज्ञाविरुद्धं कर्म चिकीर्षसीदम् ॥ १४ ॥
अव्याधिजं कटुकं शीर्षरोगं
यशोमुषं पापफलोदयं च ।
यत्र भीष्मः शान्तनवो हतः स्या-
द्यत्र द्रोणः सहपुत्रो हतः स्यात् ॥ १५ ॥
कृपः शल्यः सौमदत्तिः विकर्णो
विविंशतिः कर्णदुर्योधनौ च ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतान्हत्वा कीदृशं ते सुखं स्या-
    द्यद्विन्देथास्तदनुब्रूहि पार्थ ॥ १६ ॥
लब्ध्वापीमां पृथिवीं सागरान्तां
    जरामृत्यू नैव जातु प्रजह्याः।
प्रियाप्रिये सुखदुःखे च राज-
    न्नेवं विद्वान्नैव युद्धं कुरुत्वम् ॥ १७ ॥
अमात्यानां यदि कामस्य हेतो-
    रेवंयुक्तः[ ६अ ]कर्म चिकीर्षसि त्वम्।
अपक्रामेः संप्रद्राय स्वेमेभ्यो
    मैवापगा देवयानात्पथो वै ' ॥ १८ ॥ इति

इति सर्वतः शोधितत्वाद्वाक्यजातमिदं सर्वचिन्तावर्जकमपि समलत्वान्नीत्याभास एवेति। अत्र युधिष्ठिरस्य समर्थनवाक्यम्। अमलत्वात्परमार्थनीतिरूपत्वाच्चाल्पम्। यथाः——

' असंशयं संजय सत्यमेत-
    द्धर्मो वरः कर्मणां यत्त्वमात्थ।
ज्ञात्वा तु मां संजय गर्हयेस्त्वं
    यद्यधर्मं यदि धर्मं चरामि ॥ १९ ॥
यत्राधर्मो धर्मरूपाणि धत्ते
    कृत्स्नोऽधर्मः दृश्यते धर्मरूपः।
तथा धर्मो विदधद्धर्मरूपं
    विद्वांसस्तत्संप्रपश्यन्ति बुद्धया ' ॥ २० ॥ इति

अत्रार्थः। अधर्मो हिंसादिरूपोऽसौ च चौरवर्ज्यः सत्त्वादिगतो यथा धर्मः तथा क्षत्रधर्मोऽप्यसौ यथा वा मधुपर्के पशुहिंसाधर्मो गृहस्थानामग्निहोत्रादिरूपोऽसावापि बीजपश्वादिहिंसया वानप्रस्थसंन्यासिनां यथाऽधर्म एव तथा तदुक्तो वनप्रव्रज्या-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिधर्मः प्रजापालनाद्यधिकृतस्य क्षत्रस्याविहितत्वादधर्मः । तथा राजसूययाजिराज्ञां द्यूतं धर्मो नैसर्गिकोऽसावपि कपटदम्भादिप्रयुक्तत्वादधर्मरूपं बिभर्ति एवं बुद्ध्या प्रकाशमानं पश्यन्ति, न त्वादृशास्त्वत्स्वामिसमाना वा ये इत्यर्थः । इति धर्मविचारणायातिसूक्ष्मत्वादमलप्रज्ञैव नीतिरिति भावः । तथा युधिष्ठिरवाक्यं:—

‘ लुप्तायां तु प्रकृतौ येन कर्म
निष्पादयेत्तत्परीप्सेद्विहीनः ।
प्रकृतिस्थश्चापदि वर्तमान
उभौ गर्ह्यौ भवतः संजयैतौ ’ ।। २१ ।।

एतावुभौ विहीनः प्रकृतिस्थधर्मं पालयन् प्रकृतिस्थश्चापद्धर्मं पालयन्निति । तथा

‘ मनीषिणां सत्त्वविच्छेदनाय
विधीयतेऽसत्सुवृत्तिः सदैव ।
अब्राह्मणाः सन्ति तु ये न वैद्याः
सर्वोच्छेदं साधु मन्येत तेभ्यः ।। २२ ।।

सत्त्वविच्छेदनाय देहविनाशाय, विधीयते श्रुतिस्मृतिषु न तु निषिध्यते, वृत्तिः प्रवृत्तिः, अब्राह्मणा वेदोक्तसीमानिर्गताः, सर्वोच्छेदं देहद्रव्यादिसर्वनाशम् । तथा

‘ यत्किञ्चेदं वित्तम[ ६ ब ]स्यां पृथिव्यां
यद्देवानां त्रिदशानां परं यत् ।
प्राजापत्यं त्रिदिवं ब्रह्मलोकं
नाधर्मतः संजय कामये तत् ’ ।। २३ ।।

इति सिद्धममला प्रज्ञा नीतिरिति ।

**इति नीतिकल्पलतायां नीतिप्रभावदैवबलीयस्त्वंनीतिपरित्यागनीतिस्वरूपकथनाख्या प्रथमा मञ्जरी समाप्ता ।**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ ५ ]

ॐ

श्रीगणेशाय नमः । एवं नीतिस्वरूपमुक्त्वा कथमसौ विधातव्येति पीठिकामवतरयन्नाह ।

सेयं निश्चितधीभिरेकशरणैः कार्येति केचिज्जगुः
सामस्त्यं किल कार्यसाधकममुत्रापीति चान्ये विदुः ।
मुक्त्वा साहसमाकलय्य घटनां तस्माद्विदामे तथा
लोकेऽस्मिश्चरतां न कापि कलनासौ या न हस्तं श्रयेत् ॥१॥

**सेयमिति :**— सेयममलप्रज्ञालक्षणा नीतिर्निश्चितधीभिर्निरंतरशास्त्रपरिचयावदातधिषणैरेकशरणैरेकः स्व एवान्तर्यामी शरणं रक्षिता यत्रेत्येवं विधेया केवलमसावन्तर्यामी यदत्रोचितं जानाति तदेव मम हितमिति कृत्वा स्वमनसैव विमृश्य कार्येति केचिज्जगुः ।

अयमर्थः । यथा परमेश्वरोऽसावेकः स्वकर्तव्येऽन्यानपेक्षः स्वविभूत्यैव कार्यान्तं गच्छति तथाहमपि तदेकशरणस्तद्वदत्रोपकरणश्च तत्प्रसादादेव कार्यान्तं गच्छामीति किमन्येन मम कर्तव्यमिति । तथा च याज्ञवल्क्यवाक्यम्—

'एकः परोस्तीह चराचराणां कर्ता स्वयं भूतिरशेषसाक्षी ।
न चान्यदस्तीति दृक्प्रतीतौ गति र्विशुद्धा परमा किमन्यद्' ॥२॥ इति

अथवा एकशरणैरेकं स्वमनएवात्र शरणं नान्य एतदन्तरज्ञो विधेय इति । शास्त्रानुशासिते निश्चितिधीभिरियं विधेयेति । तथा च नीतिशास्त्रम्

'षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णोऽपि[ ७ अ ]जातुचित् ।
द्विकर्णस्य तु मन्त्रस्य ब्रह्माप्यन्तं न गच्छति' ॥ ३ ॥

तथा

'गिरिशृङ्गमुपारुह्य प्रासादं वा रहो गतः ।
अरण्ये निःशलाके वा तत्र मन्त्रो विधीयते' ॥ ४ ॥ इति

इति नीतिगोपनाभिधं कुसुमम् ॥ ५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ ६ ]

अन्ये पुनः **किलेतिः**-- निश्चितमेतदाधुनिकैः सामस्त्यं परसाहाय्यं कार्यसाधकमिति विदुः । ततश्चापेक्षानुसारेणैकं बहून्यातांश्च ज्येष्ठोत्तमान्कनिष्ठप्राकृतान्वा सहायीकृत्य नीत्या कार्यं साधयेदित्यर्थः । तथा च सुशीलशैल्याम्

' अनन्तकार्यसीमान्तं गन्तुमेकः कथं प्रभुः ।
उन्मूल्यशत्रून्साहाय्यादेत्य कार्यान्तमग्र्यधीः ' ॥ १ ॥ इति

व्यतिरेकबोधोऽपि तत्रैवोक्तः ।

' असंमन्त्र्यकृता तत्तत्फलासिद्धावनर्गला ।
सर्वोपालम्भरसना कथं नाम न दूषयेत् ॥ २ ॥ इति

तथा

' समंन्त्र्यकारिणां जातु फलासिद्धौच पूरुषम् ।
संश्लाघ्य निन्द्यते दैवं धिगुद्योगारिमुद्धतम् ॥ ३ ॥
बहुनालं विनिश्चित्य बहुभिर्यद्विधीयते ।
तदेकनिश्चितं दूराद्विजित्य सफलं भवेत् ॥ ४ ॥
न बुद्धिधर्म एकोऽस्तीत्येवं निश्चित्यमाररैः ।
नयरत्नमिदं धीमन्मुद्रयस्वानवेक्षया ' ॥ ५ ॥

अत्रार्थः । कदाचित् कस्यचित् धीरत्र पारमेष्यत्येवेतीदं नयरत्नमररैः कुकल्पनारूपैरर्गलैरनवेक्षयाऽनाश्रयणेन मा मुद्रय माऽऽवद्धमुखं कुरु । अवश्यं कस्याप्येतन्नीतिरत्नं बुद्धिधर्मउन्मुद्रितं कार्यसिद्धये स्यादेवेति ।

आहुश्चः पूर्वे निपुणा द्वाभ्यामेको विजीयते ।
बहुभिश्चापि तौ सत्यं सदैव सफलो नयः ॥ ६ ॥
कालान्तरफलायालं तत्क्षणं न फलेद्यदि ।
कृतं हि सुकृतं लोके न जातु विफलं भवेत् ॥ ७ ॥
देशौकः पुरकार्येषु विधीयो धीधनैः सह ।
आरवेटोऽसौ बह्वधीनो यूथो नैकस्य गोचरः ॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नास्मादृतेऽन्यदस्तीह सम्भाव्यापदमायतौ ।
असौ विधेयः सद्वैद्यैरभ्यस्तमतिभिः सदा ॥ ९ ॥
आयव्ययपरिज्ञानचतुरैर्दीर्घदर्शिभिः ।
( ७ ब ) आरम्भोऽयं विदां सत्यं सत्फलाय दृढं भवेत् ॥ १० ॥
उक्तं च प्राक्तनैर्ज्येष्ठकनिष्ठोत्तमपामरैः ।
प्रतीतिपात्रैरेषा धीः कर्तव्या भव्यबुद्धिभिः ॥ ११ ॥
कदापि संभवन्त्येषा धीः कनिष्ठार्वतामपि
या ज्येष्ठोत्तमसाधूनां मनोरथपथातिगा ॥ १२ ॥ इति

अलं वा बहुना यत्र परलोकमार्गे स्वजनबन्धादित्यागेनैक एव गच्छतीति लोके प्रसिद्धिः । तत्रापि नैकस्यास्य निर्वाह इति दृष्टान्तद्वारेणावतारयति । **अमुत्रेति**:— अमुत्र परलोके सामस्त्यमेव कार्यसाधकं भाविजन्मान्तरसाधकं तत्र किं वक्तव्यं सर्वसंभारभरित इह लोक इति । परलोकमार्गे ह्यसौ लोकप्रसिद्धैक एव गच्छन् सहाय एव तत्रापि गच्छतीति । तथा च सूत्रकारः

'तदनन्तरप्रतिपत्तौ रंहतिसंपरिष्वक्तः प्रश्ननिरूपणाभ्यामिति' ।

अनेन हीन्द्रियप्राणमालासहितस्यैव व्यावहारिकजीवस्य प्रयाणं ब्रूते इति । अथ च उक्तं परमेश्वर एकोऽसहाय एव स्वविधेयं निर्वहतीति किमित्यपूर्वमन्यदुत्थापितमिति न मन्तव्यमित्यवतारयति । **अमुत्रापीति**:— अमुत्र परमेश्वरेप्येवं ससहाय एवासावपि करोतीति स्वकर्तव्ये प्रथमं स्वविभूतिप्रसारणात् । तथा च निदर्शितम् ।

तथा च स्वयमीशोऽसौ स्थितवान्तश्चतुरात्मना ।
विविच्य कुरुते यात्रां तदभावे कुतः स्थितिः ॥ १३ ॥ इति

अत्रार्थः— स्वयमन्तर्यामितया स्थित्वा चतुरात्मनान्तःकरणचतुष्कतदधिष्ठातृसंकर्षाणां चतुष्कतया विविच्य चित्संकल्पनिश्चयाहन्ताभिः पृथक्कृत्य यात्रां लोकव्यवहारं कुरुते इति । अत्रैवोक्तमर्थं व्यतिरेकमुखेन दृढयति । तदभावे इति तथा चोक्तम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'पञ्चकेयमतो लोके सभा रूढिं गता तया ।
न जात्वेषा विपर्येति पञ्चस्वीश इति स्थितिः' ॥ ४ ॥ इति

अत्रार्थः—— स्वयं स्वपदे चतुर्भिर्विवेचनादिकर्तृत्वं यात्रेति पञ्चकापञ्च (८ ब) संज्ञा सभा लोके रूढिं गता यत्र कुत्रापि व्यवहारे सभापञ्चकेति गीयते इति । अस्या महत्त्वमाह। **अनयेति**:— अनया पञ्चकलक्षणया सभयेयं यात्रा न जातु विपर्येति फलकाले विसंवादं नाप्नोति । अत्रापि लौकिकमाभाषणकमुत्थापयति । **पञ्चस्विति**:— पञ्चसु परमेश्वर इति लौकिका अपि वदन्तीति अत एव पञ्चायतनपूजापि लोके मुख्यतया रूढेति ।

## इति समेत्यकारणाभिधं कुसुमम् ॥ ६ ॥

---

## [ ७ ]

अस्याः कर्तव्यशेषायाह मुक्त्वेति । **तस्मादिति**:—यस्मान्नीतेरेवमपेक्षानुसारेणैकानेकज्येष्ठकनिष्ठादिरूपेण कर्तव्यत्वमस्ति तस्माद् घटनां कार्यसंगतिमाकलय्य चित्तेन विमृष्येदं कर्तव्यमिति साहसमविचारत्वरां सम्भ्रमं त्यक्त्वानयारीत्याचरतां व्यवहरतां कासौ कलना कार्यचिन्ता या हस्तं न श्रयेत् स्वविधेया न भवेत् । त्वरयावश्यं कार्यनाशदर्शनाद्विचारक्षमे कार्ये न त्वरा कार्येति दैत्यसर्गत्वादस्याः । तथा चोक्तम् :—

'मदोद्धतमतीन्दैत्यानुन्मूलयितुमञ्जसा ।
यासौ भगवता रीतिः स्थापितासौ त्वरा मता ॥ १ ॥
पूर्वापरानुसन्धानवैकल्यं या त्वरास्ति सा ।
नास्तिक्यमथ वा भ्रान्तिरविचारो क्षमापि वा' ॥ २ ॥ इति
'तितिक्षया विचारेण या विधेयाद्रवर्तना[1] ।
सैषास्तिक्यं विशुद्धोऽसौ संकल्पश्चेश्वरीगतिः ॥ ३ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विमृष्यकारिता नाम कार्यशोभाविधायिनी ।
अविमृष्यक्रिया नूनं कार्यमालिन्यकारणम् ॥ ४ ॥
शनैः शनैः क्रियारब्धा बलिने स्वेष्ट सिद्धये ।
पर्यवस्यशयप्राप्ता भवेदिति विनिश्चयः ॥ ५ ॥
क्रियोष्मणा समारब्धा विदग्धा दुर्बला सती ।
अप्राप्याभीप्सितं पुंसां बलाद्धस्तात्पलायते ॥ ६ ॥
न परं स्वार्थनाशाय त्वरेयं भुवि जायते ।
लोकभारः स्वलज्जा च विशेषोऽधिक ईक्ष्यते ' ॥ ७ ॥
अत्राप्युदाहरन्तीदं मकराख्यनमुत्तमम् ।
' आसीत्सरसि कस्मिश्चिन्मकरात्रितयं पुरा ।
तत्राद्यो यद्भव[ ८ ब]नामा द्वितीयोऽतीतदर्श्यपि ।
प्रत्युत्पन्नमतिश्चापि तृतीयस्तत्क्रियां ब्रुवे । ॥ ८ ॥
कदाचिज्जालिकास्तत्र समायाता यदृच्छया ।
विलोक्य सरसस्तस्य निम्नोनत्यं धृतिं दधुः ॥ ९ ॥
अथ निर्गममार्गाणां स्तैमित्याच्छाङ्कितशयः ।
द्वितीयोऽसौ समास्फाल्य स्रवन्मार्गेण निर्गतः ॥ १० ॥
परितो रुद्धवाहां तां विधाय सरसीं च ते ।
जालान्याचक्रुस्तत्र तृतीयोऽसौ समागतः ॥ ११ ॥
तदोत्पन्नमतित्वात्सोऽभिनीय मृतकाकृतीम् ।
ततः सुदूराद्विक्षिप्तो विचारनिरतोऽभवत् ॥ १२ ॥
येनाभिनयेनाहं विमुक्तो मरणादसौ ।
कथं हीयेत मयका विचारो[1] मुक्तिकारणम् ॥ १३ ॥
अस्तु किं नामया कुर्युरेतेस्सद्वधजीविनः[1] ।
विचारोऽयं न हातव्यो दृश्यतां किं समापतेत् ॥ १४ ॥

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संभाव्य तान्गतान्दूरे परानयनविक्लवान् ।
जीवोत्थायं समास्फाल्य जलस्यन्तिकमप्सरः[1] ॥ १५ ॥
जालान्याकृष्य ते तत्र प्रयत्ननिरतास्ततः ।
आवंतं प्रोच्छलद्गात्रं गृहीत्वा तटमाययुः ॥ १६ ॥
कुठारान्समुपादाय मामेति कृतसंविदः ।
खण्डशस्तं क्षुधा कृत्वाऽऽदाय जग्मुर्यथागतम् ॥ १७ ॥
इति पाकं समालोच्य विचारत्वरयोर्बुधः ।
समाहितमतिर्भूत्वा विचारनिरतो भवेत् ॥ १८ ॥
लोभाद्याधिक्यतः क्रोधाविर्भावाच्चाप्यसौक्रिया ।
न जातु धीमता कार्या दूषणासौ गरीयसाम् ॥ १९ ॥
बुद्धिवल्गां समुत्सृज्य क्रोधदुर्वाजिगो हि यः ।
धावते पतनं तस्य सुलभं स्यात्पदेपदे ॥ २० ॥
शिरः पादौ समालोच्य धीमान्कार्यशरीरिणः ।
विचारामृतसेकेन पुष्टिं कुर्यान्निरंतरम् ॥ २१ ॥
तन्मास्तु यां क्रियां कृत्वा व्रीडास्यात्कार्यकारिणाम् ।
पश्चातापोऽपि वा हा[1] किं कार्यमेतत्कृतं मया ॥ २२ ॥
धराधिपत्यकार्येषु नैव धोरणधोरणैः ।
पदं विधेयं संधार्य संधार्यैषोचिता क्रिया ॥ २३ ॥
शतशः पुरुषानेकक्षमा मारयितुं क्षणात् ।
शक्तानां गण्यते शक्तिर्यदि जीवेत संस्थितः ॥ २४ ॥
दृष्टं विमृष्यकर्तॄणां सदावदनमुज्वलम् ।
[ ९ अ ] निन्दापङ्कावृतं चापि कार्ये साहसकारिणाम् ॥ २५ ॥
इत्थं च कोपवेलायां नृपेणाज्ञाकर्षां बलात् ।
प्रत्यावर्त्य समाधेयं दृढकार्यान्तदर्शिना ॥ २६ ॥

**इति मकराख्यानं नाम कुसुमम् ॥ ७ ॥**

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[८]

नाशं सहासकार्येति सम्पत्तावपि मूढधीः ।
बुद्धिं संमन्त्र्यकार्येति विपत्तावपि बुद्धधीः ॥ १ ॥
तथा हि दृश्यतां रामरावणौ तादृशस्थिती ।
निदर्शनमिहामुत्र जग्मतुर्यत्समाश्रयात् ॥ २ ॥
विमृष्य कालं सोढ्वापि सौष्ठवं याति धीमताम् ।
पणितं चापि यत्कार्यं त्वरानर्थाय केवलम् ॥ ३ ॥
तथा च शिखरारूढौ कौचित्किल परस्परम् ।
उद्दिश्य वसनादानं भूप्राप्तौ पेणतुः पुरः ॥ ४ ॥
तत्रैको बुद्धिमादाय सुखेन भुवमागतः ।
अपरस्त्वरया लोकहास्याय प्रलयं गतः ॥ ५ ॥
जायते सिद्धये शीघ्रं विमृष्य विहिता क्रिया ।
क्षेपाया सिद्धये चापि त्वरानर्थैककारणम् ॥ ६ ॥
श्रूयते कौचनारण्यं गताविङ्गारसिद्धये ।
चिरकारीद्रुतं प्रातःक्षिप्रकारी चिराद्गृहम् ॥ ७ ॥
प्रज्वाल्य वह्निं निर्वाप्य बद्ध्वा भारं सुखाद्गृहम् ।
प्राप्तोऽसौ चिरकृत्साधु फलेन युयुजे पुनः ॥ ८ ॥
क्षिप्रकारी द्रुतं भारं बद्ध्वा मार्गेऽनलोदयात् ।
तप्त्वा गत्वा नदीं भारं निर्वाप्यापार्धभाक्चिरम् [1] ॥ ९ ॥

**इति संभ्रमविचारफलाभिधं कुसुमम् ॥ ८ ॥**

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ ९ ]

इति नीतिपीठिकां व्यवस्थाप्य तामेव नीतिं विवृण्वन्नतारयति ।

**समर्ज्यं पाण्डित्यं स्वपरहितकृत्कीर्तिजनकं**
**न मौर्ख्यं धीपात्रैरिहच परलोके च भयदम् ।**
**सदासङ्गो धार्यः सुजनशुभशास्त्रार्थनिरतै**
**र्न धूर्तैः पाषाण्डप्रवणमतिभिर्वश्चन परैः ॥**

**समर्ज्यमिति**:— धीपात्रैः परमेश्वरसमर्पितबुद्ध्याख्यानर्घ्यमणिरक्षणचतुरैः पाण्डित्यमेव समर्ज्यं सर्वमन्याद्विहायैतदेव प्रयत्नेन पण्डितगृहानागत्य विनयेन प्रार्थ्यमिति प्रतिज्ञा । तत्र विशेषणद्वारेण हेत्वादि निरूपणार्थमाह । **स्वपरेति**:— तत्र पण्डा शुद्धा मतिः सा संजातास्येति पण्डितस्तस्य भावस्तत्त्वमेतदवश्यं समर्जनीयमेतद्विना जीवनमात्रस्याप्यतिदुर्घटत्वात् । तथा च

'जीवत्यर्थदरिद्रोऽपि धीदरिद्रो न जीवति' । इति

अनेन हि चरतां व्यवहरतां ( ९ ब ) स्वहितं परहितं चानुभूयान्ते कीर्तिस्थापनाल्लोकानन्त्यमपि सिद्ध्यतीत्युक्तं **कीर्तिजनक**मिति । तथा च भगवान् व्यासः

'दिवं स्पृशति भूमिं च शब्दः पुण्यस्य कर्मणः ।
यावत्स शब्दो भवति तावत्पुरुष उच्यते ॥ १ ॥ इति

तथा

'यावत्कीर्तिर्मनुष्यस्य पुण्यलोकेषु गीयते ।
तावत्स पुरुषव्याघ्र स्वर्गलोके महीयते' ॥ २ ॥

इति प्रसिद्धं चेन्द्रद्युम्नोपाख्यानादाविदमिहतु विस्तारभयान्न प्रतन्यते ।

पाण्डित्यं समर्ज्यमित्युक्तेऽर्थान्मौर्ख्यं न समर्ज्यमिति लब्धेऽपि विनये सौकर्यार्थमेतदपि साक्षादेवोद्दिशति । **न मौर्ख्यमिति**:— तत्र मूर्खोऽविवेकी कार्याकार्य विवेकहीनस्तद्भावो मौर्ख्यं तन्न समर्ज्यमिति पूर्ववत्प्रतिज्ञा । अत्र हेत्वादि निरूपणार्थं विशेषेणोपन्यास इहेत्यादि । एतदुभयलक्षणानि च धृतराष्ट्रं प्रति विदुरो वक्ति स्म यथा—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



' निषेवते प्रशस्तानि निन्दितानि न सेवते ।
अनास्तिकः श्रद्दधान एतत्पण्डित लक्षणम् ॥ ३ ॥
क्रोधो हर्षश्च दर्पश्च ह्रीःस्तम्भो मान्यमानिता ।
यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते ॥ ४ ॥

अर्थात् स्वबुद्धिनिश्चयात्—

यस्य कृतिं न जानन्ति मन्त्रं वा मन्त्रितं परे ।
कृतमेवास्य जानन्ति स वै पण्डित उच्यते ॥ ५ ॥
कृतं फलितं फले जाते जानन्ति अनेनेदं कृतमासीदिति ।
यस्य कृतिं न निघ्नन्ति शीतमुष्णं भयं रतिः ।
समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते ॥ ६ ॥
यस्य कृतिं न जानन्ति मन्त्रं वा नीतिसंयुतम् ।
धर्ममेवास्य जानन्ति स वै पण्डित उच्यते ॥ ७ ॥

अत्र कृतमन्त्रौ कामार्थप्रधानौ कामार्थौ गुप्तमेव रचयतीत्यनेन तत्रोभयत्रास्वारस्यं सूचितम् ।

यस्य संसारिणी प्रज्ञा धर्मार्थावनुवर्तते ।
कामादर्थं वृणीते यः स वै पण्डित उच्यते ॥ ८ ॥

संसारिणी सम्यक्सरणशीला । अयमर्थः कामापेक्षयार्थं वृणीतेऽर्थापेक्षया धर्मं वृणीत इति धर्मार्थमेव केवलं कामार्थौ सेवते इति । तथा[१० अ]चाभिज्ञवाक्यम्:—

' स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूयते ।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ' ॥ ९ ॥ इति
यथाशक्ति चिकीर्षन्ति यथाशक्ति च कुर्वते ।
न किंचिदवमन्यन्ते पण्डिता भरतर्षभ ॥ १० ॥
क्षिप्रं विजानाति चिरं शृणोति
विज्ञाय चार्थं भजते न कामात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नासंस्पृष्ट उपयुङ्क्ते परार्थे
तत्प्रज्ञानं प्रथमं पण्डितस्य ॥ ११ ॥

चिरं शृणोति शङ्कानिरसावधि, अर्थमलं विज्ञाय भजते अनेन ममासावर्थः सिद्धयतीति भजते तत्र सक्तिं कुरुते, न कामात् इच्छामात्रात्, असंस्पृष्टस्तदनंतरमप्राप्तः परार्थविषये नोपयुङ्क्ते उपक्रमते, प्रज्ञानं चिह्नम् ।

नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः ॥ १२ ॥

निश्चित्य यः प्रक्रमते नान्तर्वसति कर्मणः ।
अवन्ध्यकालो वश्यात्मा स वै पण्डित उच्यते ॥ १३ ॥

उपायं निश्चित्य प्रक्रमते, शीघ्रं करोति, नान्तर्वसति आरभ्य चिरयति, कर्मासमाप्य वा न मध्ये तिष्ठति, अवन्ध्यकालः सदाप्रयोजनवान् अवसानज्ञो वा, अथवा प्रथमे शास्त्रार्थचिन्ता द्वितीयेऽर्थादिचिन्ता तृतीये धर्मचिन्तेत्यादि ।

आर्यकर्मणि रज्यन्ते भूमिनाशं न कुर्वते ।
हितं च नाभिसूयन्ति पण्डिता भरतर्षभ ॥ १४ ॥

न हृष्यत्यात्मसंमाने नावमानेन तप्यते ।
गङ्गाह्रद इवाक्षोभ्यो यः स पण्डित उच्यते ॥ १५ ॥

तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम् ।
उपायज्ञो मनुष्याणां स वै पण्डित उच्यते ॥ १६ ॥

भूता[ १० ब ]नां पृथिव्यादिविकाराणां, तत्त्वं विनाशित्वादि, योग औचित्यम्, मनुष्यकर्तव्योपायज्ञश्च ।

प्रवृत्तवाक्चित्रकथऊहावान्प्रतिभानवान् ।
आशु ग्रन्थप्रयुक्ता च स वै पण्डित उच्यते ॥ १७ ॥

प्रतिभा तत्कालस्फूर्तिः ।

श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा ।
असंभिन्नार्यमर्यादः पण्डिताख्यां लभेत सः ॥ १८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव च ।
विचरत्यसमुन्नद्धो यः स पण्डित उच्यते ॥ १९ ॥

इति व्यावहारिकपण्डितसाक्षाल्लक्षणकथनाभिधं कुसुमम् ।

[ ९ अ ]

अथार्थिकं तल्लक्षणम् ।

यः काममन्यू प्रजहाति राजा
पात्रे प्रतिष्ठापयते धनं च ।
विशेषविच्छ्रुतवान्क्षिप्रकारी
तं सर्वलोकः कुरुते प्रमाणम् ॥ १ ॥
जानाति विश्वासयितुं मनुष्या-
न्विज्ञातदोषेषु ददाति दण्डम् ।
जानाति मात्राश्च तथा क्षमां च
तं तादृशं श्रीर्जयते समग्रा ॥ २ ॥

मात्राविषयान्हेयत्वेन जानाति, क्षमामुपादेयत्वेन । अथवा अक्षमामिति च्छेदः ।

सुदुर्बलं नाभिजानाति कंचि-
द्युक्तो रिपुं सेवते बुद्धिपूर्वम् ।
न निग्रहं रोचयते बलस्थैः
काले च यो विक्रमते स धीरः ॥ ३ ॥

बुद्धिरेषा यत्कंचिदपि नातिदुर्बलं जानाति ततो बलार्जनेऽवलेपो न कार्यः, बलं सर्वथा समर्ज्यम्, बलिनं रिपुं समीक्ष्य समाहितो भूत्वा रिपुं सेवेत, एतदाश्रितोऽसाविति लोकेष्वपि प्रदर्शयन् रिपुं सेवेतेति बुद्धिपूर्वमिति कथनस्याशयः । काले स्वविक्रमकाले ।

प्राप्यापदं न व्यथते कदाचि-
द्विद्यांसमन्विच्छति चाप्रमत्तः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुःखं च काले सहते जितात्मा
धुरंधरस्तस्य जिताः सपत्नाः ॥ ४ ॥

विद्वान्प्रतीकारज्ञः, अप्रमत्तः कार्यसीमाभिलाषी ।

अनर्थकं विप्रवासं गृहेभ्यः
पापैः सन्धिं परदाराभिमर्षम् ।
दम्भं स्तेयं पैशुनं मद्यपानं
न सेवते यः स सुखी सदैव ॥ ५ ॥

न संरंभेणारभतेऽर्थवर्गं
चाकारितः शंसति सत्यमेव ।
न प्रश्नार्थे रोचयते विवादं
नापूजितः कुप्यति चाप्यमूढः ॥ ६ ॥

( ११ अ ) संरंभेण परोत्कर्षदर्शनक्रोधेनार्थवर्गं स्वधनं नारभते, स्वधनमह्मपि युगपद्वृद्धिं नयामि युगपच्च वृद्धो भवामीति न प्रयुज्येत, अथवार्थवर्गं त्रिवर्गं संरंभेण क्रोधमात्रेण क्रोधावेशेन धर्मार्थकामान्न विनाशयेदित्यर्थः । आकारितः साक्ष्येण, मित्रार्थे मित्रप्रयोजने ।

न योऽभ्यसूयत्यनुकम्पते च
न दुर्बलः प्रातिभाव्यं करोति ।
अत्याहिते किञ्चित्क्षमते विवादं
सर्वत्र तादृग्लभते प्रशंसाम् ॥ ७ ॥

नाभ्यसूयति गुणिनम्, अनुकम्पते दीनम्, न प्रातिभाव्यं करोति स्वप्रथितस्यास्य दानप्रसङ्गात्, अत्याहिते महाभये, तदानीं विवादे क्रियमाणे कार्यनाशप्रसङ्गात् ।

यो नोद्धतं कुरुते जातुवेषं
न पौरुषेणापि विकत्थतेऽन्यान् ।
न मूर्च्छितः कटुकान्याह कंचि-
त्प्रियं सदा तं कुरुते जनोऽयम् ॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूर्च्छितो वृद्धिं प्राप्तोऽथवा पीडितः केनचित् ।
न वैरमुद्दीपयति प्रशान्तं न दर्पमारोहति नास्तमेति ।
न दुर्गतोऽस्मीति करोति मन्युं तमार्यशीलं परमाहुरर्थ्यम् ॥ ९ ॥

नास्तमेति नात्मानं गोपयति को मां पश्यतीति पापं न करोति, मन्युः शोकः।

न स्वे सुखे कुरुतेऽतिहर्षं
नान्यस्य दुःखे भवति प्रतीतः ।
दत्वा न पश्चात्कुरुतेऽनुतापं
न कथते सत्पुरुषार्थशीलः ॥ १० ॥

प्रतीतो हृष्टः,

देशाचारान्समयान्ज्ञातिधर्मा-
न्बुभूषते यस्तु परावरज्ञः ।
स यत्र तत्राधिकृतः सदैव
महाजनस्याधिपत्यं करोति ॥ ११ ॥

यस्मिन्देशे य आचारः कर्तव्यस्तं तथा करोति, समयान्प्रतिज्ञारूपान्नियमान्।

दम्भं मोहं मत्सरं पापकृत्यं
राजद्विष्टं पैशुनं पूगवैरम् ।
मत्तोन्मत्तैर्दुर्जनैश्च प्रवादं
यः प्रज्ञावान्वर्जयेत्स प्रधानम् ॥ १२ ॥

परवञ्चनेच्छया धर्मानुष्ठानं दम्भः, अनात्मन्यात्मधीर्मोहः, द्वेषणप्रकृत्या पापक्रियारोपणं मत्सरः, बहुभिर्वैरम् पूगवैरम् ।

शमं शौचं दैवतं मङ्गलानि
प्रायश्चित्तं विविधांल्लोकवादान् ।
एतानि यः कुरुते नैत्य[११ब]कानि
तस्योत्थानं देवता धारयन्ति ॥ १३ ॥

For Private and Personal Use Only

देवतार्थं कर्म देवः, लोकव्यवहारसिद्धाधर्मा लोकवादाः, उत्थानमभ्युदयम् ।

समैर्विवाहं कुरुते न हीनैः
समैः सख्यं व्यवहारं कथाश्च ।
गुणैर्विशिष्टांश्च पुरोदधाति
विपश्चितस्तस्य नयाः सुनीताः ॥ १४ ॥

मितं भुंक्ते संविभज्याश्रितेभ्यो
मितं स्वपित्यमितं कर्म कृत्वा ।
ददाति मित्रेष्वपि याचितो य
स्तमात्मवन्तं प्रजहत्यनर्थाः ॥ १५ ॥

चिकीर्षितं विप्रकृतं च यस्य
नान्ये जनाः कर्म विन्दति किञ्चित् ।
मन्त्रे गुप्ते सम्यगनुष्ठिते च
नाल्पोऽप्यस्य व्यथते कश्चिदर्थः ॥ १६ ॥

विप्रकृतं विरुद्धकृतं, व्यथते हस्ताद्भ्रश्यति ।

यः सर्वभूतप्रथमो विशिष्टः
सत्यो मृदुर्दानकृच्छुद्धभावः ।
अतीव सन्धायति ज्ञातिमध्ये
महामतिर्जन्य इव प्रसन्नः ॥ १७ ॥

य आत्मनापत्रपते भृशं नरः
स सर्वलोकेशवरो भवत्युत ।
अनन्ततेजाः सुमनाः समाहितः
स्वतेजसा सूर्य इवावभासते ॥ १८ ॥

आत्मनापत्रपतेऽन्येनानुक्तोऽपि स्वकृतं व्यलीकं स्वयं ज्ञात्वा लज्जते ।

मिथ्योपेतानि कर्माणि सिध्येयुर्यानि भारत ।
अनुपायप्रयुक्तानि मा स्म तेषु मनः कृथाः ॥ १९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिथ्योपेतानि मिथ्याचरितानि, अनुपायप्रयुक्तत्वाद्दुःखोदर्काणि ।

तथैव योगविहितं न सिध्येत्कर्म यन्नृषु ।
उपाययुक्तं मेधावी न तत्र ग्लपयेन्मनः ॥ २० ॥

उपाययुक्तमपि कर्मयोगेन युक्त्यापि विहितं चेन्न सिध्येत् न तत्र मनो ग्लपयेत् दैवप्रतिबद्धत्वात् तस्येत्यर्थः ।

अनुबन्धानवेक्षेत सानुबन्धेषु कर्मसु ।
संप्रधार्य च कुर्वीत न वेगेन समाचरेत् ॥ २१ ॥

सानुबन्धेषु सदोषोत्पादेषु सप्रतिबन्धेष्विति यावत्, अनुबन्धान्यारम्भप्रतिबन्धात् ।

अनुबन्धं च संप्रेक्ष्य विपाकांश्चैव कर्मणाम् ।
उत्थानमात्मनश्चैव धीरः कुर्वीत वा न वा ॥ २२ ॥

अनुबन्धः साधनं, विपाकः फलं, उत्थानं शक्तिः, अत्र कर्मण्येतानि साधनान्येतत्फल[ १२ अ ]मेतावती मम शक्तिरिति विचार्य कुर्वीत न वा कुर्वीत ।

यः प्रमाणं न जानाति स्थाने वृद्धौ तथा क्षये ।
कोशे जनपदे दण्डे न स राज्येऽवतिष्ठते ॥ २३ ॥

यः कोशादिषु त्रिषु प्रत्येकं क्षयस्थानवृद्धीनां प्रमाणमनुबन्धविपाकोदयलक्षणं न वेदेति ।

यस्त्वेतानि प्रमाणानि यथोक्तानुनुपश्यति ।
युक्तो धर्मार्थयोर्ज्ञाने स राज्यमधिगच्छति ॥ २४ ॥

न राज्ञा प्राप्तमित्येव वर्तितव्यमसाम्प्रतम् ।
श्रियं ह्यविनयो हन्ति जरारूपमिवोत्तमम् ॥ २५ ॥

असाम्प्रतं नीतिविरुद्धमिदम् ।

भक्ष्योत्तमप्रतिच्छन्नं मत्स्यो बडिशमायसम् ।
रूपातिपाती ग्रसते नानुबन्धमवेक्षते ॥ २६ ॥

रूपातिपाती भक्ष्यरूपमात्रे पतन्, अनुबन्धं पश्चाद्बन्धम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यच्छक्यं ग्रसितुं ग्रासं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामाद्यत्तदद्यं भूमिमिच्छता ॥ २७ ॥

वनस्पतेरपक्वानि फलानि प्रचिनोति यः ।
स नाप्नोति रसं तेभ्यो बीजं चास्य विनश्यति ॥ २८ ॥

यस्तु पक्वमुपादत्ते काले परिणतं फलं ।
फलाद्रसं स भजते बीजाच्चैव फलं पुनः ॥ २९ ॥

यथा मधु समाधत्ते रक्षन्पुष्पाणि षट्पदः ।
तद्वदर्थान्मनुष्येभ्य आदद्यादविहिंसया ॥ ३० ॥

पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत् ।
मालाकार इवारामे न यथाङ्गारकारकः ॥ ३१ ॥

किं नु मे स्यादिदं कृत्वा किं नु मे स्यादकुर्वतः ।
इति कर्माणि संचिन्त्य कुर्याद्वा पुरुषो न वा ॥ ३२ ॥

प्रमाणं नैव जानातीत्यस्यवै निदर्शनमिदं पुनर्विमर्शार्थं दोषाणां दुरुहत्वादिति भावः ।

अनारम्भ्या एव भवन्त्यर्थाः केचित्तथागता ।
कृतः पुरुषकारो हि भवेद्येषु निरर्थकः ॥ ३३ ॥

अगता अप्राप्ताः केचित्पर्वतपाटनादयः अनारम्भ्या एवाशक्यत्वात्, हिरण्यार्थे भिन्नक्रमः कृतोऽपीति ।

कांश्चिदर्थान्नरः प्राज्ञो लघुमूलान्महाफलान् ।
क्षिप्रमारभते कर्तुं न विघ्नयति तादृशान् ॥ ३४ ॥

ऋजु पश्यति य सर्वं चक्षुषानुपिबन्निव ।
आसीनमपि तूष्णीकमपि रज्यन्ति तं प्रजाः ॥ ३५ ॥

चक्षुसा मनसा वाचा कर्मणा च चतुर्वि[ १२ब ]धम् ।
प्रसादयति यो लोकं तं लोकोऽनुप्रसीदति ॥ ३६ ॥

यस्मात्त्रस्यन्ति भूतानि मृगव्याधान्मृगा इव ।
सागरान्तामपि महीं स लब्ध्वा परिहीयते ॥ ३७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पितृपैतामहं राज्यं प्राप्तवान्स्वेन तेजसा ।
वायूरभ्रमिवासाद्य भ्रंशयत्यनये स्थितः ॥ ३८ ॥

धर्ममाचरतो राज्ञः सद्भिश्चरितमात्मनः ।
वसुदा वसुसंपूर्णा वर्धयेद्भूमिवर्धिनी ॥ ३९ ॥

अथ सन्त्यजतो धर्ममधर्मं चानुतिष्ठतः ।
प्रतिसंवेष्टते भूमिरग्नौ चर्माहितं यथा ॥ ४० ॥

य एव यत्नः कुरुते परराष्ट्रावमर्दने ।
स एव यत्नः कर्तव्यः स्वराष्ट्रपरिपालने ॥ ४१ ॥

धर्मेण राष्ट्रं विन्देत धर्मेण प्रतिपालयेत् ।
धर्ममूलां श्रियं प्राप्य न जहाति न हीयते ॥ ४२ ॥

अप्युन्मत्तात्प्रलपतो बालाश्च परिसर्पतः ।
सर्वतः सारमादद्यादश्मभ्यः इव काञ्चनम् ॥ ४३ ॥

परिसर्पतोऽस्थिरत्वात्सर्वतो धावतेव ।

अव्याकृतानि सुधियां सुकृतानि ततस्ततः ।
संचिन्वन्धीर आसीत शिलाहारी शिलं यथा ॥ ४४ ॥

कणिकाद्यर्जनं शिल इति ।

गन्धेन गावः पश्यन्ति शास्त्रैः पश्यन्ति पण्डिताः ।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥ ४५ ॥

भूयांसं लभते क्लेशं या गौर्भवति दुर्दुहा ।
अथवा सुदुहाभावं नैवं तां विनियुज्यते ॥ ४६ ॥

सुशीलः स्यादित्यर्थः ।

यदतप्तं प्रणमति न तत्संतापमर्हति ।
यदा स्वयं नतं दारू न तत्संनामयन्त्यपि ॥ ४७ ॥

एतयोपमया धीरः सन्नमेत बलीयसे ।
इन्द्राय स प्रणमते नमते यो बलीयसे ॥ ४८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इन्द्राय परमेश्वराय ।

पर्जन्यनाथाः पशवो राजानो मित्रबान्धवाः ।
पतयो बान्धवाः स्त्रीणां ब्राह्मणाः वेदबान्धवाः ॥ ४९ ॥

मित्रं मण्डलस्थं बान्धवत्वं च तैरुपकृतत्वात् ।

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।
मृजया रक्ष्यते रूपं कुलं शीलेन रक्ष्यते ॥ ५० ॥

योगोऽभ्यासः मृजा तद्वर्तनम् ।

मानेन रक्ष्यते धान्यमश्वान्रक्षत्यनुक्रमः ।
अभीक्ष्णदर्शनं गाश्च स्त्रियो रक्षत्यचेलता ॥ ५१ ॥

मानेन यत्तानिश्चयेन तस्य चौरैर्नयनासम्भवात् अथवा मानेन मापनेन । मानहीनं हि स्थापितं धान्यं[१३अ]राक्षसा नयन्तीति लौकिकाः । अनुक्रमः प्रत्यहं चालनम् । अभीक्ष्णदर्शनं गा रक्षति । मध्येघासाद्य[1] लाभे नाशसम्भवात् । अचेलता कुचैलता तदा हि बहिर्निर्गमनाभावात् । अचेलतेति वा प्रोषितभर्तृका-विषयम् ।

न कुलं वृत्तहीनस्य प्रमाणामिति मे मतिः ।
अन्येष्वपि हि जातानां वृत्तमेव विशिष्यते ॥ ५२ ॥

महाकुलस्य हि महत्कुलं निरीक्ष्याकार्यकरणे मतिः सज्जति सद्वृत्तानां तु नीच-कुलजातानामपि अकार्यकरणे लज्जा भवति ।

यः ईर्षुः परवित्तेषु रूपे वीर्ये कुलद्वये ।
सुखे सौभाग्यसत्कारे तस्य व्याधिरनन्तकः ॥ ५३ ॥

परवित्तादीर्षा न कार्या इति भावः ।

अकार्यकरणाद्भीतः कार्याणां च विवर्जनात् ।
अकाले मन्त्रभेदाच्च येन माद्येन्न तत्पिबेत् ॥ ५४ ॥

अकार्यकरणादिह लोके परलोके च भयं, तथावश्यकर्तव्यानां विवर्जनाच्च । अकाले फलनिष्पत्तेः प्राक्, एभिस्त्रिभिः भीतः संभ्रान्त इव भवति । एवमन्यैरपि मदकारकैर्यदि माद्येद्भ्रान्तो भवति न तत्पिबेत् ।

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विद्यामदो धनमदस्तृतीयो जातिसंमदः ।
मदा एते विलिप्तानामेतदेव सतां दमाः ॥ ५५ ॥

जिता सभा वस्त्रवता सधनो गोमता जितः ।
अध्वा जितो यानवता सर्वं शीलवता जितम् ॥ ५६ ॥

शीलं रक्षणीयमिति प्रकृतमन्यद्दृष्टान्तत्वेन ज्ञेयम् ।

शीलं प्रधानं पुरुषे तद्यस्येह विनश्यति ।
न तस्य जीवितेनार्थो न धनेन न तु बन्धुना ॥ ५७ ॥

आढयानां मांसपरमं मध्यानां गोरसोत्तरम् ।
तोयोत्तरं दरिद्राणां भोजनं भरतर्षभ ॥ ५८ ॥

संपन्नतरमेवान्नं दरिद्राः भुञ्जते सदा ।
क्षुत्स्वादुतां जनयति सा चाढ्येषु सुदुर्लभा ॥ ५९ ॥

संपन्नतरं स्वादुतरं मिष्टमित्यर्थः ।

प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते ।
दरिद्राणां हि राजेन्द्र त्वपि काष्ठं हि जीर्यते ॥ ६० ॥

अवृत्तिभयमन्त्यानां मध्यानां मरणाद्भयम् ।
उत्तमानां तु सत्त्वानामवमानात्परं भयम् ॥ ६१ ॥

[ १३ब ] ऐश्वर्यमदपापिष्ठाः सदा पानमदादयः ।
ऐश्वर्यमदमत्तो हि नापतित्वा विमाद्यति ॥ ६२ ॥

ऐश्वर्यमदपापिष्ठो निन्दिततरो येभ्यो मदेभ्य ऐश्वर्यमद एव पापिष्ठः पतनकारणं येषां ते । तथा

इन्द्रियैरिन्द्रियार्थेषु वर्तमानैरनिग्रहैः ।
तैरयं ताप्यते लोको नक्षत्राणि ग्रहैरिव ॥ ६३ ॥

ग्रहाक्रमणं नक्षत्रतापः स च तेषु जातानां पीडा ।

यो जितः पञ्चवर्गेण सहजेनात्महारिणा ।
आपदस्तस्य वर्धन्ते शुक्लपक्ष इवोडुराट् ॥ ६४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पञ्चवर्गेण बाह्येन्द्रियैः, सहजेन शरीरेण सहोत्पन्नेन, आत्महारिणा मनःक्षोभकारकेण ।

अविजित्य य आत्मानममात्यान्विजिगीषते ।
अमित्रान्वाजितामात्यः सोऽवशः परिहीयते ॥ ६५ ॥

आत्मानमेव प्रथमं देशरूपेण यो जयेत् ।
ततोऽमात्यानमित्रांश्च न मोघं विजिगीषते ॥ ६६ ॥

देशं देहरूपं मनः ।

वश्येन्द्रियं जितामात्यं धृतदण्डं विकारिणम् ।
परीक्ष्यकारिणं धीरमत्यन्तं श्रीर्निषेवते ॥ ६७ ॥

विकारिणं शत्रूणाम् ।

रथः शरीरं पुरुषस्य सर्वमात्मा नियन्तेन्द्रियाण्यस्य चाश्वाः ।
तैरप्रमत्तः कुशली सदाश्वैर्दान्तैः सुखं याति रथीव धीरः ॥६८॥

एतानि प्रगृहीतानि व्यापादयितुमप्यलम् ।
अयानार्हा इवादान्ता हयाः पथिषु सारथीम् ॥ ६९ ॥

अनर्थमर्थतः पश्यन्नर्थं चैवाप्यनर्थतः ।
इन्द्रियैः प्रसृतो बालः सुदुःखं मन्यते सुखम् ॥ ७० ॥

अनर्थं विषयासक्तिः, अर्थः परमार्थः ।

धर्मार्थौ यः परित्यज्य स्यादिन्द्रियवशानुगः ।
श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते ॥ ७१ ॥

अर्थानामीश्वरो यः स्यादिन्द्रियाणामनीश्वरः ।
इन्द्रियाणामनैश्वर्यादैश्वर्याद्भ्रश्यते हि सः ॥ ७२ ॥

आत्मानमात्मनान्विच्छेन्मनोबुद्धीन्द्रियैर्युतः ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ७३ ॥

क्षुद्राक्षेणेव जालेन कषावपिहितावुरु ।
[१४अ] कामश्च राजन् क्रोधश्च तौ प्रमत्तं विकुष्यतः ॥ ७४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



( यथा मत्स्यौ जालमाकृष्य गच्छतः )

समवेक्ष्येह संभारान्धर्मार्थी योऽधिगच्छति ।
स वै संभृतसंभारः सततं सुखमेधते ॥ ७५ ॥

संभारान्साधनानि ।

यः पञ्चाभ्यन्तरान्शत्रूनविजित्य मनःक्षयान् ।
जिगीषति रिपूनन्यान्रिपवोऽभिभवन्ति तम् ॥ ७६ ॥

मनःक्षयान् मत्याश्रितान् ।

दृश्यन्ते हि दुरात्मानो बध्यमानाः स्वकर्मभिः ।
इन्द्रियाणामनीशत्वाद्राजानश्चित्तविभ्रमैः ॥ ७७ ॥
असंत्यागात्पापकृतामपापां
स्तुल्योदण्डः स्पृशते मिश्रभावात् ।
शुष्केणार्द्रं दह्यते मिश्रभावा
त्तस्मात्पापैः सह संधिं न कुर्यात् ॥ ७८ ॥

दुष्टसंगत्या निर्दोषाणामपि मस्तके दण्डः पततीत्यर्थः ।

निजानुत्पततः शत्रून्पञ्चपञ्चप्रयोजनान् ।
यो मोहान्न निगृह्णाति तमापद्ग्रसते नरम् ॥ ७९ ॥
अनसूयार्जवं शौचं संतोषो नाभिमानिता ।
दम्भः सत्यमनायासो न भवन्ति दुरात्मनाम् ॥ ८० ॥
आत्मज्ञानमनायासस्तितिक्षा धर्मनित्यता ।
वाक्चैव गुप्ता दानं च नैतान्यन्त्येषु भारत ॥ ८१ ॥

वाग्गुप्ताऽवाच्यसंबन्धाद्दानं च गुप्तम् ।

आक्रोशपरिहासाभ्यां विहसन्त्यबुधा बुधम् ।
वक्ता पापमुपाधत्ते क्षममाणो विमुच्यते ॥ ८२ ॥
हिंसा बलमसाधूनां राज्ञां दण्डविधिर्बलम् ।
शुश्रूषा तु बलं स्त्रीणां ह्यबलानां क्षमा बलम् ॥ ८३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाक्संयमश्च नृपतेः सुदुष्करतमो मतः ।
अर्थवच्च विचित्रं च न शक्यं बहुभाषितुम् ॥ ८४ ॥
अभ्यावहति कल्याणं विविधं वाक्सुभाषिता ।
सैव दुर्भाषिता राजन्ननर्थायोपपद्यते ॥ ८५ ॥
कर्णिनालीकनाराचा निर्हरन्ति शरीरतः ।
वाक्शरस्तु न निर्हर्तुं शक्यो हृदिशयो हि सः ॥ ८६ ॥

नालीकान् नलिकान्तरान्निसारिणः ।

यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम् ।
बुद्धिं तस्यापकर्षन्ति सोऽर्वाचीनानि पश्यति ॥ ८७ ॥

[ १४ ब ] अर्वाचीनानि विपर्यस्तानि ।

बुद्धौ कलुषभूतायां विनाशे पर्युपस्थिते ।
अनयो नयसंकाशो हृदयान्नापसर्पति ॥ ८८ ॥
सर्वतीर्थेषु वा स्नानं सर्वभूतेषु चार्जवम् ।
उभे एते समे स्यातामार्जवं तु विशिष्यते ॥ ८९ ॥

अनृतवचने प्रह्लादं प्रति सुधन्ववाक्यम् ।

यां रात्रिमधिविन्ना स्त्री यां चैवाक्षपराजितः ।
यां च भाराभितप्ताङ्गो दुर्वियुक्ता स्म तां वसेत् ॥ ९० ॥
नगरप्रतिबद्धः सन् बहिर्द्वारे बुभुक्षितः ।
अमित्रान्भूयसान्पश्येद्दुर्वियुक्ता स्म तां वसेत ॥ ९१ ॥
न देवा यष्टिमादाय रक्षन्ति पशुपालवत् ।
यं हि रक्षितुमिच्छन्ति बुद्धया संयोजयन्ति तम् ॥ ९२ ॥
यथा यथा हि पुरुषः कल्याणे कुरुते मतिम् ।
तथा तथा हि सर्वार्थाः सिध्यन्ते नात्र संशयः ॥ ९३ ॥
न च्छन्दांसि वृजिनात्तारयन्ति मायाविनं मायया वर्तमानम् ।
नीडं तु शकुन्ता इव जातपक्षा श्छन्दांस्येनं प्रजहत्यन्तकाले ॥९४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मानाग्निहोत्रमुतमानमौनं मानेनाधीतमुत मानयज्ञः ।
एतानि चत्वार्यभयंकराणि भयं प्रयच्छन्त्ययथाकृतानि ॥ ९५ ॥

मानं कालः, अयथाकृतान्यकालकृतानि ।

तृणोल्कया ज्ञायते जातरूपं
युगे भद्रो व्यवहारे च साधुः ।
शूरोभयेष्वर्थकृच्छ्रेषु धीरः
कृच्छ्रास्वापत्सु सुहृदश्चारयश्च ॥ ९६ ॥

तृणोल्केव तृणोल्कानि कषरेखा, युगे लांगलवाहकाष्ठे, भद्रो वृक्षः ।

जरा रूपं हरति धैर्यमाशा
मृत्युः प्राणान्धर्मचर्यामसूया ।
क्रोधः श्रियं शीलमनार्यसेवा
ह्रियं कामः सर्वमेवाभिमानः ॥ ९७ ॥

श्रीर्धर्मात्प्रभवति मङ्गल्यात्संप्रवर्तते ।
दाक्ष्याच्च कुरुते मूलं संयमात्प्रतितिष्ठति ॥ ९८ ॥

दाक्ष्यं शीघ्रकारित्वं, संयमो व्यसनत्यागः, प्रतितिष्ठति प्रतिसंहृताप्यन्येन बलादायाति ।

[१५अ] अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमःशमश्च ।
पराक्रमश्च बहुभाषिता च दानं यथाशक्ति कृतज्ञता च ॥ ९९ ॥

कौल्यं कुलाचारः ।

एतान्गुणांस्तात महानुभावानेको गुणः संश्रयते प्रसह्य ।
राजा यदा सत्कुरुते मनुष्यं सर्वान्गुणानेष गुणो विभाति ॥१००॥

एष राजसत्कारः तस्माद्राजव्यवहारोऽतिविषम इत्यर्थः ।

अष्टौ नृपेमानि मनुष्यलोके स्वर्गस्य लोकस्य निदर्शनानि ।
चत्वार्येषमन्ववेतानि सद्भिश्चत्वार्येषामन्ववयन्ति सन्तः ॥ १०१ ॥

अन्ववेतानि सत्संगत्या प्राप्तानि भवन्ति दमादिचतुष्टयं तु सन्तोऽनुगच्छन्ति एतदनुसरणेन सत्त्वं भवतीत्यर्थः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इज्याध्ययनदानानि तपः सत्यं क्षमा घृणा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥ १०२ ॥

तत्र पूर्वो चतुर्वर्गो दम्भार्थमपि सेव्यते ।
उत्तरस्तु चतुर्वर्गो नामहात्मसु तिष्ठति ॥ १०३ ॥

असत्यपि सत्यादौ दम्भार्थमपि यज्ञादि सम्भवात् ।

न सा सभा यत्र न सन्ति वृद्धा
न ते वृद्धा ये न चरन्ति धर्मम् ।
नासौ धर्मो यत्र न सत्यमस्ति
न तत्सत्यं यच्छलेनाभ्युपेतम् ॥ १०४ ॥

सत्यं रूपं श्रुतं विद्या कौल्यं शीलं बलं धनम् ।
शौर्यं च चित्रभाष्यं च दशसंसर्गयोनयः ॥ १०५ ॥

रूपं शुचिविषयता, एते दशसंसर्गयोनयः एतद्युक्तैः संसर्गो विधेयः इत्यर्थः । 'स्वर्गयोनयः' इति पाठे स्वर्गागतचिह्नानि ।

पापं कुर्वन्पापकीर्तिः पापमेवाश्नुते फलम् ।
पुण्यं कुर्वन्पुण्यकीर्तिः पुण्यमेवाश्नुते फलम ॥ १०६ ॥

पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनः ।
वृद्धप्रज्ञः पुण्यमेव क्षिप्रमारभते नरः ॥ १०७ ॥

असूयको दन्दशूको निष्ठुरो वैरकृन्नरः ।
स कृच्छ्रं महदाप्नोति नचिरात्पापमाचरन् ॥ १०८ ॥

दन्दशूकोऽरुन्तुदः ।

अनसूयः कृतप्रज्ञः शोभनान्याचरन्सदा ।
अकृच्छ्रं महदाप्नोति सर्वत्र च विरोचते ॥ १०९ ॥

[ १५ ब ] अकृच्छ्रं सुखम् ।

प्रज्ञामेवागमयति प्राज्ञेभ्यो यः स पण्डितः ।
प्राज्ञो ह्यवाप्य धर्मार्थौ शक्नोति सुखमेधितुम् ॥ ११० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिवसेनैव तत्कुर्याद्येन वर्षं सुखं वसेत् ।
पूर्वे वयसि तत्कुर्याद्येन वृद्धः सुखं वसेत् ।
यावज्जीवं च तत्कुर्याद्येन प्रेत्य सुखं स्वपेत् ॥ १११ ॥

जीर्णमन्नं प्रशंसेत भार्यां च गतयौवनाम् ।
शूरं विगतसंग्राममतिपारं मनस्विनम् ॥ ११२ ॥

मनस्विनं तत्वज्ञं, अतिपारगतीतसंसारम्, अन्यथान्तर एव विघ्नसंभवात् ।

धनेनाधर्मलब्धेन यच्छिद्रमपिधीयते ।
असंवृतं तद्भवति ततोऽन्यदवदीर्यते ॥ ११३ ॥

छिद्रमधर्मरूपम्, अन्यदवदीर्यते छिन्द्रान्तरं जायते ।

गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनाम् ।
इह प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥ ११४ ॥

ऋषीणां च नदीनां च कुलानां च महात्मनाम् ।
प्रभवो नाधिगन्तव्यः स्त्रीणां दुश्चरितस्य च ॥ ११५ ॥

उत्पत्तिः प्रभवोऽनधिगन्तव्योऽधिगन्तुमशक्यः ।

द्विजातिपूजाभिरतो दाता ज्ञातिषु चार्जवी ।
क्षत्रियः स्वर्गभाग्राजंश्चिरं पालयते महीम् ॥ ११६ ॥

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥ ११७ ॥

सुवर्णमेव या पुष्यतीति सुवर्णपुष्पा ।

बुद्धिश्रेष्ठानि कर्माणि बाहुमध्यानि तानि वै ।
तानि सन्धा जघन्यानि तानि प्रत्यवराणि च ॥ ११८ ॥

बुद्धिव्यापारमात्रेण कृतानि कर्मणि श्रेष्ठानीत्यादि, सन्धा पणबंधः प्रत्यवराण्यतिनीचानि । हंसगीतायामाह विदुरः

आक्रुश्यमानं ना क्रुश्येन्मन्युरेव तितिक्षतः ।
आक्रुष्टारं निर्दहति सुकृतं चास्य विन्दति ॥ ११९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाक्रोशी स्यान्नावमानी परस्य
मित्रद्रोही नातिनीचोपसेवी ।
न चाभिमानी न च हीनवृत्तो
रूक्षां वाचं रुशतीं वर्जयेत ॥ १२० ॥

[ १६ अ ] मर्माण्यस्थीनि हृदयं तथासू-
न्घोरा वाचो निर्दहन्तीव पुंसाम् ।
तस्माद्वाचं रुशतीं तीक्ष्णरूपां
धर्मारामो नित्यशः वर्जयेत ॥ १२१ ॥

अरुन्तुदं परुषं तीक्ष्णवाचं
वाक्कण्टकैर्वितुदन्तं मनुष्यान् ।
विद्यादलक्ष्मीकतमं जनानां
मुखे निबद्धां निर्ऋतिं वहन्तम् ॥ १२२ ॥

अतिशयेनालक्ष्मीवानलक्ष्मीकतमः ।

वादं तु यत्र प्रवदेन्न वादये-
न्नातिघातः प्रतिहन्यान्न घातयेत् ।
विहन्तुकामस्य न पापमिच्छे-
त्तस्मै देवाः स्पृहयन्त्यागताय ॥ १२३ ॥

अव्याहृतं व्याहृताच्छ्रेयमाहुः
सत्यं वदेद्व्याहृतं तद् द्वितीयम् ।
प्रियं वदेद्व्याहृतं तत्तृतीयं
धर्म्यं वदेद् व्याहृतं तच्चतुर्थम् ॥ १२४ ॥

व्याहृतादविचारितसत्यासत्यभावात् ।

यादृशैः सन्निविशते यादृशं चोपसेवते ।
यादृगिच्छेच्च भवितुं तादृग्भवति पूरुषः ॥ १२५ ॥
यतो यतो निवर्तते ततस्ततो विमुच्यते ।
निवर्तनाच्च सर्वतो न वेत्ति दुःखमण्वपि ॥ १२६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न जीयते नोत जिगीषतेऽन्या-
न वैरकृच्चाप्रतिघातकश्च ।
निन्दाप्रशंसासु समस्वभावो
न शोचते हृष्यति चैव नायम् ॥ १२७ ॥

जीयते कामादिभिः ।

भावमिच्छति सर्वस्य नाभावे कुरुते मतिम् ।
सत्यवादी मृदुर्दान्तः सततं यः स पूरुषः ॥ १२८ ॥
उत्तमानेव सेवेत प्राप्ते काले तु मध्यमान् ।
अधमान्नैव सेवेत यदीच्छेच्छ्रेयमात्मनः ॥ १२९ ॥

प्राप्नोति वै वित्तमसद्बलेन
नित्योत्थानात्प्रज्ञया पौरुषेण ।
न त्वेव सम्यग्लभते प्रशंसां
न वृत्तिमाप्नोति महाकुलानाम् ॥ १३० ॥

असद्बलेन द्युतादिबलेन, प्रज्ञयार्थमात्रपरया, नित्योत्थानान्नित्योद्वेगात्, तथा च महाकुलानां वृत्तिमाचरणं, आङ् साकल्येनाप्नोति । [ १६ ब ] नीचाचारोऽसाविरयर्थः ।

पण्डितप्रसङ्गेन महाकुलान्यप्याह विदुरः ।

तपो दमो ब्रह्मवित्तं वितानाः
पुण्यो विवाहः सतां वै प्रदानम् ।
येष्वेवैते सप्तगुणा भवन्ति
सम्यग्वृत्तास्तानि महाकुलानि ॥ १३१ ॥

सम्यग्वृत्ता पुरुषा यत्रेति ।

तेषां न वृत्तं व्यथते कदाचित्-
वृत्तप्रसादेन चरन्ति धर्मम् ।
ये कीर्तिमिच्छन्ति कुले विशिष्टां
त्यक्तानृतास्तानि महाकुलानि ॥ १३२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रसादो ना मिलत्वम्[1] । अपचयेऽपि च त्यक्तानृताः ।

अनिज्यया विवाहैश्च वेदस्योत्सादनेन च ।
कुलान्यकुलतां यान्ति धर्मस्योत्सादनेन च ॥ १३३ ॥

तस्मान्न जातिः प्रधानं वृत्तमेव प्रधानमित्यर्थः ।

ब्राह्मणानां परिभवात्परिवादाच्च भारत ।
कुलान्यकुलतां यान्ति न्यासापहरणेन च ॥ १३४ ॥
कुलानि समवेतानि योन्या पुरुषतोऽन्यतः ।
कुलसंख्यां न गच्छन्ति यानि हीनानि वृत्ततः ॥ १३५ ॥

अन्यतः पुरुषतोऽन्येन पुरुषेण, योन्या विवाहादिसंबन्धेन ।

वृत्ततस्त्वविहीनानि कुलान्यल्पधनानि च ।
कुलसंख्यां च गच्छन्ति कर्षन्ति च महद्यशः ॥ १३६ ॥

कर्षन्ति प्रसारयन्ति ।

मा नः कुले वैरकृदस्तु कश्चि-
द्राजापथ्यो न परस्वापहारी ।
मित्रद्रोही नैष्कृतिकोऽनृती वा
पूर्वाशी यः पितृदेवातिथिभ्यः ॥ १३७ ॥
य श्चनो ब्राह्मणान्हन्याद्यश्च नो ब्राह्मणान्द्विषेत् ।
नरो न समितिं गच्छेद्यश्च नो निर्वपेत्क्षितिम् ॥१३८॥

यश्च क्षितिमुपवेशनार्थं न निर्वपेन्न दद्यात् स समितिं न गच्छेदसभ्योऽसावित्यर्थः ।

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥ १३९ ॥
सूक्ष्मोतिभारं नृपतेः स्यन्द[१७अ]नो वै
सोढुं शक्तो न तथान्ये महीजाः ।

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं युक्ता भारसहा भवन्ति
महाकुलीना न तथान्ये मनुष्याः ॥ १४० ॥

अत्रैव प्रसङ्गान्मित्रनिरूपणम्।

न तन्मित्रं यस्य कोपाद्बिभेति
यद्वा मित्रं शङ्कते नोपचर्य।
यस्मिन्मित्रे पितरीवाश्वसीत
तद्वै मित्रं संगतानीतराणि ॥ १४१ ॥

यस्य चेतसि संबन्धो मित्रभावावेन वर्तते।
स एव बन्धुस्तन्मित्रं सा गतिस्तत्परायणम् ॥ १४२ ॥

चलचित्तस्य वै पुंसो वृद्धाननुपसेविनः।
परिप्लवमेतन्नित्यमध्रुवो मित्रसंग्रहः ॥ १४३ ॥

चलचित्तमनात्मानमिन्द्रियाणां वशानुगम्।
अर्थाः समतिवर्तन्ते हंसाः शुष्कसरो यथा ॥ १४४ ॥

अकस्मादथ कुप्यन्ति प्रसीदन्त्यनिमित्ततः।
शीलमेततसाधूनां मन्त्रं पारिप्लवं यथा ॥ १४५ ॥

सत्कृताश्च कृतार्थाश्च मित्राणां न भवन्ति ये।
तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥ १४६ ॥

अर्थयेदेव मित्राणि सति वासति वा धने।
योऽनर्थः सन्विजानाति मित्राणां सारफल्गुताम् ॥ १४७ ॥

अनर्थो धनप्रयोजनः मित्राणां सारफल्गुतां विजानाति स सन्साधुरित्यर्थः।

संतापाद्भ्रश्यते रूपं संतापाद्भ्रश्यते बलम्।
संतापाद्भ्रश्यते ज्ञानं संतापाद्व्याधिरेधते ॥ १४८ ॥

नष्टस्य परिदेवनाभावः पाण्डित्यमित्यर्थः।

अनवाप्यं च शोकेन शरीरमुपतप्यते।
अमित्राणि प्रहृष्यन्ति मा स्म शोके मनः कृथाः ॥ १४९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यन्नष्टं तच्छोकेनानवाप्यं केवलं शरीरमुपतप्यते ।

पुनर्नरो म्रियते जायते च
पुनर्नरो वर्धते हीयते पुनः ।
पुनर्नरो याचति याच्यते च
पुनर्नरः शोचति शोच्यते च ॥ १५० ॥

सुखं च दुःखं च भयाभयौ च
लाभालाभौ मरणं जीवितं च
पर्यायशः सर्वमिह स्पृशन्ति
तस्माद्धीरो नैव शोचेन्न हृष्येत् ॥ १५१ ॥

चलानि हीमानि षडिन्द्रिया[१७ ब]णि
तेषां यद्यद्वर्धते यत्र यत्र ।
ततस्ततः स्रवते बुद्धिरस्य
छिद्रोदकुम्भादिव नित्यमम्भः ॥ १५२ ॥

अत्रैव प्रसङ्गान्मोक्षसाधननिरूपणम् ।

बुद्धया भयं प्रणुदति तपसा विन्दते महत् ।
गुरुशुश्रूषया ज्ञानं शान्तिं त्यागेन विन्दति ॥ १५३ ॥

अनाश्रिता वेदपुण्यं दानपुण्यामनाश्रिताः ।
रागद्वेषविनिर्मुक्ता विचरन्तीह मोक्षिणः ॥ १५४ ॥

स्वधीतस्य सुबुद्धस्य सुकृतस्य च कर्मणः ।
तपसश्च सुतप्तस्य तस्यान्ते सुखमेधते ॥ १५५ ॥

भवतु मोक्षसाधनान्वेषणं परमपाण्डित्यं केचिदेवात्र पात्रं व्यवहारिणे पुनः पाण्डित्यमेतत् यत्सर्वथा ज्ञातिभेदो न कर्तव्य इत्याशयेन विदुरः प्रस्तावयति।

स्वास्तीर्णानि शयनानि प्रपन्ना
न वै भिन्ना जातु निद्रां लभन्ते ।
न स्त्रीषु राजन् रतिमाप्नुवन्ति
न मागधैः स्तूयमाना न सूतैः ॥ १५६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न वै भिन्ना जातु चरन्ति धर्मं
न वै सुखं प्राप्नुवन्तीह भिन्नाः।
न वै भिन्ना गौरवं चाश्रयन्ति
न वै भिन्नाः प्रशमं रोचयन्ति ॥ १५७ ॥

न वै तेषां स्वदते पथ्यमुक्तं
योगक्षेमं कल्पते नोत तेषाम्।
भिन्नानां वै मनुजेन्द्र परायणं
न विद्यते किंचिदन्यद्विनाशनात् ॥ १५८ ॥

पथ्यं हितमुक्तं न स्वदते न रोचते।

संभाव्यं गोषु च क्षीरं संभाव्यं ब्राह्मणे तपः।
संभाव्यं स्त्रीषु चापल्यं संभाव्यं ज्ञातितो भयम् ॥ १५९ ॥

धूमायन्ते व्यपेतानि ज्वलन्ति सहितानि च।
धृतराष्ट्रोल्मुकानीव ज्ञातयो भरतर्षभ ॥ १६० ॥

तस्मात् ज्ञातिभ्यो यथोचितं स्वभागो देय एवेति तत्त्वम्। व्यपेतान्यसंहतानि, मिलिताश्च किंचिद्भेददर्शनाज्ज्वलितहृदया भवन्तीति।

ब्राह्मणेषु च ये शूराः स्त्रीषु ज्ञातिषु गोषु च।
वृक्षादिव फलं पक्वं धृतराष्ट्र पतन्ति ते ॥ १६१ ॥

न जातु बल्यहमित्येक[1] एव सुखं [ १८ अ ] चरामि किं ज्ञातिभिरिति मन्तव्यं यतः —

महानप्येकजो वृक्षो बलवान्सुप्रतिष्ठितः।
प्रसह्य एव वातेन शाखास्कन्धान्विमर्दितुम् ॥ १६२ ॥

अथ ये सहिता वृक्षाः संघशः सुप्रतिष्ठिताः।
तेऽपि शीघ्रतमान्वातान्सहन्तेऽन्योन्यसंश्रयात् ॥ १६३ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवध्या ब्राह्मणा गावो स्त्रियो बालाश्च ज्ञातयः ।
येषामन्नानि भुञ्जीत ये च स्युः शरणागताः ॥ १६४ ॥

न मनुष्यगुणः कश्चिदन्यो धनवतामपि ।
अनातुरत्वाद्भद्रं ते मृतकल्पा हि रोगिणः ॥ १६५ ॥

अनातुरत्वादिति ल्यब्लोपे पञ्चमी । अनातुरत्वमासाद्यापि धनवन्तो मृतकल्पा रोगिणः इति ।

अथ प्रसङ्गेन सद्भृत्यलक्षणान्याह विदुरः

सुलभाः पुरुषा राजन्सततं प्रियवादिनः ।
अप्रियस्य तु तथ्यस्य वक्ता श्रोता च दुर्लभः ॥ १६६ ॥

यो हि धर्मं व्यपाश्रित्य भर्तुर्हित्वा प्रियाप्रिये ।
अप्रियाण्याह पथ्यानि तेन राजा सहायवान् ॥ १६७ ॥

त्यजेत्कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे स्वात्मार्थे पृथिवीं त्यजेत् ॥ १६८ ॥

आपदर्थं धनं रक्ष्यं दारा रक्ष्या धनैरपि ।
आत्मा तु सर्वतो रक्ष्यो दारैरपि धनैरपि ॥ १६९ ॥

**इति पण्डितलक्षणे संकीर्णगुणकथने आर्थिकपण्डितलक्षणं नाम नवमं कुसुमम् ।**

---

## [ १० ]

बलादेव जितक्रोधो न दुःखस्यास्पदं भवेत् ।
कृतप्रज्ञश्च विपदा जातुचिन्नैव बाध्यते ॥ १ ॥

तिरश्चामपि हि प्रज्ञा हिताय न पराक्रमः ।
यत्कार्यस्य न योऽभिज्ञः स तत्कुर्वन्विनश्यति ॥ २ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हितः परोऽपि स्वीकार्ये हेयः स्वोऽप्यहितः परम्।
क्रीतान्यतोऽपि मार्जारो मूल्येन पोष्यते हितः।
अहितो हन्यते यत्नाद्गृहजातोऽपि मूषकः ॥ ३ ॥
[१८ब] श्रोतव्यं च हितैषिभ्यो भृत्येभ्यो भूतिमिच्छता।
अपृष्टैरपि कर्तव्यं तैश्च काले हितं प्रभोः ॥ ४ ॥
जलेन भज्यते सेतुः स्नेहः कर्णजपेन च।
अरक्षणेन मन्त्रश्च शङ्कमात्रेण कातरः ॥ ५ ॥
परमार्थमविज्ञाय न भेतव्यं कदाचन।
प्रज्ञैषा सम्यगालोच्य भयस्थानमिति स्थितिः ॥ ६ ॥
तथा हि क्रोष्टा भक्ष्यार्थी भ्रमन्दूरान्मृधावनौ।
गभीरमेकतः श्रुत्वा श्रुतपूर्वं ध्वनिं द्रुतम् ॥ ७ ॥
भीतः पलाय्य संभ्रान्तोऽवस्थाप्यासूंस्ततः शनैः।
आगत्यात्रानकं दृष्ट्वा शङ्कयन्तं भ्रमं गतः ॥ ८ ॥
प्राणी कोऽपीति संस्थाप्य धृतिं पुनरसौ पुरः।
गत्वा पवनसंगच्छद्वृक्षशाखाप्रघट्टनात् ॥ ९ ॥
शब्दं निश्चित्य भक्ष्यार्थी तमुत्पाट्य यदाविना।
न लेभे चर्मदारुभ्यामभीतः सोऽन्यतो ययौ ॥ १० ॥
अवधाय ततो बुद्धिं सत्यासत्यनिरूपणम्।
विधाय कार्यमारभ्य नास्थाने भयमावहेत् ॥ ११ ॥

इति सर्वार्थपरिज्ञाने भयनिरूपणाभिधं कुसमम्।

---

[ ११ ]

किं तद्यन्न स शक्नोति बुद्धिर्नापदि सीदति।
प्रज्ञानं प्रबलं तस्मान्निष्प्रज्ञस्य बलेन किम् ॥ १ ॥
तथा च मत्स्यमकराः सरस्यासान्पुरा किल।
बकोऽप्येकोऽवसत्तत्र यद्वशास्ते भयाद्ययुः ॥ २ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दूरादलब्धमत्स्योऽसौ दुःखार्तोऽचिंतयत्कथम् ।
भक्ष्या मयैत इत्येवं नीतिचंचुर्विमृष्य सः ॥ ३ ॥
कदाचित्स्वयमुत्प्लुत्याभिनीय त्रासमात्मनः ।
जालिकोऽत्र समायात इत्याश्वस्तान्विधाय तान् ॥ ४ ॥
स्वच्छेत्यस्मिन्सरस्येतान्नये मा भीतिरस्तु वः ।
इत्युक्त्वैवैकमेकं च नीत्वा तत्र शिलातले ॥ ५ ॥
विन्यस्याद् बहून्मत्स्यान्बकोऽसौ वञ्चनापरः ।
ज्ञात्वेनं मकरो दृष्ट्वा तथा यान्तं क्व यास्यसि ॥ ६ ॥
क्व चैतान्नयसीत्येवं पृष्टोऽवादीत्तथैव तम् ।
त्रस्तोऽसौ नय मां चेति वदन्तं तमसौ द्रुतम् ॥ ७ ॥
उत्प्लुत्य प्रापयामास तत्रैव च शिलातले ।
[१९ अ] दृष्ट्वा तु मत्स्यखण्डानीतस्ततो धियमागतः ॥ ८ ॥
विश्वासघात्ययं नूनमस्तु किं दुष्करं धियाम् ।
तच्छिलातलमाप्त्वैव बलादुत्क्रम्य तच्छिरः ।
जग्रसे भेत्य मत्स्येभ्य साधुकारमवाप[1] सः ॥ ९ ॥

इति बलप्रज्ञयोः प्रज्ञैव बलीयसीति कथनं नाम कुसुमम् ।

---

## [ १२ ]

प्राज्ञोऽसौ यो न संमोहं विपत्कालेऽपि गच्छति ।
श्रुतं मृत्यौ शिरःप्राप्ते स्वं रक्षन्ति महाधियः ॥ १ ॥
हरिरासीद्वने सत्त्ववित्रासितपशुर्भृशम् ।
यो बलात्समुपादाय[1] सत्वराशीं च खादह ॥ २ ॥
समेत्य तेऽस्यचैकैकं[1] देयं चक्रुर्दिने दिने ।
प्राप्तायां शशवेलायां विचचार शशस्त्वासौ ॥ ३ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विचचार विचारं कृतवान् ।

विलम्ब्य किंचिदाप्तं तं किं वेलातिक्रमस्त्वया ।
कुतो वधाधिकं तेऽद्य किंचाद्य क्रियते मया ॥ ४ ॥

निशम्य प्रह्वो भूत्वाह मेऽपराधो न कश्चन ।
मार्गेऽन्यहरिणा रुद्धो बलात्तस्माद्विनिर्गतः ॥ ५ ॥

श्रुत्वा कुत्रास्त्यसौ हत्वा तमेवादौ ततोऽमया ।
कार्या भुजि द्रुतं तं मे दर्शयेत्याह तं शशः ॥ ६ ॥

आशात्रुशंकामनिरस्य राज्ञां
किं भोजनं का मुदयो रतिर्वा ।
विधाय भद्रं द्रुतमेव राज
न्नुतिष्ठ हत्वा........तोद्धि मां[1] च ॥ ७ ॥

नीत्वा कूपे दर्शयित्वा स्वामेव प्रतियातनाम् ।
पश्योन्मुखः समायातो हरिरुश्वसटोद्धतः ॥ ८ ॥

मत्वा तथैव क्रोधोर्ध्वगर्जितानुकृतिं तथा ।
निशम्य तत्र स्वमसौ चिक्षेप बलमूढधीः ॥ ९ ॥

एवं प्रज्ञैव परमं बलं न तु पराक्रमः ।
यथा यशोऽसावपरेष्यासन्स्वस्था मृतोऽल्पधीः ॥ १० ॥

**इति प्रज्ञापराक्रमयोः प्रज्ञाबलाभिधं कुसुमम् ।**

---

## [ १३ ]

ओं न विधेयः समो राज्ञा यथा श्रीरपयास्यति ।
द्वयोर्दत्तपदा सा च तयोरुच्छ्रितयोश्चला ।
न शक्नोति चिरं स्थातुं ध्रुवमेकं विमुञ्चति ॥ १ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[१९ ब] प्रभुश्च यो हितं द्वेष्टि सेवते चाहितं सदा ।
स वर्जनीयो विद्वद्भिर्वैद्यैर्दुष्टातुरो यथा ॥ २ ॥

अप्रियस्य प्रथमतः परिणामे हितस्य च ।
वक्ता श्रोता च यत्र स्यात्तत्र श्रीः कुरुते पदम् ॥ ३ ॥

न शृणोति सतां मन्त्रमसतां च शृणोति यः ।
अचिरेण समं प्राप्य विपदं परितप्यते ॥ ४ ॥

दुष्टः करोतु स्वं दोषं मनीषी मा करोतु तम् ।
संगादसौ समायाति दुष्टसंगं त्यजेत तत् ॥ ५ ॥

तथा वेनस्य[1] कस्यापि यूका शय्यान्तराश्रया ।
चिरं जिजीव जात्वेको दंशस्तत्राप वायुना ॥ ६ ॥

सा विलोक्यैव तं प्राह मास्स्व कालं क्षिपाम्यहम् ।
एका मन्दचरीमां मा निराशां कुरु तीक्ष्णहन् ॥ ७ ॥

तयैवं प्रार्थितोऽप्येष नम्रो भूत्वाथ तां यदा ।
ययाचे समयावृत्या तव जीवामि मा भयम् ॥ ८ ॥

स्वस्था तं साह भूयोऽपि किं त्वैष लघुसर्गवान् ।
सुप्तो रतिप्रसक्तो वा प्रदंश्योऽसौ जातु नान्यदा ॥ ९ ॥

इत्थं पणे कृते सुप्तं तमसौ यावदेव तु ।
ददंश तावदेवासौ दष्टोऽस्मीति बुबोध ह ॥ १० ॥

द्रुतं भृत्येषु सज्जेषु दंशोऽस्मिन्शीघ्रमुत्प्लुते ।
यूका मन्दचरी लब्धा मारिताभूत्क्षणादसौ ॥ ११ ॥

तस्मात्स्वो रक्षणीयोऽलं दुष्टसंगान्मनीषिभिः ।
न जातु दुष्टसंगोऽसौ विनानर्थं प्रशाम्यति ॥ १२ ॥

**इति दुष्टसंगतित्यागकथनं नाम कुसुमम् ।**

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[१४]

न सेवेत नृपं जातु यः स्यात्क्षुद्रपरिच्छदः ।
अवश्यं वैरितामेति निष्कारणमसौ किल ॥ १ ॥
गृध्रोऽपि हि वरं राजा सेव्यो हंसपरिच्छदः ।
न गृध्रपरिवारस्तु हंसोऽपि किमुतापरः ॥ २ ॥
आसीद्वनान्तरे क्वापि सिंहो मदकलाभिधः ।
त्रयोऽस्यानुचराश्चासन्द्विपीवायसजम्बुकाः ॥ ३ ॥
स जातु करभं यूथभ्रष्टं दृष्ट्वाह कोऽस्त्यसौ ।
देशचार्याह काकोऽमूमुष्ट्रः श्रुतचरः प्रभो ।
दत्त्वाभयं तमानीयानुगं चक्रे स कौतुकात् ॥ ४ ॥
[२० अ] एकदा गजयुद्धेन श्रान्तोऽसौ व्रणितो वने ।
अनाप्य भक्ष्यं किं कार्यं इति मौलान्रहोऽवदत् ॥ ५ ॥
आपद्येषोष्ट्र एवासौ वध्योऽद्य न कथंचन ।
विचिकित्साऽत्र तृणभुग्भक्ष्यो मांसभुजां हि नः ॥ ६ ॥
अनेन स्वमुखेनाद्य स्वीकृते भक्षणे च नः ।
अभीतिदानशङ्कात्र न कश्चिद्दूषणायते ॥ ७ ॥
इत्याकलय्य ते राज्ञा निर्गत्यैनं रहोऽवदन् ।
अहो क्षुधार्तो राजासौ नाह किंचन किं भवेत् ॥ ८ ॥
तत्कायं भक्षणायास्य-द-स्तमपितत्कुरु[1] ।
स्वामिप्रीतिर्बुधैरर्ज्या सर्वथेति सतां मतम् ॥ ९ ॥
इत्थं प्रतार्य तेऽत्र स्वामिनं समुपाययुः ।
तत्र काकोऽब्रवीद्राजन्निघ्नं मामद्धि साम्प्रतम् ॥ १० ॥

साम्प्रतम् युक्तमेतदिति ।

का तृप्तिर्मे द्वये त्यक्ते भुंक्ष्व मेति शिवावदत् ।
तथा निवार्य तं चापि द्वीपी मेति तमाह च ॥ ११ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स जातिरिति तं चापि करभः प्राह मामिति ।
तेनैव वाक्छलेनाशु हतोऽसौ खण्डशः कृतः ॥ १२ ॥
भुक्तस्तैरिति निश्चित्य विचार्या राजगोष्ठिका ।
गोष्ठीं शुद्धां समालोक्य विधेयो राजसंस्तवः ॥
नान्यथेति महीपालचरितं विषमं महत् ॥ १३ ॥

इति क्षुद्रपरिवारराजपरिवर्जनाभिधं कुसुमम् ।

[ १५ ]

महापदं समारोढुमशक्तो नोत्कचेतसा ।
हितोपदेशोऽनुष्ठेयो विनाशः परथाप्यते ॥ १ ॥
तथा च कूर्मः सरसि काप्यासीन्मैत्रसंगतौ ।
हंसौ खचारिणौ यस्य सतावाह कदाचन ॥ २ ॥
केतो भवन्तौ दूरेऽस्ति सरोऽतिविततं महत् ।
विहर्तुं तत्र गच्छावो यद्युत्कै[1] हि त्वमत्र भोः ॥ ३ ॥
निशम्य कथमेमीति तौ तु सूचतुरादरात् ।
मुखेनामूं समादाय यष्टिमायाहि मा शुचः ॥ ४ ॥
यष्टावस्यामुपात्तायां[1] दध्यस्तां[1] किं तु केवलम् ।
त्वया किंचिन्न वक्तव्यमाप्राप्ते मित्रवान्तरे ॥ ५ ॥
तथेति तत्तथा कृत्वा दिव्यमार्गेण ते ययुः ।
त[ २०ब ]दन्तिकमथासाद्य तत्रत्यजनवाग्भरैः ।
किं प्राप्तं इति तौ पृष्ट्वा पतञ्जर्जरतां ययौ ॥ ६ ॥
परोपदेशस्तज्जातु न हातव्योऽल्पशक्तिभिः ।
बुद्धिच्युतो विनश्येत कूर्मो यष्टिच्युतो यथा ॥ ७ ॥

अल्पशक्तिना परोपदेशो न हेय इति कथनं नाम कुसुमम् ।

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ १६ ]

हितं तस्य न वक्तव्यं यो न मन्येत मन्दधीः ।
वदन्दोषं लभेत्तस्मात्कपेः सूचीमुखो यथा ॥ १ ॥
यूथगाः कपयः क्वापि वने शीतसमाकुले ।
खद्योतमग्निं मत्वा ते तृणं क्षिप्त्वात्र तेपिरे ॥ २ ॥
तत्रैकोऽप्यधमत्तं च दृष्ट्वा सूचीमुखः खगः ।
स खद्योतो न चैषोऽग्निरित्याह प्रहसंश्च तम् ॥ ३ ॥
प्रहासकुपितोऽसौ तं जघान महताश्मना ।
तस्मान्नोपदिशेत्तं विद्यामूढो नानुमन्यते ॥ ४ ॥

**मूर्खोपदेशोऽनर्थकृदिति वर्णनं कुसुमम् ।**

---

[ १७ ]

दुष्टया क्रियते बुद्ध्या यत्तत्र न शुभं भवेत् ।
सर्वथा जायते गर्हा पथे यवसमर्पणात् ॥ १ ॥
आस्तां वणिग्सुतौ किंचिद्गृहीत्वा दूरमीयतुः ।
तत्राभ्यामर्जितं स्वर्णसहस्रद्वयमन्ततः ॥ २ ॥

अन्ततः इति परिसमाप्येत्यर्थः ।

आवृत्य शतमेकं तु विभज्य पथिशेषकम् ।
वृक्षमूले निधायैतौ तस्याने पितृवेश्मनि ॥ ३ ॥
जातु छिद्रमतिर्गत्वा तत्रैकोऽखिलमेव तत् ।
आदायाशंकित इव सख्यं तेन ररक्ष तत् ॥ ४ ॥
अथ काले व्ययव्याजाद्गच्छावोऽत्रेत्यसौ यदा ।
नाप किंचित्तदा नीतं त्वयेत्युक्त्वाह तं पुनः ॥ ५ ॥
अस्त्वर्धं ( अस्यार्धं ) दीयतां मह्यमिति कोलाहलेऽश्मना ।
संताड्यर्जुधिमं[1] राजकुलं भूयो निनाय तम् ॥ ६ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्राधिकारिपुरुषैर्यदा नाप्तं च किंचन ।
तदा दिनान्ते निर्वेशप्रतिभाष्येन मोचितौ ॥ ७ ॥
अन्येद्युरेव इत्याह च्छिद्रधीर्यत्र संहितम् ।
स वृक्षो धर्मसाक्ष्यं मे वक्तीति प्राह धैर्यभाक् ॥ ८ ॥
पित्रे समर्प्य तद्वित्तं तत्र गत्वा त्वया[२१ अ]रहः ।
कोटरस्थेन साक्ष्यं वां वाच्यं चेति विनिश्चितः ॥ ९ ॥
अथात्र राजपुरुषैः गत्वा निर्णयकारणात् ।
पृष्टो वृक्षः समाचख्यौ छिद्रधीः सत्यवागिति ॥ १० ॥
अभूतपूर्वं साक्ष्यं ते श्रुत्वा विस्मयमागताः ।
तरोर्गर्भे ददुर्धूमं येनासौ निर्गतः क्षणात् ॥ ११ ॥
निपत्याधः पतित्वा च मृते तस्मिन्राजपूरुषाः ।
दापयित्वार्धमेतस्मा अर्धं स्वीचक्रुरन्ततः ॥ १२ ॥
तमंकयित्वा नगराद्बहिर्निष्कास्य दूषितम् ।
स्वमतिस्त्रपरो राजकृते संस्थापितोऽप्यभूत् । १३ ॥

**इति दुष्टबुद्धिसुबुद्धिफलकथनं नाम कुसुमम् ।**

---

## [ १८ ]

अशक्तावात्मना सध्यं कार्यमन्येन धीधनैः ।
तथा च श्रूयतां कारु(?)कथेयं[1] सर्पगोचरा ॥ १ ॥
सर्पो बकस्य कस्यापि पुत्रानादादनित्यशः ।
उद्विग्नोऽसौ रुषा देशादभितो नकुलालयं ॥ २ ॥
मीनखण्डान्युत्क्षिप्य सर्पनीडाद्यथा द्रुतम् ।
ददंश पदवीं लब्ध्वा नकुलस्तं सपुत्रकम् ॥ ३ ॥

**इति स्वयमशक्तावन्याश्रयकथनं कुसुमम् ।**

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ १९ ]

असाध्यं साधयन्त्येव मतिमन्तो मनीषिणः।
उपायेन तथा चात्र वणिक्पुत्रकथोच्यते ॥ १ ॥
अभूत्कोऽपि वणिक्पुत्रो दैवादेकतुलः किल।
पित्रार्थात्स तुलां न्यस्य कस्यचिद्वणिजो गृहे।
देशान्तराण्यतीत्याथ प्राप्तस्तस्मादयाचत ॥ २ ॥
तुलां जग्धाखुनेत्यस्मै स प्राहामित्यसौ च तम्।
असौ तुलानिक्षेपकस्तं तुलानिह्नविनम् ॥ ३ ॥
( आमित्याह एवमेतदाखुनासौ भक्षिता भवेदिति। )
देशांतरागतायाथ देहि मे भोजनं सखे।
इत्यस्मै याचमानाय स्वीचक्रे भुज्यतामिति ॥ ४ ॥
स्नानार्थं मितस्तावन्मे मार्गः को दृश्यतामिति।
उक्त्वाऽमुं च प्रदर्श्यासौ तत्पुत्रं मार्गदर्शकम् ॥ ५ ॥
कृत्वा मार्गे गृहे न्यस्य स्वस्य स्नात्वागतोऽग्रतः।
ययाचे भोजनं भुंक्ष्व [ २१ ब ] यथेच्छं चेति सोऽब्रवीत् ॥ ६ ॥
उपस्थिते तत्र क्वासौ मे पुत्र इत्यभिभाषिणं।
तमसौ मार्ग आकृष्य श्येनोऽगाद्विमुद्गतः ॥ ७ ॥
इत्युक्त्वा भोजनं देहीत्युवाच पुनरेव सः।
निशम्य चान्तर्दग्धोऽसौ विक्रुश्य वह[1]पुत्रकम्।
न्यायशालां द्रुतं गत्वा नीनयदेवमग्रतः ॥ ८ ॥
पुत्रोऽस्य क्वेति पृष्टोऽसौ तथोवाच हसन्निव।
किमिदं मदिरामत्त इव वक्षि नृपास्पदे।
सत्यं श्येनः कथं तत्र नार्भकं नयते बलम् ॥ ९ ॥
यत्र देशे तुला लौही सहस्रपलसंमिता।
आखुना भक्षिता तत्र मन्ये श्येनो द्विपं नयेत् ॥ १० ॥

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निशम्य तत्तथा तस्य वचनं तेऽतिविस्मिताः ।
पृष्टवृत्ता विहस्यैव तुलामस्यै समर्पयन् ॥ ११ ॥
पुत्रं च तस्मादित्येवं सुसाध्यं साधयन्ति ये ।
बुद्ध्या ते श्लाध्यतां यान्ति नाप्नुवन्ति पराभवम् ॥ १२ ॥

इति बुद्धिविलासाभिधं कुसुमम् ।

[ २० ]

दृश्यते सर्वदा बुद्धेः प्राधान्यं जितपौरुषम् ।
बुद्धिसाध्येषु कार्येषु किं विदध्यात्पराक्रमः ॥ १ ॥
बुद्धिर्नाम च सर्वत्र मुख्यं मित्रं न पौरुषम् ।
तथा च पुर्यां श्रावस्त्यां प्राप्तोऽपूर्वो द्विजः किल ॥ २ ॥
गुणीति वणिजा शूद्रपक्वाभोजी द्विजालये ।
स्थापितो मानपक्वान्नदक्षिणादिभिरर्चितः ॥ ३ ॥
एवं वसन्तं तं तत्र परेष्यानर्चुरादरात् ।
यथास्य स्वर्णदीनारसहस्रमभवद्वित्तम्[1] ॥ ४ ॥
स जात्वटव्यां तत्क्षिप्त्वा खाते प्रत्यहमैक्षत ।
एकदैक्षत खातं तद्व्यातं[1] तत्रैत्यतो धनम् ॥ ५ ॥
विलपन्हेति चागत्य पृष्टोऽस्मै गृहपालिना ।
आख्यायासून्विहातुं चोद्यतो मूर्च्छितोऽपि सन् ॥ ६ ॥
अकाले मेघवद्वित्तमकस्मादेति याति च ।
मामेत्याचाश्वासितोऽत्यर्थं न निवृत्तोसतोग्रहात्[1] ॥ ७ ॥
प्राणेभ्योऽप्यर्थमात्राहि कृपणस्य गरीयसी ।
ततोऽपि मर्तुं तीर्थान्ते यतो यस्यातिकमा[२२ अ]ययौ[1] ॥ ८ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तद्देशेनोऽपि वृत्तान्तं सम्यग्जातुं प्रसेनजित् ।
( यत इति गच्छतः तद्देशनस्तद्देशराजा । )
पृष्ट्वा श्रुत्वा च तद्वृत्तं किंचित्तत्रोपलक्षणम् ॥ ९ ॥
अस्तीति तमसौ राजा पप्रछ तीव्रधीः ।
तच्छ्रुत्वासौ द्विजोऽवादीदस्ति क्षुद्रोऽत्र पादपः ॥
तत्तले निहितं द्रव्यं हृतं केनाप्यभून्मम ॥ १० ॥
मासूंस्त्यज धनं स्वं तेऽलब्धं दास्येऽथ कोशतः ।
गच्छ विप्रालयं मा ते व्यथास्त्विति निगद्य तम् ॥ ११ ॥
( अथ चेन्नाहं लप्स्ये तदा स्वकोशाद्दास्ये इति । )
गृहमेत्य शिरः पीडालक्ष्याद्वैद्यांश्च सोऽचिनोत् ।
प्रसंगेन च तान्राजा पप्रच्छात्र पुरे मम ॥ १२ ॥
कियन्तो रोगिणः कस्य किं दत्तं इति ब्रुतु माम् ।
तन्मध्यादाह चैकोऽस्मै राजन्नागबला मया ॥ १३ ॥
वणिजो मातृदत्ताया स्वस्थायादेशितेत्यलम् ।
अलमिति पर्याप्तमभूद्राजा तत्प्रश्नादुपरतोऽभूदित्यर्थः ।
गतेषु तेषु वणिजमानीयासौ रहो द्रुतम् ॥ १४ ॥
श्रुतं तं नागवल्ल्या स्वस्थो भूः केन सा च ते ।
दत्तेति ब्रूहि भीतोऽसौ प्राह कर्मकरं निजम् ॥ १५ ॥
तमाहूयाह किं नागबला दत्ता त्वयेत्यसौ ।
दत्तेति स्वीकृतौ स्वर्णसहस्रं क्वेति चाब्रवीत् ॥ १६ ॥
इत्युक्तो भूभृताङ्कितः प्रतिपद्यैव तत्क्षणम् ।
स तानानीय दीनारांस्तत्र कर्मकरो जहौ ॥ १७ ॥
राजाप्युपोषितायास्मै द्विजायाहूय तान्ददौ ।
दीनारान्हारितप्राप्तान्प्राणानिव बहिश्चरान् ॥ १८ ॥
एवं स लब्धवान्बुद्धया नीतं मूलतलात्तरोः ।
द्विजार्थं भूपतिर्जानन्नोषधिं तां तदुद्भवान् ॥ १९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं नु बुद्धिमतां गुप्तं धीः किं नाम न साधयेत् ।
धिया विचरतां राज्ञां स्वपरार्थः शयेस्थितः ॥ २० ॥

इति राजचरित्रे बुद्धिवर्णनं कुसुमम् ।

---

[ २१ ]

तथा च केनचिन्मैत्र्या कस्मिंश्चिन्निहितं धनम् ।
गते कालेऽथ सांकव्यात्किंचिन्मात्रार्थिमागतः ॥ १ ॥

भक्तपीतादनु[ २२ब ]रहः संकटं पर्युपस्थितम् ।
मम किंचिन्मितं तस्मादेहीत्याह स तं पुनः ॥ २ ॥

निशम्य मित्रवचनं हसन्किं वेलयाऽनया ।
धर्मोधीश्वगतावानुभूतावेशोस्ति तेऽधिकः ॥ ३ ॥

अनया वेलया तव धर्मोधीश्वगता वा तथा अनु एतदनंतरं भूतावेशोऽ
तेऽधिको जातो भवतीति ।

सौहार्दं भूतपूर्वं ते स्मृत्वाऽत्र साधु सत्कृतम् ।
दत्तं हा हा कथं बुद्धिर्व्यस्ता ते वद साम्प्रतम् ॥ ४ ॥

किं तत्क केन कस्येति मा धर्मं जहि मा च मे ।
हत्यां गृहाण किंवाद्य दुर्गतस्य सुदुष्करम् ॥ ५ ॥

निशम्य मित्रवृत्तं तद्भीतोन्तः प्रहसन्निव ।
प्राहासौ वच्मि किं साधो यथेच्छं वर्ततामिति ॥ ६ ॥

अस्तु दैवहतस्यात्र मम भ्रान्तिरियं खलु ।
तथापि भवता शङ्का शोध्या मे नूनमेवहि ॥ ७ ॥

पुत्रा दारास्तथागारदेवताः संत्यतोऽधिकं ।
यद्यत्ते भाति तेनापि पणिष्ये मा शुचः सुहृत् ॥ ८ ॥

उद्देशमात्राद्विहितमस्त्वेतदिति लज्जितः ।
गच्छामीति तमामन्त्र्य दहन्निव स निर्ययौ ॥ ९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धिङ्मां दैवहतं किं नु राजाप्यधिकरिष्यति ।
यस्य मे लिखितं किंचिन्नैव नापि च साक्षिता ॥ १० ॥
रहस्येकेन यद्वृत्तं शून्ये किं नाम तत्र मे ।
बलं सत्यापनायालं तथापि खलु साधये ॥ ११ ॥
मास्तु दृष्टं बलं किंचिददृष्टबलतो मया ।
राजा वेद्योऽत्र चास्तीह कला दिक्पालगा यतः ॥ १२ ।

इह राज्ञि दिक्पालगा कला दिक्पालांशः ।

ते द्रष्टा अपि सर्वत्र साक्षिणश्चेति शासनात् ।
राजावध्योक्तिमाश्राव्यश्चास्तु वा मास्तु वा फलं ॥ १३ ॥
इति निश्चयमासाद्य राजान्तिकमुपेत्य सः ।
हतोऽस्मीति समाक्रुश्य राजानं समबोधयत् ॥ १४ ॥
गत्वाग्रतः स्ववृत्तं तन्निवेद्यैवशुचार्दितः[1] ।
दत्तावकाश एकान्ते प्रतीक्षामास तं पुनः ॥ १५ ॥
आगतोऽसौ क्षणादेव पृष्टोऽवादीदहो मम ।
सौहार्दफलमेतेन दर्शितं धिग्विधिं[ २३अ]च माम् ॥ १६ ॥
भक्तपीतमिदं मित्र यदि मेऽनर्थदं भवेत् ।
शंकेऽद्यारभ्य सकला सत्क्रियान्तर्धिमेष्यति[1] ॥ १७ ॥
ततोऽपि दण्डभीत्यादि दर्शने व्यर्थतां गते ।
राजा वादिनमाहैनं नाणमात्रमपीह ते ॥ १८ ॥
निदर्शनं न नेत्याह सोऽपि तस्मै विशुद्धधीः ।
खिले यत्रार्पितं द्रव्यं तत्र किंचित्स्थलादिकम् ॥ १९ ॥
अस्ति नो दायिनेत्याह स पृष्टोऽपि पुनः पुनः ।
स्मर्यतां च तथाप्यत्र मास्ति किंचित्क थैं[1] न । २० ॥
इति निर्बन्धतः पृष्टः स चाहैनं महीपतिं ।
आ स्मृतं दक्षिणे पार्श्वे क्षुपस्तत्रास्ति चोत्थितः ॥ २१ ॥

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न किंचिदन्यदिक्पालसंनिधानं विना प्रभो ।
ततः क्षेपं तयोर्दत्वा किंचित्कालं पुनः पुनः ॥ २२ ॥
आनीय शपथै राजा शोधयामास तं पुरा ।
प्रहृप्रस्तं तमालोच्य वादिनं प्राह मा शुचः ॥ २३ ॥
गच्छ तत्र क्षुपश्चासौ साक्ष्यं दातेति निश्चयः ।
मद्भृत्यांस्त्वं समादाय क्षुपं पृच्छैतदग्रतः ॥ २४ ॥
चेद्वादः सत्यतोऽमी त्वां समाश्वास्यन्ति निश्चितम् ।
निशम्योन्मत्तवद्वाक्यं किंचिच्छिथिलिताशयः ॥ २५ ॥
महर्द्धिवाक्यं[1] मन्वानो दीनस्तैस्तत्र सोऽप्यगात् ।
प्रेरितो वचनं दत्त्वाप्यलब्ध्वा किंचिदप्यसौ ॥ २६ ॥
विमना लज्जितो भूत्वा जगाम सममेव तैः ।
अत्रान्तरे गते तस्मिन्राजाऽऽह प्रतिवादिनम् ॥ २७ ॥
वेलान्तरेऽप्रगं ब्रूहि किं तत्रासौ भवेदसौ ।
नेति दैवबलात्तेन गदिते लब्धलक्ष्यपि ॥ २८ ॥
राजावहित्था[1] चतुरश्चक्रे व्यापारमन्यतः ।
आगत्यासौ पुनः पृष्टः साक्ष्यमाप्तं त्वया न किम् ॥ २९ ॥
येन दीनतरश्चासि नेत्याह स्म स लज्जितः ।
सत्यं न दत्तं ते साक्ष्यं क्षुपेणानेन ततश्च नः ॥ ३० ॥
दत्तं भद्र विशुद्धोऽसि द्रव्यं मत्तो गृहाण तत् ।
इत्याश्वास्य तमुत्थाय रहो गत्वाह तं परम् ॥ ३१ ॥
आनाय्य देहि द्रव्यं तत्परथा हस्तनासिके ।[2]
प्राप्तोस्यनुमतिं नो वा व्यंजयेनु[1] मतिं तव ॥ ३२ ॥
परंतु व्यंजने पौरघोषणां केन ते भवेत् ।
[२३ ब ]स्वेच्छा प्रमाणमत्रार्थे यथेच्छसि तथा कुरु ॥ ३३ ॥

---

1 Corrupt.

2 [ Here the ms. adds in the margin हस्तनासिके प्राप्तोऽसीति त्वं हस्तनासिके प्राप्तोऽसि एनदुभयं छिन्नद्मीति हस्तनासिके समाहारे द्वन्द्वैकत्वम् । ]

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति श्रुत्वास्य तेऽमात्यपुरोगामिष्वितस्ततः ।
इत्तदक्षु[1] ददामीति स्वयं सोऽनुमतिं गतः ॥ ३४ ॥
इति लेख्यादिराहिते चापि वादे मनीषिणः ।
निर्णयं यान्ति किं वाच्यं तत्र लेख्यादिसन्निधौ ॥ ३५ ॥

**इति राजबुद्धिसूक्ष्मताकथनं नाम कुसुमम् ।**

---

## [ २२ ]

किं याचितं विजानन्ति यद्धीमन्तो नरान्तरम् ।
तिर्यक्ष्वपि गतो भावो धीमतां नास्ति दुर्घटः ॥ १ ॥
तथा च शबिरेकस्मिंश्चिद्वाम्यौ द्वे समाकृती ।
स संसुषवतुस्तत्रैकस्याः कतिपयैर्दिनैः ॥ २ ॥
सूतिर्विनष्टेत्यस्याः[1] सा संगत्या तामिमामपि ।
पपौ भेदमविदुषी ते चामूमावतुः समम् ॥ ३ ॥

ते वाम्यौ अमूं प्रसूतिं किशोरमित्यर्थः । आवतू ररक्षतुः, समं निर्विशेषम् ।

जात्वेकस्यां च यातायां तामेवानुययौ च सा ।
न किंचिद्विदे भेदं द्वयोर्जातेव साभवत् ॥ ४ ॥
अथ कालान्तरेणाथौ तयोर्विमतिमागतौ ।
ममेयं ममचैवेयमित्यन्योन्यं विचक्रतुः ॥ ५ ॥

विचक्रतुः विवादं चक्रतुः ।

परीक्षकैः परीक्षायां विहितायामथाप्यसौ ।
निर्विशेषोर्द्वयोर्भूत्वा न सन्देहो न्यवर्तत ॥ ६ ॥
यान्तीमनुययावेकामायान्तीमाययौ तथा ।
जघांस स पपौ द्वाभ्यां भेदो ज्ञातो न कर्हिचित् ॥ ७ ॥
दिनादिनं विवादेऽत्र विवृद्धे राजगामि तत् ।
वृत्तं बभूव सोऽप्यत्र विस्मितोऽभून्निरीक्ष्य तम् ॥ ८ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ सर्वोपरिगतां प्रज्ञामादाय भूपतिः ।
शशास च तटे कृत्वा वाम्यौ द्वे एष संभ्रमात् ॥ ९ ॥
पात्यो वारिणि वीक्ष्यन्त्योर्बलादिति तथागते ।
विजातं जननीकुक्षिपालनातिशयादनु ॥ १० ॥
आच्छिद्य दामतत्रैव[1] तद्रक्षार्थं पपात ह ।
परं तटगतान्याऽसौ वीक्षमाणावतिष्ठते ॥ ११ ॥
इति निश्चयवन्तो हि राजानो नैव जातु[२४अ]चित् ।
स्खलन्ते शुद्धवंशोत्था बलमेषां हि दैवजम् ॥ १२ ॥

## इति राजबुद्धिबलकथनं नाम कुसुमम् ।

---

## [ २३ ]

अत्रैव प्रसङ्गेन सत्त्वप्रशंसा ।

तीक्ष्णसत्त्वस्य न चिराद्भवन्तीहैव सिद्धयः ।
मन्दसत्त्वस्य तु चिरात्तथा चेदं निदश्यताम् ॥ १ ॥
अस्ति पाटलिपुत्राख्यं भुवोऽलंकरणं पुरम् ।
तत्र विक्रमतुङ्गाख्यो राजाभूत् सत्यवान्पुरा ॥ २ ॥
योऽभूत्पराङ्मुखो दाने नार्थिनां न युधि द्विषाम् ।
स जातु मृगयाहेतोः प्रविष्टो नृपतिर्वनम् ॥ ३ ॥
बिल्वैर्होमं विदधतं तत्र ब्राह्मणमैक्षत ।
तं दृष्ट्वा प्रष्टुकामोऽपि परिहृत्य तदन्तिकम् ॥ ४ ॥
ययौ स दूरं मृगयारसेन सबलस्ततः ।
आवृत्तश्च तथैवात्र दृष्ट्वा होमपरं द्विजम् ॥ ५ ॥
उपेत्य नत्वा पप्रच्छ नाम होमफलं च सः ।
ततः स ब्राह्मणो भूपं कृताशीस्तमभाषत ॥ ६ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विप्रोऽहं नागशर्माख्यो होमे च शृणु मे फलम् ।
अनेन बिल्वहोमेन प्रसीदति यदानलः ॥ ७ ॥
हिरण्मयानि पिण्डानि तदा निर्यान्ति कुण्डतः ।
ततोऽग्निः प्रकटीभूय वरं साक्षात्प्रयच्छति ॥ ८ ॥
वर्तते मम भूयांसं कालो बिल्वानि जुह्वतः ।
मन्दपुण्यस्य नाद्यापि तुष्यत्येव ममानलः ॥ ९ ॥
इत्युक्ते तेन राजा तं धीरसत्त्वोऽभ्यभाषत ।
तर्हि मे देहि बिल्वं तमेकं यावज्जुहोमि तम् ॥ १० ॥
प्रसादयामि च ब्रह्मन्ननेनैव[1] तवानलम् ।
कथं प्रसादयसि तं वह्निमप्रयतोऽशुचिः ॥ ११ ॥
यो ममैवं वनस्थस्य पूतस्यापि न तुष्यति ।
इत्युक्तस्तेन विप्रेण राजा तमवदत्पुनः ॥ १२ ॥
मैवं प्रयच्छ मे बिल्वं पश्याश्चर्यं क्षणादिति ।
ततः स राज्ञे विप्रोऽसौ ददौ बिल्वं सकौतुकः ॥ १३ ॥
राजाचाह तदा तत्र दृढसत्त्वेन चेतसा ।
हुतेनानेन बिल्वेन न चेत्तुष्यसि मच्छिरः ।
त्वय्यग्ने संजुहोमीति ध्यात्वा चास्मिञ्जुहाव तम् ॥ १४ ॥
आविरासीच्च स प्रार्चिः कुण्डाद्बिल्वं हिरण्मयं ।
स्वयमादाय तत्तस्य फलं सत्त्वतरोरिव ॥ १५ ॥
जगाद च स[२४ ब]साक्षाच्चं जातवेदा महीपतिम् ।
सत्त्वेनानेन तुष्टोऽस्मि तद्गृहाण वरं मम् ॥ १६ ॥
तच्छ्रुत्वा स महासत्त्वो राजा तं प्रणतोऽब्रवित् ।
को मान्यो[1] वरो देहि द्विजायास्मै यथेप्सितम् ॥ १७ ॥
इति राज्ञो वचः श्रुत्वा जगादाग्निः समिद्धभाः ।
राजन्महाधनपतिर्ब्राह्मणोऽयं भविष्यति ॥ १८ ॥

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वमप्यक्षीणकोशश्रीमत्प्रसादाद्भविष्यसि ।
एवं दत्ते वरं वह्निं ब्राह्मणः स व्यजिज्ञपत् ॥ १९ ॥
आविर्भूतोऽसि सहसा राज्ञः स्वेच्छाविहारिणः ।
न मे सविनयस्यापि किमेतद्भगवन्निति ॥ २० ॥
ततोऽग्निर्वरदः प्राह नादास्यं दर्शनं यदि ।
अद्योऽप्यदेव स्वशिरस्तीव्रसत्वो नृपो मयीति ॥ २१ ॥

## इति राजधैर्यकथनं नाम कुसुमम् ।

## [ २४ ]

विबुधैर्वनिता रक्ष्या साम्ना खलु न चेर्ष्यया ।
चारित्रं वक्रमेतासां शङ्का साध्या न वै स्त्रियः ॥ १ ॥
नगरे क्वापि कोऽप्यासीदीर्षावान्पुरुषः किल ।
बभूव तस्य भार्या च वल्लभा रूपशालिनी ॥ २ ॥
अविश्वस्तो न तां जातु मुमोचैकिनीमसौ ।
तस्या हि शीलविभ्रंशं चित्रस्थेभ्यो हि शङ्कते ॥ ३ ॥
केनाप्यवश्यकार्येण कदाचित्स पुमानथ ।
सहैवादाय तां भार्यां प्रतस्थे विषयान्तरे ॥ ४॥
मार्गे सभिल्लामटवीमग्रे दृष्ट्वा स तद्भयात् ।
स्थापयित्वा गृहे ग्राम्ये वृद्धविप्रस्य तां ययौ । ५ ॥
तत्र स्थित्वा च सा दृष्ट्वा भिल्लांस्तेनागतान्यथा ।
एकेन भिल्लयूनैव सह दृष्ट्वा ययौ पुनः ॥ ६ ॥
तेन युक्ता च तत्पल्लीं यथाकामं चचार सा ।
न कान्तेर्षाल्लुम्पत्तिका[1] भग्नसेतुरिवापगा ॥ ७ ॥
तावत्स तत्पतिः कृत्वा कार्यमागत्य तं द्विजम् ।
ग्राम्यं ययाचे तां भार्यां सोऽपि विप्रो जगाद तम् ॥ ८ ॥
न जानेऽहं क्व याताऽसौ जान एतावदेव तु ।
भिल्ला इहागता आसंस्तैः सा नीता भविष्यति ॥ ९ ॥

1 Corrupt,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[२५ अ] सा पल्लीनिकटे चेह तत्तत्र व्रज सत्वरम्।
ततः प्राप्स्यसि तां भार्यां परथा मा मतिं कृथाः॥ १०॥
इत्युक्तस्तेन स रुदन्निन्दन्बुद्धिविपर्ययम्।
जगाम भिल्लपल्लीं तां भार्यां तत्र ददर्श ताम्॥ ११॥
साऽपि दृष्ट्वा तमभेत्य पापाङ्गीता तमब्रवीत्।
न मे दोषोऽहमानीता भिल्लेनेह भयादिति॥ १२॥
आयाहि तत्र गच्छावो यावत्कश्चिन्न पश्यति।
इति ब्रुवाणा रागान्धं तमुवाच पतिं च सा॥ १३॥
तस्यागमनवेलेयं भिल्लस्याखेटगामिनः।
आगत्य चानुधाव्यैव हन्यात्त्वां मां च वै ध्रुवम्॥ १४॥
तत्राविश्य गुहामेतां प्रच्छन्नस्तिष्ठ संप्रति।
रात्रौ च हत्वा तं सुप्तं यास्यावो निर्भयावितः॥ १५॥
एवं तयोक्तः शठया प्रविश्यासीद्गुहां स ताम्।
कोऽवकाशो विवेकस्य हृदि कामान्धचेतसः॥ १६॥
तथा कुस्त्रीगृहान्तःस्थमानीतं व्यसनेन तम्।
भिल्लायादर्शयत्तस्मायागताय दिनात्यये॥ १७॥
स च निष्कृत्य तं भिल्लः क्रूरकर्मा पराक्रमी।
प्रातर्देव्युपहारार्थं बबन्ध सदृढं तरौ॥ १८॥
भुक्त्वा च पश्यतस्तस्य रात्रौ तद्भार्यया सह।
सममासेव्य सुरतं सुखं सुष्वाप तद्युतः॥ १९॥
तं दृष्ट्वा सुखमीर्षालुः स पुमांस्तरुसंयतः।
चण्डीं शरणमभ्येत्य ययौ स्तुतिभिरर्चितां॥ २०॥
साविर्भूय वरं तस्मै तं ददौ येन तस्य सः।
तत्खड्गेनैव भिल्लस्य स्रस्तबन्धोऽच्छिनच्छिरः॥ २१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एहीदानीं हतः पापो मयायमिति सोऽथ ताम् ।
प्रबोध्य भार्यो वक्ति स्म साप्युत्तस्थौ सुदुःखिता ।। २२ ।।

गृहीत्वा तस्य च शिरो भिल्लस्यालक्षितं निशि ।
ततः प्रतस्थे कुस्त्री सा पत्या तेन सहैव च ।। २३ ।।

प्रातश्च नगरं प्राप्य दर्शयन्ती शिरोऽत्र तत् ।
भर्ता हतो मे तेनेति चक्रन्दाक्रम्य तं पतिम् ।। २४ ।।

ततः स नीतस्तद्युक्तो राजाग्रे पुररक्षिभिः ।
पृष्टस्तत्र यथावृत्तमीर्षाद्धि[२५अ]स्तदवर्णयत् ।। २५ ।।

राजाथ तत्त्वमन्विष्य छेदयामास कुस्त्रियः ।
तस्याः कर्णौ च नासां च तत्पतिं च मुमोच तम् ।। २६ ।।

स मुक्तः स्वगृहं प्रायात्कुस्त्रीस्नेहग्रहोज्झितः ।
एवं हि कुरुते कार्यं योषिदीर्ष्या नियन्त्रिता ।। २७ ।।

## इति स्त्रीरक्षाप्रकारकथनं नाम कुसुमम् ।

---

## [ २५ ]

नाश्वास्यं जातुचित्स्त्रीषु ता हि दुःसहसाहसा ।
तथा दुश्चरिताः पापास्तथा चैव निदश्यताम् ।। १ ।।

अस्ति हर्यवती नाम नगरी तत्र चाभवत् ।
अग्रणीर्निर्मदत्ताख्यो बहुकोटीश्वरो वणिक् ।। २ ।।

वसुदत्ताभिधाना च रूपेनान्यसमा सुता ।
बभूव तस्य वणिजः प्राणेभ्योऽप्यधिका प्रिया ।। ३ ।।

सा च तेन समानाय रूपयौवनशालिने
दत्ता वराङ्गनानेत्रचकोरामृतरश्मये ।। ४ ।।

नाम्ना समुद्रदत्ताय वणिक्पुत्राय साधवे ।
नगर्यामार्यजुष्टायां ताम्रलिप्त्यां निवासिने ।। ५ ।।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कदाचित्सा स्वदेशस्थे पत्यौ तस्य पितुर्गृहे ।
स्थिता वणिक्सुता दूरात्पुरुषं कंचिदैक्षत ॥ ६ ॥
तं केवलयुवानं च चपला मारमोहिता ।
गुप्तं सखीमुखानीतं भेजे प्रच्छन्नकामुकम् ॥ ७ ॥
ततः प्रभृति तेनैव सह तत्र मुदा रहः ।
रात्रौ रात्रावरंस्तासौ तदेकासक्तमानसा ॥ ८ ॥
एकदा च स कौमारः पतिस्तस्याः स्वदेशतः ।
आजगामाथ तत्पित्रोः प्रमोद इव मूर्तिमान् ॥ ९ ॥
सोत्सवे च दिने तस्मिन्सा नक्तं कृतमण्डना ।
मात्रानुप्रेषिता भेजे शय्यास्थायिगतं पतिम् ॥ १० ॥
प्रार्थिता तेन चालीकसुप्तं चक्रेऽन्यमानसा ।
पानमत्तोऽध्वखिन्नश्च सोऽपि जह्रे च निद्रया ॥ ११ ॥
ततश्च सुप्ते सर्वस्मिन्भुक्तपीते जने शनैः ।
सन्धिं भित्वा विवेशात्र चौरो वासगृहान्तरे ॥ १२ ॥
तत्कालं तमपश्यन्ती साप्युत्थाय वणिक्सुता ।
स्वजारकृतसंकेता निरगान्निभृतं ततः ॥ १३ ॥
तदालोक्य स चौ[२६ अ]रोऽपि विघ्नितेच्छो व्यचिन्तयत् ।
येषामर्थे प्रविष्टोऽहं तैरेवाभरणैर्युता ।
निशीथे निर्गतैषा तद्वीक्षेऽसौ कुत्र गच्छति ॥ १४ ॥
इत्याकलय्य निर्गत्य स चौरस्तां वणिक्सुताम् ।
वसुदत्तामनुययौ तत्र दत्तदृष्टिरलक्षितः ॥ १५ ॥
सापि पुष्पादिहस्तैकमसंकेतसखीयुता ।
गत्वा बाह्यं प्रविष्टाभूदुद्यानं नातिदूरगम् ॥ १६ ॥
तत्रापश्यच्च तं वृक्षे लम्बमानं स्वकामुकम् ।
संकेतकागतं रात्रौ लब्ध्वा नगररक्षिभिः ।
उल्लम्बितं चौरबुद्ध्या पाशकण्ठं मृतस्थितम् ॥ १७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः सा विह्वलोद्भ्रान्ता हा हतास्मीति वादिनी ।
पपात भूमौ कृपणं विलपन्ती रुरोद च ॥ १८ ॥
अवतार्याथ वृक्षात्तं गतासुं निजकामुकम् ।
उपवेश्यांगरागेण पुष्पैश्चालंचकार सा ॥ १९ ॥
समालिङ्ग्य च निःशङ्कं रागशोकान्धमानसा ।
उन्नमय्य मुखं यावत्तस्यार्ता परिचुम्बति ॥ २० ॥
तावत्स तस्याः सहसा निर्जीवः परपूरुषः ।
वेतालानुप्रविष्टः सन्दन्तैश्चिच्छेद नासिकाम् ॥ २१ ॥
तेन सा विह्वला तस्मात्सव्यथापसृताप्यहो ।
किंस्विज्जीवेदिति हता पुनरेत्य तमैक्षत ॥ २२ ॥
दृष्ट्वा च वीतवेतालं निश्चेष्टं मृतमेव तम् ।
सा भीता परिभीता च चचाल रुदती शनैः ॥ २३ ॥
तद्वच्छन्नः स्थितः सोऽथ चौरः सर्वं व्यलोकयत् ।
अचिन्तयच्च किमिदमेतया पापया कृतम् ॥ २४ ॥
अहो बताशयः स्त्रीणां भीषणो घनतामसः ।
अन्धकूप इवागाधः पाताय गहनः परम् ॥ २५ ॥
तदिदानीं इयं किं नु कुर्यादिति विचिन्त्य सः ।
कौतुकाद्दूरतश्चौरो भूयोऽप्यनुससार ताम् ॥ २६ ॥
सापि गत्वा प्रविश्यैव तत्स्वप्नस्थितभर्तृकं ।
गृहं तदा स्वकं प्रोच्चैः प्ररुदन्त्येवमब्रवीत् ॥ २७ ॥
परित्रायध्वमेतेन दुष्टेन मम नासिका ।
छिन्ना निरपराधाया भर्तृरूपेण रक्षसा ॥ २८ ॥
श्रुत्वैतं मुहुराक्रन्दं तस्या सर्वे [ २६ब ] ससंभ्रमम् ।
उदातिष्ठन्प्रबुध्यात्र पतिः परिजनः पिता ॥ २९ ॥
एत्याथ पितरो दृष्ट्वा तामाद्रच्छिन्ननासिकां ।
क्रुद्धास्तं बन्धयामासुर्भार्याद्रोहीति तत्पतिम् ॥ ३० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स तु नैवाब्रवीत्किञ्चिद्बुध्यमानोऽपि मूकवत् ।
विपर्यस्तेषु सर्वेषु शृण्वत्सु श्वशुरादिषु ॥ ३१ ॥
कोलाहलेन तस्यां च व्यतीतायां क्रमान्निशि ।
स निन्ये वणिजा तेन श्वशुरेण वणिक्सुतः ।
राजान्तिकं तया सार्धं भार्यया छिन्ननासया ॥ ३२ ॥
राजा च कृतविज्ञप्तिः स्वदारद्रोह्यसाविति ।
तस्यादिशद्वणिक्सूनोर्वधं न्यक्कृततद्वचाः ॥ ३३ ॥
ततो वध्यभुवं तस्मिन्नीयमाने सडिण्डिमम् ।
उपागम्य च चौरोऽसौ बभाषे राजपूरुषान् ॥ ३४ ॥
निष्कारणं न वध्योऽसौ यथावृत्तं हि वच्म्यहम् ।
संप्रापयत राजाग्रं यावत्सर्वं वदाम्यदः ॥ ३५ ॥
इत्यूचिवान्स नीतस्तैः राजाग्रे च वृताभयः ।
आमूलाद्रात्रिवृत्तं तच्चौरः सर्वं न्यवेदयत् ॥ ३६ ॥
सोऽब्रवीच्च न चेद्देव मद्वाचि प्रत्ययस्तव ।
तत्सा नासा मुखे तस्य शवस्याद्यापि वीक्षते ॥ ३५ ॥
तच्छ्रुत्वा वीक्षितुं भृत्यान्प्रेष्य सत्यमवेत्य तत् ।
स राजा तं वणिक्पुत्रं मुक्त्वा बन्धननिग्रहात् ॥ ३८ ॥
तां च कर्णावपि छित्वा दुष्टां देशान्निरस्तवान् ।
तद्भार्यां श्वशुरं चास्य तं सर्वस्वमदण्डयत् ॥ ३९ ॥
चौरं च पुराध्यक्षं तुष्टश्चक्रे महीपतिः ।
एवं स्त्रियो भवन्तीह निसर्गविषमाः शठाः ।
न जात्वसुसमाश्वस्तमतिना भाव्यमंजसा ॥ ४० ॥

## इति स्त्रीदुश्चरित्रकथनं नाम कुसुमम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## [ २६ ]

स्त्रियोऽतिविषमा गह्या भेतव्यं निपुणैस्ततः ।
उह्यन्ते हेलयैवाशु कुस्त्रीभिः सरलाशयाः ॥ १ ॥
सर्वथा च गृहे दास्यो भर्तव्याः कोमलाशयाः ।
न नाशिता हि का योषा दासीभिः पतिदेवताः ॥ २ ॥
अभून्मूर्खः पुमान्कश्चिद्भार्याभूत्तस्य सुव्रता ।
सा दु[२७अ]र्दास्यैकदा तस्मिन्पत्यौ देशान्तरं गते ॥ ३ ॥
चालिताभूद्यथा तस्य कुलं नष्टमभूत्किल ।
सा दत्तकार्यशिक्षां तामास्तां कर्मकरीगृहे ॥ ४ ॥
ययावुपपतेर्गेहं निरर्गलसुखेच्छया ।
अथागतं तत्पत्तिं सा स्थितशिक्षाश्रुगद्गदम् ॥ ५ ॥
कर्मकर्यवदद्भार्या मृता दग्धा च सा तव ।
इत्युक्त्वाऽसौ श्मशानं च नीत्वा तस्मायदर्शयत् ॥ ६ ॥
अस्थीन्यन्यश्चितास्थानि तान्यादाय रुदंश्च सः ।
कृतोदकोऽथ तीर्थेषु प्रक्षिप्यास्थी नितानि च ॥ ७ ॥
प्रावर्तत स भार्यायास्तस्याः श्राद्धविधौ जडः ।
सद्विप्र इत्युपानीतं कर्मकर्या तथैव च ॥ ८ ॥
तमेव भार्योपपतिं श्राद्धविप्रं चकार सः ।
तेनोपपतिना सार्धं तद्भार्योपेत्य तत्र सा ॥ ९ ॥
उदारवेषा भुंक्ते स्म मिष्टान्नं मासि मासि तत् ।
सतीधर्मप्रभावेण भार्या ते परलोकतः ।
पश्यागत्य स्वयं भुंक्ते ब्राह्मणेन शुभा प्रभो ॥ १० ॥
इति कर्मकरी सा तमवोचत्तत्पतिं यदा ।
तदेव प्रतिपेदे तत्सर्वं मूर्खशिरोमणिः ॥ ११ ॥

**इति गृहदासीदुश्चरित्रकथनं नाम कुसुमम् ।**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ २७ ]

रूपं विलोक्य नो धीरैः भ्रान्तव्यं जातु योषिताम् ।
आनुरूप्येण संम्बन्धः कार्यो नानानुरूप्यतः ॥ १ ॥
प्राप्नोत्यधममेवाशु या स्त्री नीचकुलोद्भवा ।
केवलं परिहासाय तादृशस्त्रीपरिग्रहः ॥ २ ॥
तथा हि कापि चाण्डालकन्यातीव मनोहरा ।
अभूद्दृष्ट्वैव यां लोका बभूवुः काममोहिताः ॥ ३ ॥
कुलं जातिं च सच्छीलं संबन्धांश्च तथोचितान् ।
येवमन्यानुसस्रुस्तां स्मरः किं किं न कारयेत् ॥ ४ ॥
सापि तच्चरितं दृष्ट्वा यूनां संमोहशालिनां ।
सार्वभौमवरप्राप्तौ संकल्पं ह्यदधात् हृदि ॥ ५ ॥
सा जातु दृष्ट्वा राजानं नगरक्रान्तिनिर्गतम् ।
सर्वोत्तमं भर्तृबुद्धिमनुसर्तुं प्रचक्रमे ॥ ६ ॥
तावदायान्मुनिः कश्चित्पथा तस्य [ २७ब ] प्रणम्य सः ।
राजा गजावरूढः सन्पादौ स्वभवनं ययौ ॥ ७ ॥
तद्दृष्ट्वा राजतोऽप्यग्र्यं मत्वा तं मुनिसत्तमम् ।
सेनं ( सा इनं राजानं ) त्यक्त्वानुयाता तं वरबुद्धया
मुदान्विता ॥ ८ ॥
मुनिःसोऽपि व्रजन्दृष्ट्वा शून्यग्रामे शिवालयं ।
न्यस्तजानुः क्षितौ तत्र शिवं नत्वा ययौ गृहम् ॥ ९ ॥
उद्वीक्ष्य सा तदधिकं शिवं तत्र धिया ददौ ।
क्षणाच्चात्र प्रविश्य श्वा देवस्यारुह्य पीठिकां ॥ १० ॥
जंघामुत्क्षिप्य जातेर्यत्सदृशं तस्य तद्व्यधात् ।
तद्विलोक्यान्त्यजा मत्वा देवाच्छ्वानं तमुत्तमम् ॥ ११ ॥
श्वानं तमेवान्वगात्सा त्यक्त्वा देवं पतीच्छया ।
श्वा चैवागत्य चण्डालगृहं परिचितस्य सः ॥ १२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चण्डालयूनः प्रणयाल्लुठते तस्य पादयोः।
तदालोक्योत्तमं मत्वा शुनश्चण्डालपुत्रकम्।
स्वजातितुष्टा वव्रे सा तमेव पतिमन्त्यजा ॥ १३ ॥
एवं कृतपदा दूरे पतन्ति स्वपदे जडाः।
विधाय तद्विधं धीमान्स्वानुरूपं विचिन्तयेत् ॥ १४ ॥

इति सदाचारपालनाख्यं कुसुमम्।

---

[ २८ ]

अतीव कठिनं स्त्रीणां चरित्रं दुर्घटं तथा।
याः कामैकरताः पितृमातृसंबन्धिनोऽपि च ॥ १ ॥
अवगण्य स्वयं यान्ति सृतिमंकावहां किल।
तस्मात्स धन्यो लोकेऽस्मिन्यद्गृहेऽसौ सुशीलभाक् ॥ २ ॥
तथा च श्रूयतामेतां विचित्रामद्भुतां कथाम्।
घटकर्परनामानौ चौरवास्तां पुरे क्वचित् ॥ ३ ॥
तयोः स कर्परो जातु बहिर्न्यस्य घटं निशि।
सन्धि भित्त्वा नृपसुतावासवेश्म प्रविष्टवान् ॥ ४ ॥
तत्र कोणस्थितं तं सा विनिद्रा राजकन्यका।
दृष्ट्वैव संजातकामा सद्यः स्वैरमुपाह्वयत् ॥ ५ ॥
रत्वा च तेन साकं सा दत्वा चार्थं तमब्रवीत्।
दास्याम्यन्यत्प्रभूतं ते पुनरेष्यसि चेदिति ॥ ६ ॥
ततो निर्गत्य वृत्तान्तमाख्यायार्थं समर्प्य च।
व्यसृजत्प्राप्य राजार्थं घटं गेहं स कर्परः ॥ ७ ॥
स्वयं तदैव तु पुनर्विवेशान्तःपुरं स तत्।
आकृष्टः का[२८ अ]मलोभाभ्यामपायः को हि पश्यति ॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्रैष सुरतश्रान्तः पानमत्तस्तया सह ।
राजपुत्र्या समं सुप्तो न बुबोध निशां गताम् ॥ ९ ॥
प्रातः प्रविष्टैर्लब्धोऽसौ बध्वान्तःपुररक्षकैः ।
राज्ञे निवेदितः सोऽपि क्रोधात्तस्यादिशद्वधम् ॥ १० ॥
यावत्स नीयते वध्यभुवं तावत्सखास्य सः ।
रात्रावनागतस्यागादन्वेष्टुं पदवीं घटः ॥ ११ ॥
तमागतं स दृष्ट्वान्तर्घटं कर्परकः पुनः ।
हृत्वा राजसुतां रक्षेरित्याह स्म स्वसंज्ञया ॥ १२ ॥
घटेनाङ्गीकृतं सोऽथ संज्ञयैव च कर्परः ।
नीत्वोल्लम्ब्य तरौ क्षिप्रं वधकैरवशो हतः ॥ १३ ॥
ततो गत्वा घटो गेहमागत्य च निशागमे ।
भित्त्वा सुरंगां प्राविशत्स तद्राजसुतागृहम् ॥ १४ ॥
तत्रैतां संयतां सम्यग्दृष्टोपेत्य जगाद सः ।
त्वत्कृतेऽद्य हतस्याहं कर्परस्य सखा घटः ॥ १५ ॥
अपनेतुमितस्त्वां च तत्स्नेहादहमागतः ।
तदेहि यावन्नानिष्टं कश्चित्ते कुरुते पिता ॥ १६ ॥
इत्युक्ते तेन सा हृष्टा राजपुत्री तथेति तम् ।
प्रतिपेदे स चैतस्याः बन्धनानि न्यवारयत् ॥ १७ ॥
ततस्तया समं सद्यः समर्पितशरीरया ।
निर्गत्य स ययौ चौरः स्वनिकेतं सुरंगया ॥ १८ ॥
प्रातश्च खातदुर्लक्षसुरंगेन निजां सुताम् ।
केनाप्यपहृतां बुद्ध्वा स राजा समचिंतयत् ॥ १९ ॥
ध्रुवं तस्यास्ति पापस्य निगृहीतस्य बान्धवः ।
कश्चित्साहसिको येन हृतैवं सा सुता मम ॥ २० ॥
इति संचिन्त्य स नृपतिः तत्कर्परकलेवरम् ।
रक्षितुं स्थापयामास स्वभृत्यानब्रवीच तान् ॥ २१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यः शोचंश्चेतसागच्छेत्क्षिप्सेद्दाहादिकं च सः ।
अवष्टम्भ्य ततो लप्स्ये पापां तां कुलदूषिकाम् ॥ २२ ॥
इति राज्ञा समादिष्टा रक्षिणोऽत्र तथेति ते ।
रक्षन्तस्तस्थुरनिशं तत्कर्परकलेवरम् ॥ २३ ॥
तत्सोऽन्विष्य घटो बुद्ध्वा राजपुत्रीमुवाच ताम् ।
प्रियो बन्धुः सखा योऽभूत्परमः[२८ ब ]कर्परो मम ॥ २४ ॥
यत्प्रसादान्मया प्राप्ता त्वं समुद्ररत्नसंचया[1] ।
स्नेहानृण्यमकृत्वास्य नास्ति मे हृदि निर्वृतिः ॥ २५ ॥
तत्त्वं गत्वा न शोचामि प्रेक्षमाणः स्वयुक्तितः ।
क्रमाच्च संस्करोम्यग्नौ तीर्थेऽस्यास्थीनि च क्षिपे ॥ २६ ॥
भयं मा भूच्च तेनाऽहं सुबुद्धिः कर्परो यथा ।
इत्युक्त्वा तां तदैवाभूत्स महाव्रतिवेशभृत् ॥ २७ ॥
स चाप्योदनमादाय कर्परे कर्परान्तिकम् ।
स क्षीब इव तत्राथ यत्तद्गायन्हसन्श्वसन् ।
मार्गागत इवोपागाच्चक्रेऽत्र स्खलितं वचः ॥ २८ ॥
निपात्य हस्ताद्भंक्त्वा च तत्समधं च कर्परम् ।
हा कर्परामृतभृतेत्यादि तत्तच्छुशोच सः ॥ २९ ॥
रक्षिणो मेनिरे तच्च भिन्नभाण्डानुशोचनम् ।
क्षणाच्च गृहमागत्य राजपुत्र्यै शशंस तत् ॥ ३० ॥
अन्येद्युश्च वधूवेशं भृत्यं कृत्यैकमग्रतः ।
अभ्युद्धतसधत्तूरभक्ष्यभारं च पृष्ठतः ॥ ३१ ॥
स तु स्वयं च ग्रामीणवेशो भूत्वा दिनात्यये ।
प्रस्खलन्निकटे तेषामगात्कर्पररक्षिणाम् ॥ ३२ ॥
कस्त्वं केयं च ते भ्रातः क्व यासीति च तत्र तैः ।
पृष्टः स धूर्तस्तानेवमुवाच स्खलिताक्षरम् ॥ ३३ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्राम्योऽहमेषा भार्या मे यामीतः श्वशुरगृहम् ।
भक्ष्यकोशलिका चेयमानीता तत्कृते मया ॥ ३४ ॥
संभाषणाच्च यूयं मे संजाता सुहृदोऽधुना ।
तदर्धं तत्र नेष्यामि भक्ष्याणामर्धमस्तु वः ॥ ३५ ॥
इत्युक्त्वा भक्ष्यमेकैकं स ददौ तेषु रक्षिषु ।
ते हसन्तो गृहीत्वैव भुञ्जते स्माखिला अपि ॥ ३६ ॥
तेन रक्षिषु धत्तूरमोहितेष्वेषु सोऽग्निसात् ।
निशि चक्रे घटो देहं कर्परस्याहुतेन्धनः ॥ ३७ ॥
गते तस्मिंश्च तत्प्रातर्बुद्ध्वा राजा निवार्य तान् ।
विमूढान्स्थापयामास रक्षिणोऽन्यानुवाच च ॥ ३८ ॥
रक्षाण्यस्थीन्यपीदानीं यस्तान्यादातुमेष्यति ।
स युष्माभिर्ग्रहीतव्यो भक्ष्यं किंचिच्च नान्यतः ॥ ३९ ॥
इति राज्ञोदितास्ते च [ २९ अ ] सावधाना दिवानिशं ।
तत्रासन्रक्षिणस्तं च वृत्तान्तं बुबुधे घटः ॥ ४० ॥
ततः स चण्डिकादत्तमहामंत्रप्रभाववित् ।
तेन गत्वा समं तत्र प्रभ्राजा मंत्रजापिना ॥ ४१ ॥
रक्षिणो मोहयित्वा तान्कर्परास्थीनि सोऽग्रहीत् ।
क्षिप्त्वा तानि च गंगायामेत्याख्याय यथाकृतम् ॥ ४२ ॥
राजपुत्र्या सुखं तस्थौ घटः प्रव्राजकान्वितः ।
राजापि सोऽस्थिहरणं बुद्ध्वा तद्रक्षिमोहनम् ॥ ४३ ॥
आसुताहरणात्सर्वं मेने तद्योगचेष्टितम् ।
येनेदं योगिना कारि तनया हरणादि मे ॥ ४४ ॥
ददामि तस्मै राज्यार्धमभिव्यक्तिं स याति चेत् ।
इति राजा स नगरे दापयामास घोषणाम् ॥ ४५ ॥
तां श्रुत्वा चैच्छदात्मानं घटो दर्शयितुं तदा ।
मैवं कृथाऽद्य तातेऽस्मिन् विश्वासं छद्मघातिनि ॥ ४६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राज्ञीत्यवार्यत तया राजपुत्र्या ततश्च सः ।
अथोद्विग्नदनयातेन साकं प्रव्राजकेन सः ॥ ४७ ॥

घटो देशान्तरं यायाद्राजपुत्र्यायुतश्च सः ।
मार्गेण राजपुत्री सा प्रव्राजन्तं ततोऽब्रवीत् ॥ ४८ ॥

एकेन ध्वंसितान्येन भ्रंशितास्म्यमुना पदात् ।
तच्चौरः स मृतो नायं घटो मे त्वं बहुप्रियः ॥ ४९ ॥

इत्युक्त्वा तेन संगम्य सा विषेणावधीद्घटम् ।
ततस्तेन समं यान्ती पापा प्रव्राजकेन सा ॥ ५० ॥

धनदेवाभिधानेन संजग्मे वणिजा पथि ।
कोऽयं कपाली त्वं प्रेयान्ममेत्युक्त्वा ययौ समम् ॥ ५१ ॥

वणिजा तेन संसुप्तं सा प्रव्राजं विहाय तम् ।
प्रव्राजकश्च संप्राप्तः प्रबुद्धश्च व्यचिन्तयत् ॥ ५२ ॥

न स्नेहोऽस्ति न दाक्षिण्यं स्त्रीष्वहो चापलादृते ।
यद्विश्वास्येति मां पापा हृतार्थां च पलायिता ॥ ५३ ॥

सैष लाभोऽथवा यन्न हतोऽस्मि घटवत्तथा ।
इत्यालोच्य ययौ देशं निजं प्रव्राजकश्च सः ॥ ५४ ॥

इति धूर्तचरित्रं नाम कुसुमम् ।

[२९ ब] इति नीतिकल्पे द्वितीयमञ्जर्यां स्त्रीचरित्रवर्णनाभिधो गुच्छकः ।

---

## [ २९ ]

अन्तरङ्गेन भाव्यं च सदैव मतिचक्षुषा ।
हिताय स्वपरेषां यत्सदैवांतरवेदनम् ॥ १ ॥

सत्येनैको भवेन्मित्रमपरं तूपचारतः ।
तुल्येऽपि स्निग्धता योगे तैलं तैलं घृतं घृतम् ॥ २ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निदर्श्यते तथा चात्र मित्रद्वयकथा शुभा।
बभूव चन्द्रपीडाख्यः कान्यकुब्जे महीपतिः ॥ ३ ॥
तस्याभवच्च धवलमुख्याख्यः कोऽपि सेवकः।
बहिर्भुक्त्वा च पीत्वाच सदैव प्राविशद्गृहम् ॥ ४ ॥
भुक्तपीतः कुतो नित्यमायासीति च भार्यया।
पृष्टश्च जातु धवलमुखस्तामेवमभ्यधात् ॥ ५ ॥
सुहृत्पार्श्वादहं शश्वद्भुक्त्वा पीत्वा च भामिनि।
सदैव यामि येनास्ति लोके मित्रद्वयं मम ॥ ६ ॥
कल्याणवर्मनामैको भोजनाद्युपकारकृत्।
द्वितीयो वीरबाहुश्च प्राणैरप्युपकारकृत् ॥ ७ ॥
एवं श्रुत्वैव धवलमुखोऽसौ भार्यया तया।
ऊचे मित्रद्वयं तन्मे भवता दर्श्यतामिति ॥ ८ ॥
ततो ययौ स तद्युक्तस्तस्य कल्याणवर्मणः।
गृहं सोऽपि महार्हैस्तैरुपचारैरुपाचरत् ॥ ९ ॥
अन्येद्युः स ययौ वीरबाहोर्भार्यायुतोऽन्तिकम्।
स च द्यूतस्थितः कृत्वा स्वागतं तं विसृष्टवान् ॥ १० ॥
ततोऽब्रवीत्सा धवलमुखं भार्या सकौतुका।
कल्याणवर्मा महतीमकरोत्सत्क्रियां तव ॥ ११ ॥
कृतं स्वागतमात्रं तु भवतो वीरबाहुना।
तदार्यपुत्र तं मित्रं मन्यसेऽभ्यधिकं कथम् ॥ १२ ॥
तच्छ्रुत्वा सोऽब्रवीद्गच्छ मिथ्या तौ ब्रूह्युभौ क्रमात्।
स पूर्ववैरी सबलो निघ्नन्नेति मदादिति ॥ १३ ॥
इत्युक्त्वा तेन गत्वा वै सा तथैति तदैव तत्।
कल्याणवर्मणेऽवोचदश्रुत्वा च जगाद ताम् ॥ १४ ॥
भवत्यहं वणिक्पुत्रो ब्रूहि तेऽस्य करोमि किम्।
इत्युक्ता तेन सा प्रायाद्वीरबाहोरथान्तिकम् ॥ १५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मै तथैव साशंसद्दैरिको[ ३० अ ]पं स भर्तरि।
स श्रुत्वैव ययौ धावन्गृहीत्वा खड्गचर्मणि ॥ १६ ॥
वारितोऽसौ राजभटैरागत्येति व्रजेति तम्।
वीरबाहुं धवलमुखोऽथ प्राहिणोद्गृहम् ॥ १७ ॥
इदं तदन्तरं तन्वि मित्रयोरेतयोर्मम।
इति भार्या च धवलमुखेनोक्ता तुतोष सा ॥ १८ ॥

इति मित्रविशेषं नाम कुसुमम्।

---

[ ३० ]

सच्चरित्रैर्विशेषज्ञैः प्रज्ञापारं समागतैः।
संगो विशेषमादाय सत्फलं जनयिष्यति ॥ १ ॥
कृतप्रज्ञस्य सुमतेः संगच्छन्ते दिवौकसः।
यदा क्वैव मनुष्याणां तत्र वार्तास्ति संगतौ ॥ २ ॥
तथा च श्रूयतां सम्यक्कथा विस्मयकारिणी।
राजा विक्रमसेनाख्यो वेतालक्लेशितः पुरा ॥ ३ ॥
प्रज्ञया स्वं विमोच्यास्माद्वरमाप महीपतिः।
रत्नोपहारमानीय विप्रेणासौ च केनचित् ॥ ४ ॥
वशतः स्वर्गराज्येहारब्धदुष्कर्मणा किल।
साधयामि च ते कार्यमित्युक्त्वान्यादिने स तम् ॥ ५ ॥
निशीथेऽरण्यसंप्राप्त्यैपेणेसौ[1] सोऽपि तत्तथा।
सत्वागत्य च विस्रस्तं पश्यामुं शिंशपास्थितम् ॥ ६ ॥
शवमिहानयेत्युक्त्वा सुकर्मनिरतो भवेत्।
स च धैर्यं समाश्रित्य यावत्तं स्कन्धसंश्रितः ॥ ७ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृत्वा नयति तावत्स तं वृक्षं पुनराययौ ।
नायं नायं च स प्रीतः प्राह[1] तं मा श्रमं कुरु ।
उपहारमसौ कुर्यात्वां ममेति जगाद सः ॥ ८ ॥
प्रश्नमेनं यदि भवान्समर्थयसि तन्मया ।
हिताय ते त्रिलोक्याश्चोपदेशः क्रियते रहः ॥ ९ ॥
अस्त्याग्रहारः कालिन्दीकूले ब्रह्मस्थलाभिधः ।
अग्निस्वामीति तत्रासीद्ब्राह्मणो वेदपारगः ॥ १० ॥
तस्यातिरूपा मन्दारवत्यजनि कन्यका ।
यां निर्माय नवानर्घलावण्यान्वियतं विधिः ।
स्वर्गस्त्रीपूर्वनिर्माणं निजमेवाजुगुप्सत ॥ ११ ॥
तस्यां च यौवनस्थायामाययुः कान्यकुब्जतः ।
समसर्वगुणास्तत्र त्रयो ब्रा[३०ब]ह्मण पुत्रकाः ॥ १२ ॥
तेषां चात्मार्थमेकैकस्तत्पितुस्तामयाचत ।
अनिच्छन्दानमन्यस्मै तस्याः प्राणव्ययादपि ॥ १३ ॥
तत्पिता स तु तन्मध्यान्नैकस्मायपि तां ददौ ।
भीतोऽन्ययोर्वधात्तेन तस्थौ कन्यैव सा ततः ॥ १४ ॥
ते च त्रयोऽपि तद्वक्त्रचन्द्रैकाहृष्टसक्तयः ।
चकोरव्रतमालम्ब्य तत्रैवासीन्दिवानिशम् ॥ १५ ॥
अथाकस्मात्समुत्पन्नदाहज्वरेन सा ।
जगाम मन्दारवती कुमारी किल पञ्चताम् ॥ १६ ॥
ततश्च विप्रपुत्रास्ते परासुंशोकविक्लवाः[1] ।
कृतप्रसाधनां नीत्वा श्मशाने चक्रुरग्निसात् ॥ १७ ॥
एकश्च तेषां तत्रैव विधाय मठिकां ततः ।
कृततद्भस्मशय्यः सन्नास्तायाचितभैक्षभुक् ॥ १८ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वितीयोऽस्थीन्युपादाय तस्या भागीरथीं ययौ ।
तृतीयस्तापसो भूत्वा भ्रान्तुं देशान्तराण्यगात् ॥ १९ ॥
स भ्राम्यंस्तापसः प्राप ग्रामं वक्रकलाभिधम् ।
तत्रातिथिः सन्कस्यापि विप्रस्य प्राविशद्गृहम् ॥ २० ॥
तत्पूजितः स यावच्च भोक्तुं तत्र प्रचक्रमे ।
तावदेकः शिशुस्तत्र प्रवृत्तोऽभूत्प्ररोदितुम् ॥ २१ ॥
स सान्त्व्यमानोऽपि यदा न व्यरंसीत्तदा क्रुधा ।
बाहावादाय गृहिणी ज्वलत्यग्नौ तमाक्षिपत् ॥ २२ ॥
क्षिप्तमात्रः स मृद्वङ्गो भस्मीभावमवाप्तवान् ।
तद्दृष्ट्वा जातरोमाञ्चः सोऽब्रवीत्तापसोऽतिथिः ॥ २३ ॥
हा धिक्कष्टं प्रविष्टोऽस्मि ब्रह्मराक्षसवेश्मनि ।
तन्मूर्तं किल्बिषमिदं न भोक्ष्येऽन्नमिहाधुना ॥ २४ ॥
एवं वदन्तं तं सोऽत्र गृहस्थः प्राह पश्य मे ।
शक्तिं पठितसिद्धस्य मन्त्रस्य मृतजीवनीम् ॥ २५ ॥
इत्युक्त्वादाय तन्मन्त्रपुस्तिकामनुवाच्य च ।
तत्र भस्मनि चिक्षेप स धूलिमनुमन्त्रिताम् ॥ २६ ॥
तेनोदत्ति[ ३१ अ ]ष्ठत्तद्रूप एव जीवन्स बालकः ।
ततः स निर्वृतस्तत्र भुक्तवान्विप्रतापसः ॥ २७ ॥
गृहस्थोऽपि स तां नागदन्तेऽवस्थाप्य पुस्तिकाम् ।
भुक्त्वा च शयनं भेजे रात्रौ तत्रैव तद्युतः ॥ २८ ॥
सुप्ते गृहपतौ तस्मिन्स्वैरमुत्थाय शङ्कितः ।
स प्रियाजीवितार्थी तां पुस्तिकां तापसोऽगृहीत् ॥ २९ ॥
गृहीत्वैव च निर्गत्य ततो रात्रिंदिनं व्रजन् ।
क्रमात् श्मशानं तत्प्राप यत्र दग्धाऽस्य सा प्रिया ॥ ३० ॥
ददर्श चात्र तत्कालं तं द्वितीयमुपागतम् ।
योऽसौ गङ्गाम्भसि क्षेप्तुं तदस्थीनि गतोऽभवत् ॥ ३१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततस्तं च तमाद्यं च तस्या भस्मनि शायिनम् ।
निबद्धमधिकं तत्र द्वावप्येतौ जगाद सः ॥ ३२ ॥
मठिकापास्यतामेषां[1] यावदुत्थापयामि ताम ।
जीवन्तीं भस्मतः कान्तां मन्त्रशक्त्या कयापि ताम् ॥ ३३ ॥
इति तौ प्रेर्य निर्बन्धान्निर्लोठ्य मठिकां च सः ।
उद्धाट्य तापसो विप्रः पुस्तिकां तामवाचयत् ॥ ३४ ॥
अभिमन्त्र्य च मन्त्रेण धूलिं भस्मन्यवाक्षिपत् ।
उदतिष्ठच्च जीवन्ती सा मन्दारवती ततः ॥ ३५ ॥
वह्निप्रवेशनिष्क्रान्तं वपुःपूर्वाधिकद्युति ।
तदा बभार सा कन्या कांचनेनेव निर्मितम् ॥ ३६ ॥
तादृशीं तां तदा दृष्ट्वा ते तथैव स्मरातुराः ।
प्राप्तकामास्त्रयोऽप्येवमन्योन्यं कलहं दधुः ॥ ३७ ॥
एकोऽब्रवीदियं भार्या मम मन्त्रबलार्जिता ।
तीर्थप्रभावजा भार्या ममेयमिति चापरः ॥ ३८ ॥
रक्षित्वा भस्म तपसा जीवितेयं मयेह यत् ।
तदेषा मम भार्येति जगादात्र तृतीयकः ॥ ३९ ॥
विवादनिश्चयं तेषां त्वं तावन्मे महीपते ।
निश्चितं ब्रूहि कस्यैषा कन्या भार्योपपद्यते ॥ ४० ॥
विदलिष्यति मूर्धा ते यदि जानन्न वक्ष्यसि ।
इति वेतालतः श्रुत्वा तं स राजैवमभ्यधात् ॥ ४१ ॥
यः क्लेशमनुभूयापि मन्त्रज्ञस्तामजीवयत् ।
पिता तस्यास्तत्कार्यकरणान्न पुनः पतिः ॥ ४२ ॥
यश्चा[३१ ब]स्थीनि निनायास्या गंगां सोऽपि सुतो मतः ।
यश्च तद्भस्मशय्यां तामाश्लिष्यासीत्तपश्चरन् ॥ ४३ ॥

1 Corrupt.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्मशान एव तत्प्रीत्या भर्ता तस्याः स बुध्यते ।
कृतं तदनुरूपं हि तेन गाढानुरागिणा ॥ ४४ ॥
निशम्य नृपतेस्तस्माद्धर्मार्थसहितं वचः ।
प्रीतो वेताल आह स्मोपदेशो गृह्यतामयम् ॥ ४५ ॥
प्रापय्य मामसौ वक्ति रह एनं निवेशय ।
देवतारूपिणं चैनं दण्डवत्प्रणतो भव ॥ ४६ ॥
तथा भवन्तं त्वां चासौ खड्गमाधाय दुष्टधीः ।
ममोपहारं कुरुते तस्मादवहितो भव ॥ ४७ ॥
निशम्यैव त्वया राजन्नसौ वाच्यो मया नहि ।
दण्डवत्प्रणतिर्जातु कृता शिक्षय मामिति ॥ ४८ ॥
दण्डवत्प्रणतं चामुं खड्गमादाय सुव्रत ।
शिरश्छेदेन चास्यैव मां तर्पय यथासुखम् ॥ ४९ ॥
न चात्र शङ्का कर्तव्या द्विजोऽसाविति नह्यसौ ।
द्विजः किंत्वाततायेष तद्वधे नास्ति पातकम् ॥ ५० ॥

इति बुद्धिपरीक्षाभिधं कुसुमम् ।

## [ ३१ ]

धीराणां सत्त्वशोभैकसाराणां जगतीतले ।
किं नाप्यमथवा सर्वविशिष्टमतिशालिनाम् ॥ १ ॥
तथा च दृश्यतां भूयस्त्रिविक्रमकथानकम् ।
अस्ति शोभावती नाम सत्याख्या नगरी भुवि ॥ २ ॥
तस्यां च शूद्रकाख्योऽभूद्भूपतिः प्राज्यविक्रमः ।
तं कदाचिन्महीपालं प्रियशूरमुपाययौ ॥ ३ ॥
सेवार्थं मालवादेको नाम्ना वीरवरो द्विजः ।
तस्य धर्मवती नाम भार्या सत्यधरः सुतः ॥ ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कन्या वीरवती चेति त्रयं गृहपरिच्छदः ।
सेवापरिच्छदश्चान्यत्त्रयं कट्यां कृपाणिका ॥ ५ ॥
करे करतलान्यत्र चारुचर्म परत्र च ।
तावन्मात्र परीवारो दीनारशतपञ्चकम् ॥ ६ ॥
प्रत्यहं प्रार्थयामास राज्ञस्तमात्स्ववृत्तये ।
राजापि स तमाकाररुचिरोदारपौरुषम ।
वीक्ष्य तस्मै ददौ वृत्तिं शूद्रकस्तां यथेप्सिताम् ॥ ७ ॥
अल्पे परिकरेऽप्येभिः कियद्भिः[३२ अ]स्वर्णरूपकैः ।
किमेष व्यसनं पुष्णात्यथ कंचन सद्व्ययम् ॥ ८ ॥
इत्यन्वेष्टुं समाचारं कौतुकात्स महीपतिः ।
प्रच्छन्नान्स्थापयामास चारानस्य च पृष्ठतः ॥ ९ ॥
स च प्रातर्नृपं दृष्ट्वा मध्याह्नं च धृतायुधः ।
सिंहद्वारे स्ववृत्तिं तामादायागारमाययौ ॥ १० ॥
शतं पत्न्यैच भुक्त्यर्थं वस्त्रतांबूलहेतवे ।
शतं स्नात्वा च पूजार्थं व्यदधाद्विष्णोः शिवस्य च ॥ ११ ॥
विप्रेभ्यः कृपणेभ्यश्च ददौ दानं शतद्वयं ।
एवं विभेजे पंचापि तानि नित्यं शतान्यसौ ॥ १२ ॥
श्रुत्वास्य वृत्तं तत्सोऽपि तुतोष हृदि शूद्रकः ।
सच कृत्वाह्निकार्यं तन्निश्येको द्वारि संदधत् ॥ १३ ॥
कृपाणीं पुनरास्तस्थौ जागरैककृतक्षणः ।
तदीर्ष्यात इवोद्भूतविद्युत्करतलां दधत् ॥ १४ ॥
धारानिपाती निनदन्नाजगाम घनागमः ।
तत्परीक्षां समाधातुं निशीथे स च शूद्रकः ॥ १५ ॥
जगाद हर्म्यतः कोऽत्र सिंहद्वारे स्थितोऽत्र भोः ।
तच्छ्रुत्वाहं स्थितोऽत्रेति सोऽपि वीरवरोऽब्रवीत् ॥ १६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहो सुदृढसत्त्वोऽयं भक्तो वीरवरो मयि ।
तदेष प्रापणीयो मेऽवश्यमेव महत्पदम् ॥ १७ ॥
ततोऽवतीर्य सुष्वाप राजान्तःपुरमण्डपे ।
अन्येद्युश्च रसंत्येव वारिधाराः प्रवर्षति ॥ १८ ॥
तथैवारुह्य हर्म्ये स परीक्षामास तं पुनः ।
स्थितोऽस्मीति वदत्यस्मिन्यावद्विस्मयमाप सः ॥ १९ ॥
तावद्दूरे रुदन्तीं स स्त्रियं श्रुत्वा व्यचिन्तयत् ।
अहो राष्ट्रे पराभूतो दरिद्रो दुःखितोऽपि वा ।
नास्ति कश्चित्कथं दीना वागियं श्रुतिमागता ॥ २० ॥
संचिन्त्येत्थमुवाचैनं कासौ भोः करुणातुरा ।
शीघ्रं निशामय द्रुतोऽस्मीत्यसौ प्रययौ जवात् ॥ २१ ॥
द्रुतं तं वीक्ष्य प्रसरद्धारासारे तमोनिशि ।
कौतुकाविष्टहृद्राजावतीर्यानुजगाम तम् ॥ २२ ॥
आक्रन्देन स गत्वात्र पुरीबाह्ये ददर्श च ।
सरोऽत्र रुदतीं चापि[३२ ब]वनितां काचिदैक्षत ॥ २३ ॥
हा शूर, हा कृपालो, हा त्यागिन्शून्या त्वया कथम् ।
वत्स्यामीत्यादि रुदन्तीं पप्रच्छ च कृतस्थितिः ॥ २४ ॥
का किमर्थमिदं चेति साह पृथ्व्यहमेष मे ।
भर्ता तृतीयेह्नि मृतिं यातेति रुदितं मम ॥ २५ ॥
अद्य तावन्न मे धत्ते[1] दश आसो न चाप्यतः[1] ।
संभावयामि योऽनेन समोंऽशेनापि[1] केनचित् ॥ २६ ॥
निशम्य तसद्दृत्प्राह कोऽप्युपायोऽत्र चेद्वद ।
येनास्य न भवेन्मृत्युर्जगद्रक्षाशिरोमणेः ॥ २७ ॥
अस्त्येवासौ तवाधीनश्चेत्करोषीति तामसौ ।
धिग्प्राणान्यदि जीवेत वदाश्विति जगाद ताम् ॥ २८ ॥

1 Corrupt.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यैषा चण्डी महादेवी राज्ञैवोपासितान्तके ।
तां चेत्पुत्रं बलिं दद्यात्तस्य चान्यच्छतं समाः ।। २९ ।
किमेतावति दुष्कार्ये कृतं विद्धीत्यसौ तदा ।
निशम्यान्तर्दधे सोऽपि तद्विधातुं गृहान्ययौ ।। ३० ।।
स राज्ञा पृष्ठतोभूतो गुप्तं प्राप्य गृहं वधूम् ।
प्रबोध्य व्रतमाचष्ट स्वस्तीत्युक्त्वा द्रुतं गतम् ।। ३१ ।।
प्रबोध्याख्याहि कृत्वाऽसौ तथा पुत्रोऽपि तं यदा ।
पितुर्जीवेत्प्रभुःप्राणान्धिगानृण्यं सतां गतिः ।। ३२ ।।
श्रुत्वेति वाक्यमुत्तिष्ठ वेलेयं मात्यगाच्छुभा ।
उत्थायासौ ततः शीघ्रं पित्रा चण्ड्यालयं प्रति ।। ३३ ।।
स्कन्धयोस्तं समारोप्य जवाद्गच्छंश्च योषया ।
कन्यया चान्वितो वीरो देव्यालयमवाप्तवान् ।। ३४ ।।
गुप्तं राजाप्यसौ दृष्ट्वा सत्त्वं तेषां समं तदा ।
अतीव विस्मितोऽपूर्वः सर्ग इत्यंतराद्दत[1] ।। ३५ ।।
अन्वययौ[1] ... दूरे पश्यन्हृष्टतनूरुहः ।
प्राप्यैवांसाद्वतीर्याऽसौ पुरो देव्याः कृतौ मुदा ।। ३६ ।।
नत्वा देह्युपहारेण राजा जीवतु शूद्रकः ।
अभ्यद्वर्षशतं देवि कुर्याद्राज्यमकण्टकम् ।। ३७ ।।
इति विज्ञायन्तं तं निरूप्य मुदितः पिता ।
उत्थाप्य खड्गं तत्पुत्रशिरो देव्या उपाहरत् ।
सत्पुत्रेणोपहारेण राजा जीवत्विति ब्रुवन् ।। ३८ ।।
[ ३३ अ ] स्वामिभक्तो न चान्योऽस्ति साधोर्वीरवरादतः ।
पुत्रोऽप्युपहृतो येनेत्याह वाग्दिव्यरूपिणी ।। ३९ ।।
कन्यापि सा वीरवती भ्रातुः शिरसि मस्तकम् ।
निधाय तत्क्षणं प्राणांस्तत्रैवाशु जहौ शुचा ।। ४० ।।

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वीक्ष्य माता पतिं प्राह दृष्टापत्यशुचा मया ।
कथं स्थेयं प्रभो देहि शान्तिं चानुव्रजाम्यहम् ॥ ४१ ॥
सत्यं पुत्रशुगार्तायाः किं जीवेन तवाधुना ।
प्रतीक्षस्व चितां यावद्विधास्ये कुवर्तस्तथा ॥ ४२ ॥
चित्यां कृतायां नत्वाथ देवी सेत्थं व्यजिज्ञपत् ।
जन्मान्तरेऽप्ययं भूयादार्यपुत्रः पतिर्मम ॥ ४३ ॥
*एतत्प्रभोस्तु राज्ञोस्तु मद्देहेनामुना शिवम् ।*
इत्युदीर्यैव सा साध्वी तस्मिन्नम्भोवहेलया[1] ॥ ४४ ॥
*ज्वालाकलापजटिले निपपात चितातले ।*
तत श्चिन्तयामास वीरो वीरवरोऽत्र सः ॥ ४५ ॥
निष्पन्नं राजकार्यं यद्वागुवाचाशरीरिणी ।
भरणीयं प्रियं कृत्स्नं व्ययीकृत्य कुटुंबकम् ॥ ४६ ॥
जीवयन्नेकमात्मानं मादृशः को हि शोभते ।
तत्किनात्रोपहारेणाप्येनां प्रीणामि तामम्बिकाम् ॥ ४७ ॥
इत्यालोच्य स देवीं तां स्तुत्योपस्थाय तत्क्षणम् ।
सद्यः करतलाघातेनोत्तमाङ्गं स्वमाच्छिनत् ॥ ४८ ॥
तदालोच्याखिलं तत्र च्छन्नोऽसौ शूद्रको नृपः ।
आकुलश्च सुदुःखश्च साश्चर्यश्च व्यचिन्तयत् ॥ ४९ ॥
अहो किमप्यनेनैतदन्यत्रादृष्टमश्रुतम् ।
साधुना सकुटुम्बेन दुष्करं मत्कृते कृतम ॥ ५० ॥
विचित्रेऽप्यत्र संसारे धीरः स्यादीदृशः कुतः ।
अर्पयन्प्रभोरर्थे परोक्षं यो ददात्यसून् ॥ ५१ ॥
एतस्य चोपकारस्य न कुर्यां सदृशं यदि ।
तन्मे का प्रभुता किं च जीवितव्यं पशोरिव ॥ ५२ ॥
इति संचिन्त्य नृपतिः खड्गमाकृष्य कोशतः ।
यावत्प्रवर्तते तावदुदभूद्भारती दिवः ॥ ५३ ॥

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मा साहसं कृथास्तुष्टाः सत्येनानेन ते वयम् ।
प्रत्युज्जी[३१ ब]वतु सापत्यदारो वीरवरोऽत्र सः ॥ ५४ ॥
श्रुत्वा तथैव तद्भूतं दृष्ट्वा छन्नः पुनश्च सः ।
पश्यन्नतृप्तस्तानासीद्दृष्ट्याहर्षाश्रुपूर्णया ॥ ५५ ॥
ततः स तं तथा मत्वा नत्वा वीरवरोऽम्बिकाम् ।
आदाय पुत्रदारांस्तान्सिद्धकार्यो गृहं ययौ ॥ ५६ ॥
तत्र प्रवेश्य पुत्रं तं भार्यां दुहितरं च ताम् ।
सिंहद्वारमगाद्राज्ञो रात्रौ तस्यां च पूर्ववत् ॥ ५७ ॥
राजाप्यलक्षितस्तत्र गत्वारुह्य च हर्म्यकम् ।
व्याहरच्च स्थितः सिंहद्वारे कोऽत्रेति पृच्छतः ॥ ५८ ॥
ततो वीरवरोऽवादीत्सैष तिष्ठाम्यहं प्रभो ।
देवादेशाद्गतश्चाहमभूवं तां स्त्रियं प्रति ॥ ५९ ॥
राक्षसी वचसाक्वापि दृष्टनष्टेवमागता ।
एतच्छ्रुत्वा वचस्तस्य राजा वीरवरस्य सः ॥ ६० ॥
सुतरां विस्मयाविष्टो दृष्टोदन्तो व्यचिन्तयत् ।
अहो समुद्रगम्भीरधीरसत्त्वा मनस्विनः ॥ ६१ ॥
कृत्वाप्यनन्यसामान्यमुल्लेखं नोद्गिरन्ति ये ।
प्रातश्चास्थानसमये दर्शनोपगते स्थिते ॥ ६२ ॥
तस्मिन्वीरवरे प्रीतस्तथा कृत्स्नं स भूपतिः ।
तदीयं रात्रिवृत्तान्तं मन्त्रिभ्यस्तदवर्णयत् ॥ ६३ ॥
ददौ तस्मै सपुत्राय प्रीत्या वीरवराय सः ।
लाटदेशे ततो राज्यं सकर्णाटयुते नृपः ॥ ६४ ॥
ततोऽप्यतुल्यविभवान्योन्यस्योपकारिणौ ।
आस्तां तौ सुखं वीरवरशूद्रकभूपती ॥ ६५ ॥
तद्ब्रूहि राजन्नेतेषु वीरः सर्वेषु कोऽधिकः ।
एतच्छ्रुत्वा स भूपालो वेतालं प्रत्युवाच तम् ॥ ६६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एषा प्राणैस्तु भृत्यानां भूपैरात्माभिरक्षते ।
तेषामर्थे त्यजन्देहं शूद्रकोऽत्र विशिष्यते ॥ ६७ ॥

**इति स्वामिभृत्यानुकूल्यप्राशधीकथनं नाम कुसुमम् ।**

---

## [ ३२ ]

न्यायेनैतेनार्जनीया धीर्मनीषासौ मनीषि[ ३४ अ ]णाम् ।
न्यायेन चरतां लोक इहामुत्रच्छविन्नृणाम् । १ ॥
निदर्श्यते तथा चात्र न्यायनिर्णयगीतिका ।
उज्जयिन्याममात्योऽभूत्पुण्यसेनस्य भूपतेः ॥ २ ॥
*हरिस्वामीति तस्याभूत्कन्या लावण्यविश्रुता ।*
सोमप्रभेति सा मातृमुखेन भ्रातृतातकौ ॥ ३ ॥
आह शूरस्य वा ज्ञातुर्देया विज्ञानिनोऽपि वा ।
अहं नान्यस्य चेदर्थो जीवितेन ममास्ति वः ॥ ४ ॥
इत्थं त्रयोऽपि तच्चित्तास्ते यदा पितरं नृपः ।
*प्रैषिषद्विग्रहायात[1] दाक्षिणात्यस्य संधये ॥ ५ ॥*
कृतार्थश्च समायातो मार्गमध्ये स केनचित् ।
याचितो भूद्विजाग्र्येण श्रुततद्रूपसंपदा ॥ ६ ॥
कन्यापणं श्रावितोऽसौ विज्ञान्यस्मीति प्राह तम् ।
दर्शयेति स तेनोक्तो रथं तत्क्षणकल्पितम् ॥ ७ ॥
आरोप्य दर्शयामास स्वर्गादींस्तं द्विजं द्विजः ।
दृष्ट्वा विज्ञानमेतस्य प्रतिशुश्राव तां सुताम् ॥ ८ ॥
सप्तमेऽह्नि विवाहस्ते भवितेति पणे कृते ।
आययौ स्वगृहं दैवाद्वरं मातापि चिन्वति ॥ ९ ॥
भ्रातापि पृथगेवैतौ पणपूर्वं परावुभौ ।
तस्मिन्नेव दिने वव्रे ज्ञानिनं शूरमेव च ॥ १० ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हरिस्वामी गृहायातो भार्यापुत्रावुवाच ह ।
कन्यापणोऽर्धमार्गे मे पूर्णोऽभूच्छिल्पिनेति सः ॥ ११ ॥
निशम्य तौ तथैवास्मा ऊचतुः स्वकृतं पणं ।
पृथक्पृथक्तथैकस्मिन्दिने सप्तदिनावधौ ॥ १२ ॥
सोऽपि तेनाकुलो जातो वरत्रयनिमन्त्रणात् ।
अथ तस्मिन्दिने तत्र त्रयोऽप्येते स्वसंविदा ॥ १३ ॥
आययुर्ज्ञानिविज्ञानिशूराः सापि तदा सुता ।
दैवान्निश्शंकमेवाभूत्पिहिता नायिता क्वचित् ॥ १४ ॥
ततोऽब्रवीद्विजस्तत्र ज्ञानिनं कथ्यतां त्वया ।
[३४ ब] कैषेति सोऽपि तं प्राह रक्षसा धूमकेतुना । १५ ॥
नीतालयं निजं विंध्यवासिना जीवितास्ति सा ।
दुःखार्तं विलपन्तं तं कथमाप्येति सोऽब्रवीत् ॥ १६ ॥
विज्ञानी मा शुचो नेष्ये क्षणात्तत्र क्षणात्पुनः ।
प्रत्यानयामि वेलैषा नात्येत्यप्यौपयामिकी ॥ १७ ॥
इत्युक्त्वा तत्क्षणं कृत्वा रथं सर्वास्त्रसंयुतम् ।
तत्रारोप्य हरिस्वामिज्ञानिशूरान्वगामिनि ॥ १८ ॥
तान्समं प्रापयामास क्षणाद्विंध्याटवीभुवि ।
ज्ञानिना तां समाख्यातां वसतिं तत्र रक्षसः ॥ १९ ॥
ततोऽत्र राक्षसं क्रुद्धं ज्ञातवृत्तान्तनिर्गतम् ।
स शूरो योधयामास हरिस्वामिपुरस्कृतः ॥ २० ॥
क्षणेन च सुसंग्रामदुर्मदस्यापि रक्षसः ।
अर्धचन्द्रेण बाणेन शूरस्तस्याच्छिनच्छिरः ॥ २१ ॥
हते रक्षसि तां सोमप्रभां प्राप्तां तदास्पदाम् ।
आदाय विज्ञानिरथेनाययुस्ते ततोऽखिलाः ॥ २२ ॥

1 Corrupt.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्रास्या लग्नवेलायामागतायामुदभूत्कलिः ।
तेषां त्रयाणां ज्ञान्याह प्राप्तेयं ज्ञानतो मया । २३ ॥
न चेत्तत्र नयिष्ये वः कथमाप्ता भवेदिति ।
विज्ञान्याहाह शूरस्तु न चेत्तं रक्षसं रणे ॥ २४ ॥
हन्यां कथमियं प्राप्ता भवेदिति कलौ पुनः ।
जाते पिता शुचार्तोऽसौ तूष्णीं तस्थावधोमुखः ॥ २५ ॥
तत्कस्मै सात्र देयेति राजन्वदतु मे भवान् ।
इति वेतालतः श्रुत्वा ततो मौनं विहाय च ॥ २६ ॥
स त्रिविक्रमसेनस्तं जगादैवं महीपतिः ।
शूराय सा प्रदातव्या येन देहपणोद्यमात् ॥ २७ ॥
अर्जिता बाहुवीर्येण हत्वा तं युधि राक्षसम् ।
ज्ञानिविज्ञानौ त्वस्य यात्राकर्मकरौ कृतौ ।
उभौ गणकतक्षाणौ परोपकरणं न किम् ॥ २८ ॥

**इति न्यायधीपरीक्षाभिधानं द्वात्रिंशं कुसुमम् ॥**

---

## [ ३३ ]

किं नामागोचरं सूक्ष्मधियां जगति ये क्षणात् ।
[ ३५ अ ] करामलकवत्सर्वं दर्शयन्ति तथेत्यताम् ॥ १ ॥
शोभावत्यां पुरे योऽभूद्यशःकेतुरिति श्रुतः ।
जातायां तीर्थयात्रायां तत्रागाद्धवलाभिधः ॥ २ ॥
वैश्यपुत्रो ददर्शासावलत्य रजकात्मजाम् ।
तीर्थे कामं शिरोच्छिन्नगात्रोऽभिज्ञाय तत्कुलम् ॥ ३ ॥
गतो मूर्च्छासमापन्नः पितृभ्यामनुमोदितः ।
समाश्वसिहि सा जात्यमावयोरिति दौत्यतः ॥ ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बभूव तत्तथा येन तेनाप्तानङ्गसुंदरी ।
कृतोद्वाहश्च स तया साकं दर्शनसक्तया ।
भार्यया स्वपितुर्गेहं जगाम धवलः कृती ॥ ५ ॥
अथ श्यालोऽस्य भगिनीं तं चापि भगिनीपतिम् ।
निमन्त्रयितुमायातः सुखं तत्रावसद्दिनम् ॥ ६ ॥
प्रातर्मदनसुन्दर्या श्वाशुर्येण च तेन सः ।
सहितो धवलः प्रायाद्गृहं तच्छ्वशुरं प्रति ॥ ७ ॥
प्राप्य शोभावतीं तां च पुरीमात्मतृतीयकः ।
ददर्शान्तिकमाप्तोऽसौ श्रीगौर्यायतनं महत् ॥ ८ ॥
एतया मे मनःकामः पूरितस्तीर्थयात्रया ।
कथं नामाहमेतस्या गत्वा कुर्वे न चार्चनम् ॥ ९ ॥
इति कृत्वा मतिं भार्यां श्यालं चाह प्रयात भोः ।
एनां गौरीं समभ्यर्च्य यामो वयमथालयम् ॥ १० ॥
नेत्यसौ प्रतिषिद्धश्च तिष्ठतं केवलं त्वहम् ।
गत्वाभ्यर्च्याप्यस्तं[1] शीघ्रं यामीत्युक्त्वा ययौ त्वरम् ॥ ११ ॥
प्राप्यात्र विधितोमुष्यजाताधीर्वतु[1] जातुचित् ।
नार्चितेयं मया सम्यग्देवी तत्साम्प्रतं मया ॥ १२ ॥
तोष्याऽसौ जीवदानेनेत्याकलय्य कृपाणिकाम् ।
उत्थाप्य तद्गर्भगृहाद्यात्रिकैः प्राभृतीकृताम् ॥ १३ ॥
बद्ध्वा शिरोरुहैः घण्टाशृङ्खलायां निजं शिरः ।
चिच्छेदासौ तया तच्च च्छिन्नं द्रागपतद्भुवि ॥ १४ ॥
किंच यावत्स नायाति तावद्गत्वा तमीक्षितुम् ।
[२५ ब]तत्रैव देवीभवने तच्छ्वाशुर्यो विवेश सः ॥ १५ ॥
तद्दृष्ट्वा मोहितः सोऽपि शिरस्तेनासिनाच्छिनत् ।
तच्चिंतया गता सापि दृष्ट्वा तौ च तथागतौ ॥ १६ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हा किमेतद्धतास्मीति विलपन्त्यपतद्भुवि ।
क्षणाच्चोत्थाय शोचन्ती तावर्कांडहृतावुभौ ॥ १७ ॥
किं ममाप्यधुनानेन जीवितेनेत्यचिंतयत् ।
इति धृत्वा मतिं देवीं सा तां नत्वाभ्यजिज्ञपत् ॥ १८ ॥
अस्त्येवं दुर्भगाया मे देवि भक्तार्तिनाशिनि ।
किंत्वियत्प्रार्थये भूयो जन्मन्येतौ प्रदेहि मे ॥ १९ ॥
पतिं च भ्रातरं चैव स्मृतिं चेमां महेश्वरि ।
इति विज्ञप्य तां यावत्पाशं कण्ठेऽर्पयत्यसौ ॥ २० ॥
तावत्तत्रोच्चचारेत्थं भारती गगनाङ्गणात् ।
मा कृथाः साहसं पुत्रि बालाया अपि तेऽमुना ॥ २१ ॥
सत्त्वोत्कर्षेण तुष्टास्मि पाशमेकं परित्यज ।
संश्लेषय शिरः स्वं स्वं भर्तृभ्रातृकबन्धयोः ।
उत्तिष्ठतां च जीवन्तावेतौ द्वावपिमद्वरात् ॥ २२ ॥
निशम्यैतच्च संत्यज्य पाशं हर्षसुसंभ्रमा ।
अविभाव्यातिरभसाक्रान्ता मदनसुन्दरी ॥ २३ ॥
बाला भर्तृशिरो भ्रातृदेहेन समयोजयत् ।
भ्रातुश्च भर्तृदेहेन तथा विधिनियोगतः ॥ २४ ॥
ततोऽक्षताङ्गौ जीवन्तावुभावुत्तस्थतुश्च तौ ।
शिरोविनिमयाज्जातसंकरौ काययोर्मिथः ॥ २५ ॥
अथान्योऽन्योदितस्वस्ववृत्तसंतुष्टमानसाः ।
प्रणम्य देवीं शर्वाणीं यथेष्टं ते ययुस्त्रयः ॥ २६ ॥
यान्ती विलोक्य स्वकृतं शिरोविनिमयं तयोः ।
धिया किं कार्यतामूढा साभून्मदनसुन्दरी ॥ २७ ॥
तद्ब्रूहि राजन्को भर्ता तस्याः संकीर्णयोस्तयोः ।
स विक्रमसेनोऽत्र तमेवं प्रतिभाषत ॥ २८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्स्थितं तत्पतिशिरः स वै तस्याः पतिस्तयोः ।
प्रधानं हि शिरोऽङ्गेषु [ ३६ अ ] प्रत्यभिज्ञा च तद्गतेति ॥२९॥

**इति सूक्ष्मधीवर्णनाभिधं त्रयस्त्रिंशं कुसुमम् ।**

---

## [ ३४ ]

महासंकटपातेऽपि सत्यसंधो विमुच्यते ।
यथा वणिक्सुता तस्मात्संधा सत्या विधीयताम् ॥ १ ॥
तथा च कामाढ्यपुरे सार्थवाहोऽर्थदत्तकः ।
कन्यास्यानङ्गसेनेति बभूवोर्वीविभूषणम् ॥ २ ॥
तामेकदा निजोद्याने क्रीडन्तीं ससखीवृताम् ।
दृष्ट्वा सोऽद्य भ्रातृसुहृद्धर्मदत्तो वणिक्सुतः ॥ ३ ॥
अभूदनङ्गबाणौघसंतापहृतचेतनः ।
ततः सा ययौ गेहं सोऽपि तद्व्याप्रिताशयः ॥ ४ ॥
गत्वालयं भ्रमन्भूमौ पपाताथ प्रयत्नतः ।
रात्रिं जागरणेनैव निनाय स्वजनैर्वृतः ॥ ५ ॥
प्रातर्गत्वैकिकां तत्र विलोक्यैतां प्रतीक्षणीम् ।
सखीस्तूर्णमुपेत्याऽसौ जग्रहे चरणौ नतः ॥ ६ ॥
कन्याहं परभार्या च पितादान्मां भविष्यति ।
दिनैः कतिपयैश्चैव विवाह इति गच्छ भोः ॥ ७ ॥
मा पश्येत्कश्चिदेवापि दोषस्ते प्रभविष्यति ।
त्वय्यपि प्रेमबद्धाऽहं तावद्गच्छ पितुर्व्रतम् ॥ ८ ॥
पूरयित्वा तवाप्येष कामो मे भवितोदयी ।
इत्युक्त्वा स तयात्यर्थं धर्मदत्तो जगाद ताम् ॥ ९ ॥
अस्त्वेवं च न जीवेयं विना तु भवतीमहम् ।
श्रुत्वोद्वाहो भवत्वेष विवाहः प्राप्नुयात्फलम् ॥ १० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्ततस्त्वामेष्यामि निश्चितं प्रणयार्जिता ।
श्रुत्वेतत्सोऽब्रवीच्चेष्टापरपूर्वा मम प्रिया ॥ ११ ॥
परभुक्ते हि कमले किमलेर्जायते रतिः ।
इति श्रुत्वातुरं वीक्ष्य तमप्येषाह मा शुचः ॥ १२ ॥
जातोद्वाहाहमभ्येमि त्वां पूर्वं तं ततोऽपि भोः ।
उक्तोप्यनाश्वस्तमतिर्ग्रहेण पुनरप्यसौ ॥ १३ ॥
पादौ नत्वा ययाचे तां सापि प्रत्ययमादधौ ।
ततस्तेनोज्झिता विप्रा विवे[३६ ब]श निजमंदिरम् ॥ १४ ॥
प्राप्तायां लग्नवेलायां कृतोद्वाहं पतेर्गृहम् ।
गत्वा शय्यानिषण्णापि विमुखाभूत्ससान्त्विता ॥ १५ ॥
अप्यसौ न यदा तस्याभिमुखाभूत्तदा तु सः ।
अहोद्विग्नो न चेत्तेहं प्रियो यस्तं व्रजेरिति ॥ १६ ॥
तच्छ्रुत्वा व्रीडिताहैनं त्वं प्राणेभ्योऽसि मे परम् ।
विज्ञप्तिमवधार्यैनां सपणं देहि मेऽभयम् ॥ १७ ॥
अस्त्वेवमपि किं ब्रूहि जगादासौ च सत्रपा ।
उद्याने क्रीडमानां मां दृष्ट्वा भ्रातृसखातुरः ॥ १८ ॥
हठप्रणयभंगीभिश्चक्रमे त्यक्तुमुद्यतः ।
प्राणान्यदा तदासौ मे सपणं मानितः पितुः ॥ १९ ॥
धर्मं च शरणीकृत्य प्राग्यास्ये त्वामिति प्रभो ।
तन्मे सत्यवचः पाल्यमनुमन्यस्व तत्प्रभो ॥ २० ॥
यावत्तन्निकटं गत्वा क्षणेनोपैमि तेऽन्तिकम् ।
न हि शक्नोम्यतिक्रान्तुं सत्यमाबाल्यसेवितम् ॥ २१ ॥
वज्रपातसमं श्रुत्वा वचस्तस्यास्तदप्यसौ ।
विचिन्त्य येयमनया ध्रुवं नात्र ग्रहो मम ॥ २२ ॥
फलेद्भवति सत्यं तदस्याः फलितमीक्षताम् ।
प्रभावश्चाथ सत्यस्येत्येवमेष तथेति ताम् ॥ २३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उक्तासौ निर्ययौ तस्माद्गृहात्सत्यनियंत्रिता ।
यान्त्यसौ सरणौ दैवाच्चौरेणैकेन सत्वरम् ॥ २४ ॥
क्रुद्धा विग्राह कोऽसीति चौरोहमिति वादिनम् ।
तं हराभरणौघं मे याहीति तमुवाच सः ॥ २५ ॥
किं मेऽमीभिः परं जीवस्त्वामेवार्थयते बले ।
चेत्प्रसीदसि जीवोऽयं सुखी भवति नान्यथा ॥ २६ ॥
त्वां हृत्वाप्येष जीवो मे त्वामेवानुव्रजिष्यति ।
इत्युक्त्वा निजवृत्तान्तमाख्यायार्थयते स्म तम् ॥ २७ ॥
क्षमस्व मे क्षणं यावत्कृत्वा सत्यानुपालनम् ।
इहस्थस्यैव ते पार्श्वमागमिष्यामि सत्वरम् ॥ २८ ॥
श्रुत्वैतत्सत्यसन्धां तां मत्वा चौरो मु[३७ अ]मोच सः ।
तस्थौ प्रतीक्षमाणश्च स तत्रैव तदागमम् ॥ २९ ॥
तदन्तिकमितो गत्वागतास्मीति तमाह सा ।
हृष्टोऽसौ सर्ववृत्तान्तं तां पप्रच्छ तथोदितः ॥ ३० ॥
आह सत्येन ते तुष्टो गच्छ नेक्षेत चापरः ।
यथेति तेन त्यक्ता सा ययौ चौरान्तिकं पुनः ॥ ३१ ॥
दृष्ट्वा तामप्यसावाह किं ते वृत्तमभूद्वद ।
इति तेनानुयुक्तासौ सत्यवृत्तमबोधयत् ॥ ३२ ॥
निशम्य सत्यतुष्टस्तेऽहमप्येत्येहि सत्वरम् ।
मा भूद्भीरिति तन्मुक्ता पतिगेहं मुदा ययौ ॥ ३३ ॥
तत्र गुप्तप्रविष्टा सा प्रहृष्टा वर्णयन्निजम् ।
सर्वं वृत्तं स .... सत्यं[1] तच्चेंगितादिना ॥ ३४ ॥
अदुष्टां सर्वथा भार्यामभिनन्द्य कुलोचिताम् ।
तस्थौ समुद्रदत्तोऽथ तया सह यथासुखम् ॥ ३५ ॥
तद्राजन्कतमस्त्यागी त्रयाणामत्र भाति ते ।
वद सत्येन चेन्नाथ शिरस्ते निपतिष्यति ॥ ३६ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चौरस्त्यागी न वणिजाविति सत्यं विभाति मे ।
पतिपरानुरक्तां तां विलोक्य कुलजः कथम् ॥ ३७ ॥
हार्दं कुर्यात्परः कालजीर्णवेगो भयादपि ।
सासौ प्रातर्नृपायाहेति च चौरस्तु पापधीः ॥ ३८ ॥
निरपेक्षो गुप्तचारी तामत्याक्षीच्च यत्तदा ।
सभूषां तेन मे भाति चौरस्त्यागीति नान्यथा ॥ ३९ ॥

इति सत्यप्रतिज्ञाफलकथनं नामकं चतुस्त्रिंशं कुसुमम् ।

---

[ ३५ ]

किं नाम मन्त्रिणां गुप्तं मन्त्रधीः सर्वसाधनम् ।
तथा विचरतां नेह स्खलनं जातु जायते ॥ १ ॥
वाराणसीति नगरी क्रीडास्थानं यदीशितुः ।
तत्राभूद्राजमान्योऽग्र्यो देवस्वामीति वाडवः ॥ २ ॥
हरिस्वामीति पुत्रोऽस्य तस्य लावण्यमूर्तिभृत् ।
[ ३७ ब ] तिलोत्तमादिनाकस्त्रीरूपगर्वापहारिणी ॥ ३ ॥
भार्या स चानया साकं हरिस्वामी कदाचन ।
रतिक्लान्तो ययौ निद्रां हर्म्ये शीतांशुशीतले ॥ ४ ॥
तन्मार्गेण ययौ तत्र विद्याधरकुमारकः ।
तां रतिक्रमसंस्रस्तवस्त्रयुक्ताङ्गसौष्ठवाम् ॥ ५ ॥
विलोक्य कामविद्धाङ्गो हृत्वागान्नभसा गृहान् ।
प्रबुद्धोऽसावदृष्ट्वा तामवेक्ष्याथार्गलादिकम् ॥ ६ ॥
तथैव शोकसंतप्तो बभूव बहुदुःखितः ।
कृत्वापि यत्नं परितो यदा नैनामवाप्तवान् ॥ ७ ॥
तदोद्विग्नहृदाश्वेष तीर्थयात्रामिषाद्गृहात् ।
निर्गत्य व्यचरद्देशांस्तदाप्तिधृतचेतनः ॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जातु श्रान्तः क्षुधार्तोऽसौ द्वारि कस्यापि ब्रह्मणः।
मन्त्रिणोऽधोमुखस्तस्थौ चिन्तयन्हृदि तां परम् ॥ ९ ॥
तथा स्थितं तमालोक्य मन्त्रिणस्तस्य गेहिनी।
दयार्द्रचित्ताह विप्रः क्षुधार्तो मा म्रियेदसौ ॥ १० ॥
इति ध्यात्वा तमेतस्मै दत्वा सघृतशर्करम्।
आह वापीसमीपेऽत्र गत्वा भुंक्ष्व मुदेति तम् ॥ ११ ॥
गत्वात्र वटमूलेऽसौ पात्रं संस्थाप्य वापिकाम्।
ययौ क्षालयितुं पाणिपादे सुस्थाशयस्तदा ॥ १२ ॥
प्रक्षाल्य पाणिपादं च वाप्यामाचम्य चाप्यसौ।
यावद्भक्षयितुं तुष्टः पायसं याति तत्तदा ॥ १३ ॥
गृहीत्वा पादचंच्वाभ्यां कृष्णसर्पं बलाद्विलात्।
श्येनः कुतश्चिदागत्य तटे तस्मिन्नुपाविशत् ॥ १४ ॥
तेन तस्योह्यमानस्य सर्पस्याक्रम्य पक्षिणा।
उत्क्रान्तजीवितस्यास्याद्विषलाला विनिर्ययौ ॥ १५ ॥
साधस्तत्र पपातान्नपात्रेऽस्याज्ञातमेव च।
भुक्त्वा शेषं तदेवाशु ददाह हृदि[३८ अ]वाडवः ॥ १६ ॥
क्षणात्प्राणार्तिदुःखेन विलपत्सेति वाडवः।
अहो विधौ विपर्यस्ते न विपर्यस्यतीह किम् ॥ १७ ॥
यद्विषीभूतमन्नं मे सक्षीरघृतशर्करम्।
गत्वा तां मन्त्रिणस्तस्य विप्रस्योवाच गेहिनीम् ॥ १८ ॥
त्वद्दत्ताद्विषमन्नान्मे जातं तद्विषमंत्रिणम्।
कंचित्समानय क्षिप्रं ब्रह्महत्यान्यथास्ति ते ॥ १९ ॥
इत्युक्त्वैव स तां साध्वीं किमेतदिति विह्वलाम्।
हरिस्वामी परावृत्तनेत्रः प्राणैर्व्ययुज्यत ॥ २० ॥
ततः सा तेन निर्दोषाप्यातिथीय्यपि मन्त्रिणा।
भार्या निष्कासिता गेहान्मिथ्यातिथिवधक्रुधा ॥ २१ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साप्युत्पन्नमृषावद्या प्रशस्तादपि कर्मणः ।
जातावमाना तपसे साध्वी तीर्थान्यशिश्रियत् ॥ २२ ॥
कस्य विप्रवधः सोऽस्तु सर्पश्येनान्नदेष्विह ।
उदभूद्धर्मराजाग्रे वादो माभूच्च निश्चयः ॥ २३ ॥
तत्र विक्रमसेन त्वं राजन्ब्रूहि ममाग्रतः ।
इत्थं निशम्य तस्यासौ मुक्तमानोऽब्रवीदिदम् ॥ २४ ॥
तस्य तत्पातकं तावत्सर्पस्य यदि वास्य कः ।
विवशस्यापराधोऽस्ति भक्ष्यमाणस्य शत्रुणा ॥ २५ ॥
अथ श्येनस्य तेनाऽपि किं दृष्टं विदितात्मना ।
अकस्मात्प्राप्तमानीय भक्ष्यं भक्षयता निजम् ॥ २६ ॥
दम्पत्योरन्नदात्रोर्वा तयोरेकस्य तत्कृतः ।
तदहं तस्य मन्ये सा ब्रह्महत्या जडात्मनः ।
अविचार्यैव यो ब्रूयादेषामेकतरस्य ताम् ॥ २७ ॥

**इति नीतिकल्पे मन्त्रिनैपुण्यकथनाभिधानं कुसुमम् ।**

---

## [ ३५ अ ]

कुर्वन्तु नाम सामान्यजना नृपतिविप्रियम् ।
तथापि नो च्यवन्ते ते स्वधर्मार्जनपालनात् ॥ १ ॥
कलेरगम्ये कनकपुराख्ये नगरेऽभवत् ।
भूपो यशोधराभिख्यः पालयामास मेदिनीम् ॥ २ ॥
जगदाह्लादकश्चण्डप्रतापोऽखण्डमण्डलः ।
विधिना यश्च चन्द्रार्कावेकीकृत्येव निर्ममे ॥ ३ ॥
तस्य राज्ञः पुरे तत्र बभूवैको महावणिक् ।
उन्मादिनीति तस्याभूत्कन्या दर्शनमात्र[ ३८ ब ]तः ॥ ४ ॥
या जगन्मदयामास यौवनस्थातिसुन्दरी ।
तां तथोन्मादिनीं दृष्ट्वा सर्वलोकावमानिनीम् ॥ ५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यशोधरं तं राजानं स गत्वा तत्पिता वणिक् ।
वृत्तं निवेद्य सुतयान्यमंत्रयत नीतिवित् ॥ ६ ॥

राजा हि सर्व रत्नानां प्रभुः कृत्स्नेऽपि भूतले ।
तत्स्वीकृत्यानुगृह्णातु देवस्तां परथापि वा ॥ ७ ॥

इत्याकर्ण्य स विप्रांस्तान्सादरं व्यसृजन्मुदा ।
तल्लक्षणपरीक्षार्थं गत्वाऽवेक्ष्य च तां मुदा ॥ ८ ॥

चुक्षुभुस्तेन या नाम हृतचित्ता न किंचन ।
करोति देशरक्षादिधर्मं चिंतयतानघाः ॥ ९ ॥

इति संमन्त्र्य ते शीघ्रमागत्यास्मै न्यवेदयन् ।
सत्यं रूपवती किन्तु वैधव्याङ्कितमस्तका ॥ १० ॥

निशम्य गूढं राजासौ निषिषेधार्थिनं च तम् ।
तदाज्ञया वणिक्पुत्रीं ददौ तद्बलपालिने ॥ ११ ॥

अथ सा तद्गृहे तस्थौ भर्त्रा तेन समं सुखम् ।
कुलक्षणेत्यहं राज्ञा त्यक्तेत्यात्तविमानना ॥ १२ ॥[1]

अथ जातुमहोद्रष्टुमथो राजा विनिर्ययौ ।
सर्वतो वनिताश्चामुं द्रष्टुमुद्घोषबोधिताः ॥ १३ ॥

अहो अनेन मुक्ताहमिति यत्तान्नृपो वपुः ।
दर्शितोऽसौ मुमोहश्चालोक्य या रूपसंपदा ॥ १४ ॥

भृत्यैराश्वासितश्चैव राजधानीं प्रविश्य सः ।
पृष्टेभ्यो बुबुधे तेभ्यस्तां प्रागुपनतोज्झिताम् ॥ १५ ॥

ततो निर्वास्य देशात्तांस्तत्कुलक्षणवेदिनः ।
विप्राननुदिनं दध्यौ तामेवोक्तः स भूपतिः ॥ १६ ॥

अहो ह्रीतिस्मरन्नन्तः क्षीयते स्म दिने दिने ।
कामाग्निपुटपाकेन पच्यमानः स भूपतिः ॥ १७ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्रिया निगूहमानश्च पृच्छद्भयो बाह्यलक्षणैः ।
कृच्छ्राच्छशंस चाप्तेभ्यः स्वपीडाकारणं स तत् ॥ १८ ॥
अलं संतप्य भजसे स्वाधीनां तर्हि किं तु ताम् ।
इत्युक्तस्तैश्च नैवेतदनुमेने स धार्मिकः ॥ १९ ॥
ततो बलधरो बुद्ध्वा स सेनापतिरेत्य तम् ।
प्रभुमभ्यर्थयामास सद्भक्त्या चरणानतः ॥ २० ॥
दासस्त्री तव दास्येव न सा देव पराङ्गना ।
स्वयं चाहं प्रयच्छामि तद्भार्यां स्वीकुरुष्व मे ॥ २१ ॥
अथ वा तां त्यजामीह देव देवकुले ततः ।
न दोषो ग्रहणे तस्या देव देवकुलस्त्रियः ॥ २२ ॥
इति स्वसेनापतिना [ ३९ अ ] निर्बन्धेन स पार्थिवः ।
तेनानुनाय्यमानोऽपि सांतःकोपमुवाच तम् ॥ २३ ॥
राजा भूत्वा कथं कुर्यामधर्ममहमीदृशम् ।
मय्युल्लंघितमर्यादे को हि तिष्ठेत्स्ववर्त्मनि ॥ २४ ॥
भक्तोऽपि च भवान्पापे नियोजयसि मां कथम् ।
परलोकमहादुःखहेतौ क्षणसुखावहम् ॥ २५ ॥
न क्षमिष्ये च ते धर्म्यान्दारान्यदि विहास्यसि ।
सहते मादृशः को हि तादृशं धर्मविप्लवम् ॥ २६ ॥
तद्वरं मृत्युरित्युक्त्वा स राजा निषिध तम् ।
त्यजन्त्युत्तमसत्त्वा हि प्राणानपि न सत्पथम् ॥ २७ ॥
ततः क्रमेण तेनैव स्मरज्वरभरोष्मणा ।
प्रक्षीणदेहः प्रययौ स यशःशेषतां नृपः ॥ २८ ॥
सेनापतिश्चासहिष्णुस्तथा तं प्रमयं प्रभोः ।
सोऽग्निं विवेश भक्तानामनिर्वाच्यं हि चेष्टितम् ॥ २९ ॥
तदेतयोः को नृपते सेनापतिमहीभृतोः ।
सत्त्वेनाभ्यधिको ब्रूहीत्युक्तो राजेति सोऽवदत् ॥ ३० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सेनापतिः कथं नात्र राजन्नभ्यधिको वद ।
यस्तथा स्वामिने भक्त्या स्वां भार्यां तां तथाविधाम् ॥ ३१ ॥
स्वचिरं ज्ञातसंभोगसुखास्वादोऽप्युपानयत् ।
आत्मानं चाग्निसाच्चक्रे तस्मिन्पञ्चत्वमागते ॥ ३२ ॥
अनास्वादिततद्भोगस्तत्कान्तां तु जहौ नृपः ।
इति पृष्टः चाहैनं किं चित्रं कुलपुत्रकः ॥ ३३ ॥
सेनापतिः स्वभक्त्या यत्स्वाम्यर्थे तत्तथाकरोत् ।
प्राणैरपि च दासानां स्वामिसंरक्षणं हितम् ॥ ३४ ॥
राजानस्तु सदाध्माता गजा इव निरंकुशाः ।
छिन्दन्ति धर्ममर्यादाशृङ्खलां विषयोन्मुखाः ॥ ३५ ॥
तेषां ह्युद्रिक्तचित्तानामभिषेकाम्बुभिः समम् ।
विचारो विगलत्योघेनोह्यमान इवाखिलः ॥ ३६ ॥
क्षिप्यन्त इव चोद्धूयचलच्चामरमारुतैः ।
वृद्धोपदिष्टशास्त्रार्थरजोमषकमक्षिकाः ॥ ३७ ॥
आतपत्रेण सत्यं च सूर्यालोको निवर्तते ।
विभूतिवात्योपहता दृष्टिर्मार्गं च नेक्षते ॥ ३८ ॥
तदेते वि[३९ ब]पदं प्राप्ता मारमोहितचेतसः ।
जगद्विजयिनोऽपीह राजानो नहुषादयः ॥ ३९ ॥
एष राजा पुनः पृथ्व्यामेकच्छत्रोऽपि यत्तथा ।
उन्मादिन्या चपलया लक्ष्म्येव न विमोहितः ॥ ४० ॥
प्राणानपि च धर्मात्मा तत्याज न पुनः पदम् ।
अमार्गे निदधे धीरस्तेनासौ मेऽधिको मतः ॥ ४१ ॥

**इति नीतिकल्पे प्रजासर्गराजसर्गकथनाभिधं पञ्चत्रिंशं कुसुमम् ॥***

---

* This aught to have been numbered as thirty-six. The copyist seems to have forgotten to count 'मन्त्रिनेपुण्यकथनाभिधं कुसुमम्'। We have, therefore, marked this as ( ३५ अ ) so as to keep the original order as we have done in the case of the 9th Kusum.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ ३६ ]

नास्थाने जातु वप्तव्यं विद्याबीजं मनीषिणा ।
दूरे तिष्ठतु तद्वृद्धिर्यतो मूलेऽपि संशयः ॥ १ ॥
तथा च श्रूयतामत्र कथोदर्काय धीमताम् ।
अस्ति चोज्जयिनीनाम्न्यां पुर्यां चन्द्रप्रभप्रभोः ॥ २ ॥
देवस्वामीति विप्राग्र्योऽमात्यो गुरुरिवापरः ।
तस्य कालेन तनयश्चन्द्रस्वामीत्यजायत ॥ ३ ॥
सोऽधीतविद्योऽपि युवा द्यूतैकव्यसनोऽभवत् ।
द्यूतकारसभां गत्वा क्रीडित्वा कितवैः सह ॥ ४ ॥
वस्त्रादि हारयित्वाऽसौ धनं सर्वमहारयत् ।
मृग्यमाणं च यत्नादात्स तद्धनमसंभवि ॥
तदवष्टभ्य सभ्येन लगुडैः पर्यताड्यत ॥ ५ ॥
लगुडाहतसर्वाङ्गः पाषाणमिव निश्चलम् ।
कृत्वा मृतमिवात्मानं तस्थौ विप्रसुतोऽथ सः ॥ ६ ॥
तथैव दिवसान्द्वित्रांस्तत्र तस्मिन्नवस्थिते ।
सभ्योऽसौ कितवानाह श्रितानेनाश्मता ध्रुवम् ॥ ७ ॥
तदेनं दूरतो नीत्वान्धकूपे क्षिपताचिरम् ।
धनं दास्येऽखिलं वोऽहं मा शंकत धनं प्रति ॥ ८ ॥
इत्युक्तास्तेन कितवास्तं चन्द्रस्वामिनं ततः ।
अरण्यं निन्युरुत्क्षिप्य दूरं कूपगवेषिणः ॥ ९ ॥
तत्रैको वृद्धकितवः प्राह किं कूपयातनात् ।
मृतोऽसौ किमिहैवाशु न ह्रीयेत कृतं श्रमैः ॥ १० ॥
कूपेऽसावुज्झित इति वच्मश्चैव तथेति ते ।
कृत्वा गताश्च सोऽप्याशुत्थाय शून्यं सुरालयम् ॥ ११ ॥
प्रविश्याश्वस्य दुःखार्तश्चिन्तयामास धूर्तराट् ।
अहो प्रमुषितो नग्नः किं करोमि [४० अ] क यास्यहम् ॥१२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पिता बन्धुः सुहृद्वापि दृष्ट्वा किं नु वदेन्मम ।
तत्संप्रति स्थितोऽस्मीह नक्तं च क्षुत्प्रशान्तये ॥ १३ ॥
पश्यामि निर्गत्य कथं यतिष्ये भोजनं प्रति ।
इत्यालोचयतस्तस्य क्रान्तस्यानम्बरस्य च ।
अस्तं गते रवौ भूतिदिग्धाङ्गो यतिराययौ ॥ १४ ॥
स चन्द्रस्वामिनं दृष्ट्वा कोऽसीति परिपृच्छ्य च ।
श्रुत्वा तस्माच्च वृत्तान्तं प्रह्वं तं यतिरब्रवीत् ॥ १५ ॥
त्वं ममेहाश्रमं प्राप्तः क्षुत्क्रान्तो चिन्तितोऽतिथिः ।
तदुत्तिष्ठ कृतस्नानो भिक्षाभागं समाहर ॥ १६ ॥
इत्युक्तो व्रतिनानेन चन्द्रस्वामी जगाद तम् ।
विप्रोऽहं भगवन्भोक्ष्ये भिक्षाभागं कथं तव ॥ १७ ॥
तच्छ्रुत्वा स व्रती सिद्धः प्रविश्य मठिकां निजाम् ।
इष्टसम्पादिनीं विद्यां सस्मारातिथिवल्लभः ॥ १८ ॥
संस्मृतोपस्थितां तां च किं करोमीति वादिनीम् ।
अमुष्यार्चामतिथयेः कुरुष्वेति शशास ताम् ॥ १९ ॥
तथेत्युक्ते तया तत्र सोद्यानं साङ्गनाजनम् ।
पुरं सौवर्णमुत्पन्नं चन्द्रस्वामी ददर्श सः ॥ २० ॥
विस्मितं च तमभ्येत्य तस्माद्वाराङ्गनाः पुरात् ।
उचुरुत्तिष्ठ भद्रेहि स्नाहि भुंक्ष्व त्यज श्रमम् ॥ २१ ॥
इत्युक्त्वाभ्यन्तरं नीत्वा स्नपयित्वानुलिप्य च ।
ताभिः स दत्तसद्वस्त्रो निन्येऽन्यद्वासकग्रहम् ॥ २२ ॥
तत्रान्तः स ददर्शैकां प्रधानयुवतिं युवा ।
सर्वाङ्गसुन्दरीं धात्रा कौतुकादिव निर्मिताम् ॥ २३ ॥
तया स सोत्कयोत्थाय स्वासनार्धे निवेशितः ।
बुभुजे दिव्यमाहारं तथैवात्र समं तया ॥ २४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पर्यंकशयने भेजे तत्संभोगसुखं निशि ।
प्रातः प्रबुद्धश्चापश्यत्तमेवात्र शिवालयम् ।
न ता दिव्याङ्गना नापि पुरं तच्च परिच्छदम् ॥ २५ ॥
ततः स विघ्नं निर्यातं मठिकातः स्मिताननम् ।
पृष्टरात्रिसुखं प्रातस्तापसं तं व्यजिज्ञपत् ॥ २६ ॥
त्वत्प्रसादादहं रात्रावुषितो भगवत्सुखम् ।
किं तु यास्य[४० ब]न्ति मे प्राणास्तया दिव्यस्त्रिया विना ॥२७॥
तच्छ्रुत्वा स तपस्वी तं हसन्कारुणिकोऽब्रवीत् ।
इहैवास्व पुनर्नक्तं भविष्यति तथैव ते ॥ २८ ॥
इत्युक्त्वा व्रतिना तेन तदुक्त्यैव प्रतिक्षपम् ।
चन्द्रस्वाम्यत्र सोऽभुंक्त भोगं तं तत्प्रसादतः ॥ २९ ॥
बुद्ध्वा च तं शनैर्विद्याप्रभावं विधिचोदितः ।
एकदा तापसेन्द्रं तं संप्रसाद्यान्वयाचत ॥ ३० ॥
सत्यं कृपा चेद्भगवन्मयि ते शरणागते ।
तदेतां देहि मे विद्यां यत्प्रभावोऽयमीदृशः ॥ ३१ ॥
इति ब्रुवाणं निर्बन्धात्तं प्रत्याह स तापसः ।
असाध्या तव विद्येयं साध्यतेऽन्तर्जले ह्यसौ ॥ ३२ ॥
तत्र चैषा सृजत्याशु जपतः साधकस्य तत् ।
मायाजालं विमोहाय येन सिद्धिं न सोऽश्नुते ॥ ३३ ॥
अस्थानार्पणतो यावद्गुरोरपि विनश्यति ।
मत्सिद्धयैव फले सिद्धे किं ग्रहेणामुना तव ॥ ३४ ॥
मत्सिद्धिहान्या मा जातु तवैतदपि नश्यति ।
एवं तपस्विनोक्तोऽपि चन्द्रस्वामीग्रहेण सः ॥ ३५ ॥
शिक्षामि शैवं माभूद्वश्चिन्तात्रेति तमब्रवीत् ।
ततोऽस्मै प्रतिपेदे तां विद्यां दातुं स तापसः ॥ ३६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बताश्रितानुरोधेन किं न कुर्वन्ति साधवः ।
ततो नीत्वा नदीतीरं स तं स्माह महाव्रती ॥ ३७ ॥
यत्त्वं विद्यां जपन्मायां यदा द्रक्ष्यसि तां तदा ।
मायाग्निमेव प्रविशेर्विद्यया बोधितो मया ॥ ३८ ॥
अहं च तावत्स्थास्यामि तथैवेह नदीतटे ।
इत्युक्त्वाध्यापयामास तमाचान्तं शुचिं शुचिः ।
स चन्द्रस्वामिनं विद्यां सम्यक्तां व्रतिनां वरः ॥ ३९ ॥
ततस्तीरस्थिते तस्मिन्गुरौ विप्रः प्रणम्य तम् ।
चन्द्रस्वामी रभसान्नदीमवततार ताम् ॥ ४० ॥
तस्या अन्तर्जले विद्यां तां जपन्सहसैव सः ।
तन्मायामोहितो मिथ्या सर्वं विस्मृत्य जन्म तत् ॥ ४१ ॥
वीक्षते यावदन्यस्यामुत्पन्नः स्वात्मना पुरि ।
पुत्रो विप्रस्य कस्यापि वृद्धिं स शनकैर्गतः ॥ ४२ ॥
कृतोपनयनो[ ४१ अ ]ऽधीतविद्यो दारानवाप्य च।
तद्दुःखसुखसंपूर्णः संपन्नापत्यवान्क्रमात् ॥ ४३ ॥
ततश्चात्र सुतस्नेहस्वीकृतस्तत्तदाचरत् ।
ततो बद्धरतिः सार्धं पितृभ्यां बन्धुभिस्तथा ॥ ४४ ॥
एवं जन्मान्तरे मिथ्या स तस्यानुभुवाभ्रमः ।
काले प्रबोधिनीं विद्यां गुरुः प्रायुंक्त तापसः ॥ ४५ ॥
स तद्विद्याप्रयोगेण सद्यस्तेन प्रबोधितः ।
स्मृत्वात्मानं गुरुं तं च मायाजालमवेत्य तत् ॥ ४६ ॥
उद्यतोऽग्निप्रवेशाय विद्यासाध्यबलाप्तये ।
परिवार्यनिषेधद्भिर्वृद्धाप्तगुरुबन्धुभिः ॥ ४७ ॥
बहुधा बोध्यमानोऽपि तद्दिव्यसुखलोभतः ।
स सज्जितचितं प्रायान्नदीतीरं सबान्धवः ॥ ४८ ॥
दृष्ट्वा च पितरौ वृद्धौ भार्यां च मरणोद्यताम् ।
क्रन्दन्ति बालापत्यानि सोऽथ मोहादचिन्तयत् ॥ ४९ ॥

1 Corrupt.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कष्टं म्रियन्ते स्वजनाः सर्वेऽमी विशतोऽनलम् ।
न च जानामि किं सत्यं गुरोस्तद्वचनं न वा ॥ ५० ॥
तत्किं न प्रविशाम्यग्निमुत किं न विशामि वा ।
अथवा तत्कथं मिथ्या स्यात्संवादि गुरोर्वचः ॥ ५१ ॥
तद्विशाम्यनलं काममित्यन्तःप्रविमृश्य सः ।
अग्निप्रवेशं विदधे चन्द्रस्वामी किल द्विजः ॥ ५२ ॥
अनुभूतहिमस्पर्शो वह्नेश्च स सविस्मयः ।
शान्तः सायं नदीतीरादुत्थायोपययौ तटम् ॥ ५३ ॥
तत्र स्थित्वा च तं दृष्ट्वा गुरुं नत्वा च पादयोः ।
पृच्छन्तं चाग्निशैत्यान्तं स्वमुदन्तमवर्णयत् ॥ ५४ ॥
ततस्तं स गुरुः प्राह वत्स शंके कृतस्त्वया ।
अपचारोऽत्र शीतस्ते कथं जातोऽग्निरन्यथा ॥ ५५ ॥
अदृष्टमेतदेतस्या विद्यायाः साधने यतः ।
एतद्गुरोर्वचः श्रुत्वा चन्द्रस्वामी जगाद सः ॥ ५६ ॥
नापचारो मया कश्चिद्विहितो भगवन्निति ।
ततः स तद्गुरोर्विद्यां जिज्ञासुस्तां समस्मरत् ॥ ५७ ॥
न च साविरभूत्तस्य न तच्छिष्यस्य तस्य वा ।
नष्टविद्याविबोधौ तौ विषण्णौ जग्मतुस्ततः ॥ ५८ ॥
राजन्संशयमेतं छिन्द्धि[४१ ब]मम ब्रूहि हेतुना केन ।
विहितेऽपि यथोद्दिष्टे कर्मणि विद्योभयोर्नष्टा ॥ ५९ ॥
न दुष्करेणापि हि कर्मणैव ।
 शुद्धेन सिद्धिः पुरुषस्य लभ्या ।
यावन्न निष्कम्पविकल्पशुद्धं ।
 धीरं मनो निर्मलसत्त्ववृत्ति ॥ ६० ॥
तस्यात्र मन्दस्य तु विप्रयून-
 श्चित्तं प्रबुध्यापि विकल्पते स्म ।
विद्या न सा तेन गतास्य सिद्धि-
 मस्थानदानाच्च गुरोर्विनष्टा ॥ ६१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवधाय धियं तस्माच्छ्रद्धां कृत्वा दृढां स गुरुवचने ।
विद्याभ्यासात्फलिता भवति मुदे तस्य चास्यापि ॥ ६२ ॥

इत्यस्थानोपदेशकथनाभिधं कुसुमम् ।

---

## [ ३७ ]

धर्मविचारः सूक्ष्मो जागर्यं तत्र सन्मतिभिः ।
अतिविस्मयदात्रेयं निशम्यतां सत्कथा विबुधैः ॥ १ ॥
वक्रोलकपुरे सूर्यप्रभराजाभिरक्षिते ।
वसुधा वसुधाराभी रराज परितोभृता ॥ २ ॥
सर्वसंपत्समृद्धस्य तस्यैकाभूदनिर्वृतिः ।
नोपपद्यत यत्पुत्रो बहुष्वंतःपुरेष्वपि ॥ ३ ॥
अस्त्येवं ताम्रलिप्त्यां च धनपालाभिधो वणिक् ।
बभूव रूपसंपत्तिसूचिताप्सरसां वरा ॥ ४ ॥
अवतीर्णा सुतां यस्यां युवतौ स मृतो वणिक् ।
गोत्रजैस्तद्धने तस्य हृतेऽखिलतया वधूः ॥ ५ ॥
अशरण्या समादाय भूषणाद्यं निशामुखे ।
सुतया सहया निर्गत्य प्रतस्थे दूरकांक्षया ॥ ६ ॥
ध्वान्तेन बहिरन्तश्च सा दुःखेनान्ध्यमापिता ।
कृच्छ्राद्बहिः पुरात्प्रायात्सुताहस्तावलंबिनी ॥ ७ ॥
तत्र संतमसे यान्ती विधियोगादलक्षितं ।
अंसेनाताडयच्चौरं शूलाग्रारोपितं पथि ॥ ८ ॥
स सजीवस्तदंसाग्रघट्टनाधिकपीडितः ।
आः क्षते क्षारमेतन्मे क्षिप्तं केनेत्यभाषत ॥ ९ ॥
ततस्तत्रैव सा कोऽसीत्यपृच्छत्तं वणिग्वधूः ।
प्रत्युवाच ततश्चौरश्चौरोऽहमिति दीनगीः ॥ १० ॥
शूले चाद्यापि पापस्य नोत्क्रामन्ति ममासवः ।
[ ४२ अ ] तदार्ये त्वं मम ब्रुहि कासि केवं प्रयासि च ॥ ११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तच्छ्रुत्वा साह यावत्प्राक्तावच्चंद्रद्युतिर्बभौ ।
येन तत्पुत्रिकास्येन द्वितीयेन्दुरिवोद्गतः ॥ १२ ॥
आलोक्य तन्मुखेन्दुं स चौरः शूलाधिरोपितः ।
आह तन्मातरं कन्यामिमां देहीति हर्षयन् ॥ १३ ॥
ददाम्येकसहस्रं ते निष्काणामिति साह तम् ।
एतद्दशाधिरूढस्य किं तवेप्सितयानया ॥ १४ ॥
सिद्धयेदिति स चाहैनां परलोको भवेदिति ।
दत्तेति पणिते यस्मादियं पुत्रवती भवेत् ।
तेन मे क्षेत्रजेनापि लोकानन्त्यं भवेत्किल ॥ १५ ॥
इत्येवं प्रार्थये त्वां तु तद्विधत्स्व मदीप्सितम् ।
तच्छ्रुत्वा सा वणिग्योषिल्लोभात्तत्प्रत्यपद्यत ॥ १६ ॥
आनीय च कुतोऽप्यम्बु पाणौ चौरस्य तस्य सा ।
एषा सुता मया तुभ्यं सत्यं दत्तेत्यपातयत् ॥ १७ ॥
सोऽपि तद्दुहितुर्दत्तयथोक्ताज्ञो जगाद ताम् ।
गच्छामुष्य वटस्याधः खात्वा सर्वं गृहाण तत् ॥ १८ ॥
गतासोर्दाहयित्वा मे देहं युक्त्या विसृज्य च ।
अस्थीनि तीर्थे ससुता गच्छ वक्रोलकं पुरम् ॥ १९ ॥
तत्र सूर्यप्रभे तस्य सौराज्यसुखिते जने ।
निरुपद्रवनिश्चिन्ता स्थास्यसि त्वं यथेच्छसि ॥ २० ॥
इत्युक्त्वा तृषितः पीत्वा स्वभार्योपहृतं जलम् ।
शूलव्यथव्यथोत्क्रान्तजीवः सोऽभूदथापि सा ॥ २१ ॥
तत्र स्थित्वा च युक्त्या तद्दाहयित्वा कलेवरम् ।
चौरस्य तस्य चास्थीनि तीर्थे प्रापय्य योगतः ॥ २२ ॥
परेद्युश्चात्र निर्गत्य प्राप वक्रोलकं पुरम् ।
तत्र क्रीत्वालयं पुत्र्या सहोवास गतव्यथा ॥ २३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विष्णुस्वामीत्युपाध्यायशिष्यस्तत्रातिरूपवान् ।
विद्याप्राप्त्यनुरक्तोऽपि वाञ्छति स्म विलासिनीम् ।
हंसावलीं वारवधूं शतपञ्चपणामिति ॥ २४ ॥
तं स्वर्णनिष्कविरहाद्विषण्णं सा ददर्श ह ।
क्षामाभिरूपवपुषं [ ४२ ब ] हर्म्यारूढा वणिक्सुता ॥ २५ ॥
तद्रूपहृतचित्ता च भर्तुश्चौरस्य तस्य सा ।
स्मृत्वानुज्ञां समीपस्थां युक्त्यावोचत्स्वमातरम् ॥ २६ ॥
अम्ब विप्रसुतस्यास्य पश्यैते रूपयौवने ।
कीदृशी बत विश्वस्य नयनामृतवर्षिणी ॥ २७ ॥
एतच्छ्रुत्वैव तस्मिंस्तां बद्धभावामवेत्य च ।
चिन्तयामास माता सा त्वनया भर्तनुज्ञया ॥ २८ ॥
विधेयैवं क्रियेषोऽस्तु वर इत्यर्थ्यते न किम् ।
इति ध्यात्वा निजां चेटिं प्रैषिषत्सा तदन्तिके ॥ २९ ॥
सोऽप्यागतां निशम्यैतां हृष्टोप्याह्वाधिपिडितः ।
यदि हंसावलीहेतोर्दीनारशतपञ्चकम् ॥ ३० ॥
सौवर्णं दीयते मह्यं तदेकां यामि यामिनीम् ।
श्रुत्वा चेटिवचो माता स्वीकृत्यैतद्ययौ च सः ॥ ३१ ॥
तया समं च नीत्वा तां रात्रिं संभोगलीलया ।
निर्गत्य च ततो गुप्तं ययौ प्रातर्यथागतम् ॥ ३२ ॥
सापि तस्मात्तया रात्र्या सगर्भाभूद्वणिक्सुता ।
काले च सुषुवे पुत्रं लक्षणानुमितायतीम् ॥ ३३ ॥
परितुष्टां तदा तां च सुतोत्पत्त्या स मातृकम् ।
आदिदेश हरः स्वप्ने दर्शितस्ववपुर्निशि ॥ ३४ ॥
युक्तं हेमसहस्रेण नीत्वा बालमुषस्यमुम् ।
सूर्यप्रभनृपस्येह मंचस्थं द्वारि मुंच तम् ॥ ३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं स्यात्क्षेममित्युक्ता शूलिना सा वणिक्सुता ।
तन्माता च प्रबुध्यैते स्वप्नमन्योन्यमूचतुः ॥ ३६ ॥
नीत्वा च तं त्यजतुर्भगवत्प्रयत्याच्छिशुम् ।
राज्ञः सूर्यप्रभस्यास्य सिंहद्वारे स हेमकम् ॥ ३७ ॥
तावच्च तमपि स्वप्ने सुतचिंतातुरं सदा ।
[४३ अ]तत्र सूर्यप्रभं देवमादिदेश वृषध्वजः ॥ ३८ ॥
उत्तिष्ठ राजन्बालस्ते सिंहद्वारे सकाञ्चनः ।
केनापि स्थापितो ह्यत्र मंचकस्थं गृहाण तम् ॥ ३९ ॥
इत्युक्तः शंभुना प्रातः प्रबुद्धोऽपि तथैव सः ।
द्वाःस्थैः प्रविश्य विज्ञप्तो निर्ययौ नृपतिः स्वयम् ॥ ४० ॥
दृष्ट्वा च सिंहद्वारे तं बालं स कनकोत्तरम् ।
रेखाच्छत्रध्वजाद्यंकपाणिपादं शुभां कृतिम् ॥ ४१ ॥
दत्तो ममोचितः पुत्रो भर्गेनायमिति ब्रुवन् ।
स्वयं गृहीत्वा बाहुभ्यां राजधानीं विवेश सः ॥ ४२ ॥
नृत्तवाद्यादिभिर्नीत्वा द्वादशाहांस्ततः परम् ।
पुत्रं चन्द्रप्रभं नाम्ना चक्रे सूर्यप्रभो नृपः ॥ ४३ ॥
क्रमाद्वृद्धं ततो दृष्ट्वा प्रकृत्युद्वाहनक्षमम् ।
राज्येऽभिषिच्य वै कृती वृद्धो वाराणसीं ययौ ॥ ४४ ॥
व्रजन्नप्राप्त एवासौ काशीं मार्गे मृतिं गतः ।
श्रुत्वापि पितृविपत्तिं तामनुशोच्य कृतक्रियः ॥ ४५ ॥
सोऽपि चन्द्रप्रभो राजा सचिवान्धार्मिकोऽब्रवीत् ।
तातस्य तावत्केनाहमनृणो भवितुं क्षमः ॥ ४६ ॥
तथा चैकस्वहस्तेन ददाम्येतस्य निष्कृतिम् ।
नीत्वा क्षिपामि गंगायामस्थीन्यस्य यथाविधि ॥ ४७ ॥
गत्वा सर्वपितृभ्यश्च गयापिण्डं ददाम्यहम् ।
द्रष्टव्याणि च तीर्थानि यावन्मोक्षमदो वयः ॥
पश्चात्को वेत्ति किं भावि शरीरे क्षणनश्वरे ॥ ४८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विचित्रवेशभाषादिविलोकनविनोदितः ।
पश्यन्नानाविधान्देशान्क्रमात्प्राप स जाह्नवीम् ॥ ४९ ॥
तथावतीर्णस्तस्यां च कृतस्नानो यथाविधि ।
चिक्षेपास्थीनि भूपस्य तस्य सूर्यप्रभस्य सः ॥ ५० ॥
तत्रोपोष्य कृतस्नानदानश्राद्धादि सत्क्रिया।
वाराणसीं जगामाशु स चंद्रप्रभभूपतिः ॥ ५१ ॥
तस्यां दिनान्युपोष्य त्रीण्यभ्यर्च्य च वृषध्वजम् ।
[४३ ब]भोगैर्निजोचितैस्तैस्तैः प्रययौ स गयां प्रति ॥ ५२ ॥
नानारण्यान्यतिक्रम्य पुण्यं प्राप गयाशिरः ।
विधाय तत्र च श्राद्धं विधिवद्भूरिदक्षिणम् ॥ ५३ ॥
चन्द्रप्रभः स राजात्र धर्मारण्यमुपेयिवान् ।
गयाकूपेऽस्य ददतः पितुः पिण्डं तदन्तरात् ॥ ५४ ॥
समुत्तस्थुः समादातुं त्रयो मानुषपाणयः ।
तद्दृष्ट्वैव च विभ्रान्तः किमेतदिति पार्थिवः ।
कस्मिन्हस्ते क्षिपे पिण्डमित्यपृच्छन्निजान्द्विजान् ॥ ५५ ॥
ते तमूचुरयं तावदेकश्चौरस्य निश्चितम् ।
हस्तो लोहमयः शंकुर्यस्मिन्देवैष दृश्यते ॥ ५६ ॥
द्वितीयो ब्राह्मणस्यायं करो धृतपवित्रकः ।
राज्ञः पाणिस्तृतीयोऽयं साङ्गुलीयः सुलक्षणः ॥ ५७ ॥
तन्न विद्मः क्व पिण्डोऽयं निक्षिपेः किमिदं भवेत्।
त्रयाणां पितृपाणीनां विप्राणां चापि संशये ॥ ५८ ॥
इत्थं जाते नृप ब्रूहि किं हस्ते पिण्डयोग्यता ।
इति श्रुत्वा स भूपालो धर्मज्ञस्तमभाषत ॥ ५९ ॥
चौरस्य हस्ते दातव्यः स पिण्डः क्षेत्रजो यतः ।
चन्द्रप्रभः स नृपतिः पुत्रस्तस्यैव नान्ययोः ॥ ६० ॥
विप्रस्य जनकस्यापि न स पुत्रो हि विद्यते ।
विक्रीतो हि धनेनात्मा तामेकां तेन यामिनीम् ॥ ६१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राज्ञः सूर्यप्रभस्यापि संस्काराधानवर्धनैः ।
भवेत्स पुत्रो न स्याच्चेत्स्वधनं तस्य तत्कृते ॥ ६२ ॥
शिशोस्तस्य हि शीर्षान्ते मंचकस्थस्य हेम यत् ।
न्यस्तमासीत्तदेवास्य मूल्यं संवर्धनादिके ॥ ६३ ॥
तस्माद्धस्तोदकप्राप्ता तन्माला तस्य येन सा ।
आज्ञा तज्जनने दत्ता यस्यापि निखिलं धनं ॥ ६४ ॥
तस्य स क्षेत्रजः पुत्रश्चौरस्य तेन विप्रयोः ।
पिण्डस्तस्यैव हस्ते च देयस्तेनेति मे मतिः ॥ ६५ ॥

**इति धर्मविचाराभिधं सप्तत्रिंशं कुसुमम् ।**

---

## [ ३८ ]

[ ४४ अ ] जनैरुपार्जितो यत्नात्सुगुणो विधुरे विधौ ।
सा दत्तां संपदं नाम जायते च विपत्तये ॥ १ ॥
तथा च श्रूयतां राजाभूत्पुरे पुष्पकाह्वये ।
वाराहाख्योऽस्य सौराज्ये ब्राह्मणः जहृषुः परम् ॥ २ ॥
अग्रहारो भवत्तस्य राष्ट्रे ब्रह्मस्थलाभिधः ।
विष्णुस्वामीति तत्राभूद्द्विजः कुलपतिः सुताः ॥ ३ ॥
चत्वारो जज्ञिरे तस्य विज्ञाननयशालिनः ।
अधीतवेदेषूत्क्रान्तशैशवेषु च तेषु सः ॥ ४ ॥
विष्णुस्वामी दिवं प्रायाद्भार्ययानुगता स्वया ।
ततस्ते तत्र तत्पुत्राः सर्वेऽप्यानाथ्यतः स्थिताः ॥ ५ ॥
गोत्रजैर्हृतसर्वस्वा मंत्रयांचक्रिरे मिथः ।
नास्तीह गतिरस्माकं तद्व्रजामो न किं वयम् ॥ ६ ॥
यामो मातामहगृहं ग्रामं यज्ञस्थलाभिधम् ।
एतदेव विनिश्चित्य प्रस्थितौ भैक्ष्यभोजिनः ।
मातामहगृहं प्राप्तास्तेऽथ तद्बहुभिर्दिनैः ॥ ७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र मातामहाभावान्मातुलैर्दत्तसंश्रयाः ।
भुंजानास्तद्गृहे तस्थुः स्वाध्यायाभ्यासतत्पराः ॥ ८ ॥
कालक्रमाच्च तेषां ते मातुलानामकिंचनाः ।
अवज्ञापात्रतां जग्मुर्भोजनाच्छादनादिषु ॥ ९ ॥
ततः स्वजनसंस्फूर्जेदवमानहतात्मनाम् ।
तेषां रहः सचिन्तानां ज्येष्ठो भ्राताब्रवीदिदम् ॥ १० ॥
भो भ्रातरः किं क्रियते सर्वमाचेष्टते विधिः ।
न शक्यं पुरुषस्येह क्वचित्किंचित्कदाचन ॥ ११ ॥
अहं ह्युद्वेगतो भ्राम्यन्प्राप्तोऽद्य पितृकानने ।
विपन्नं स्थितमद्राक्षं स्रस्ताङ्गं पुरुषं भुवि ॥ १२ ॥
अचिंतयच्च दृष्ट्वा तमहं त्वां स्पृहयन्गतिम् ।
धन्योऽयमेवं विश्रांतो दुःखभारं विमुच्य यः ॥ १३ ॥
इति संचिन्त्य तत्कालं कृत्वा मरणनिश्चयम् ।
वृक्षाग्रसंगिना पाशेनात्मानमुदलम्बयम् ॥ १४ ॥
यावच्च मे विसंज्ञस्य तदा निर्यान्ति नासवः ।
तावत्त्रुटितपाशोऽत्र पातितोऽस्मि[४४ ब]महीतले ॥ १५ ॥
लब्धसंज्ञश्च केनापि पुंसा क्षिप्रं कृपालुना ।
आश्वास्यमानमात्मानमपश्यं पटमारुतैः ॥ १६ ॥
ततोऽपि मां समाश्वास्य स च क्वापि गतः पुमान् ।
अहं चेहागतस्त्यक्त्वा तादृशं मरणोद्यमम् ॥ १७ ॥
तदेवं नेच्छति विधौ न मर्तुमपि शक्यते ।
इदानीं च तनुं तीर्थे तपसा दाहयाम्यहम् ॥ १८ ॥
येन निर्धनतादुःखभागी न स्यामहं पुनः ।
इत्युक्तवन्तं तं ज्येष्ठं कनिष्ठा भ्रातरोऽब्रुवन् ॥ १९ ॥
अर्थैर्विना कथं प्राज्ञोऽप्यार्य दुःखेन बाध्यते ।
किं न वेत्सि यदर्थानां शरदभ्रचला गतिः ॥ २० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आहृत्य रक्षमाणापि यत्नेनापि विरागिणी ।
असन्मैत्री च वेश्या च श्रीश्च कस्य कदा स्थिरा ॥ २१ ॥
तदुद्योगेन स गुणः कोऽप्युपार्ज्यो मनस्विनः ।
आनीयन्ते हठाद्बद्ध्वा येनार्थहरिणा मुहुः ॥ २२ ॥
इत्युक्तो भ्रातृभिर्धैर्यं क्षणाज्ज्येष्ठोऽवलम्ब्य सः ।
प्रोवाच को गुणस्तादृगर्जनीयो भवेदिति ॥ २३ ॥
ततो विचिन्त्य सर्वे वदन्ति स्म परस्परम् ।
विचिन्त्य पृथ्वीं विज्ञानं किंचिच्छिक्षामहे वयम् ॥ २४ ॥
निश्चित्य तैश्च संकेतस्थानमुक्त्वा समागमे ।
एकैकशस्ते चत्वारश्चतस्रः प्रययुर्दिशः ॥ २५ ॥
याति काले च मिलितास्ते संकेतनिकेतने ।
किं केन शिक्षितमिति भ्रातरोऽन्योन्यमब्रुवन् ॥ २६ ॥
अथात्रैकोऽब्रवीदिदृग्विज्ञानं शिक्षितं मया ।
येनास्थिशकलं प्राप्य प्राणिनो यस्य कस्यचित् ॥ २७ ॥
उत्पादयाम्यहं तस्मिन्मांसं तदुचितं क्षणात् ।
एतत्तस्य वचः श्रुत्वा द्वितीयस्तेष्वभाषत ॥ २८ ॥
अहं तत्रैव संजाते मांसेऽस्थिशकले किल ।
जाने जनयितुं लोमत्वचं तत्प्राणिसंभवि ॥ २९ ॥
ततस्तृतीयोऽप्यवदज्जाने तत्रैव चाप्यहम् ।
तत्प्राण्यवयवान्स्रष्टुं जातत्वग्लोममांसके ॥ ३० ॥
चतुर्थश्च ततोवादीदुत्पन्नावयवकृतिम् ।
तमेव प्राणिनं प्राणैर्युतं कर्तुमवैम्यहम् ॥ ३१ ॥
[४५ अ] एवमुक्त्वा मिथः स्वस्वविज्ञानप्रथनाय ते ।
चत्वारोऽप्यस्थिखंडाय प्रययुर्भ्रातरोऽटवीम् ॥ ३२ ॥
तत्र सिंहस्य ते प्रापुरस्थिखण्डं विधेर्वशात् ।
अविज्ञातविशेषाच्च गृह्णन्ति स्म तथैव तत् ॥ ३३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकश्च तत्समुच्चैतस्ततो मांसैरयोजयत् ।
द्वितीयो जनयत्तस्य तद्वत्त्वग्लोमसंहतीः ॥ ३४ ॥
तृतीयश्चाखिलैरङ्गैस्तद्योग्यैस्तदपूरयत् ।
चतुर्थश्चाददे तस्य सिंहीभूतस्य जीवितम् ॥ ३५ ॥
उदतिष्ठदथोद्धूतसटाभारोऽतिभैरवः ।
स दंष्ट्रासंकटमुखः सिंहः खरनखांकुशः ॥ ३६ ॥
भावित्वा च स्वनिर्मातॄंस्तानेव चतुरोऽपि सः ।
अवधीत्केसरी दृप्तो विवेश च वनान्तरम् ॥ ३७ ॥
मूले ह्यविकृते दैवे सिक्तः प्रज्ञानवारिणा ।
नयालवालः फलति प्रायः पौरुषपादपः ॥ ३८ ॥
इत्थं विप्रसुतेष्वेतेषु मृतेषु वद कस्य सा ।
हत्या लगति सर्वेषां निर्मातृत्वे समे स्थिते ॥ ३९ ॥
सत्यं सर्वेऽपि कर्तारो जीवदायी विशिष्यते ।
सिंहाकृतिं विलोक्यापि विज्ञानालोकना बलात् ।
येन प्राणोऽर्पितस्तस्य तदेकाश्रयगास्त्यसौ ॥ ४० ॥

**इति विधिवक्रतायां गुणार्जनवैफल्यकथनं नामाष्टात्रिंशं कुसुमम् ।**

---

## [ ३९ ]

अतीव विषमं जीवचरितं तत्र राजभिः ।
धिया समवधातव्यं परथा विषमा गतिः ॥ १ ॥
तथा च श्रूयतां सम्यक्नयसाड्गुण्यबृंहिता ।
कथेयं विबुधैः सम्यग्लोकानंत्यधृतादरैः ॥ २ ॥
अस्ति वाराणसी नाम पुरारिवसतिः पुरी ।
हारयष्टिरिवाभाति यस्याः स्वर्गतरंगिणी ॥ ३ ॥
तस्यां प्रतापमुकुटो राजाभूत्तनयोऽस्य च ।
रूपशौर्ययुतो वज्रमुकुटाख्यो स वै सुहृत् ॥ ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शरीराभ्याधिको मंत्रिपुत्रो बुद्धिशरीरकः ।
( संज्ञायां कन्, बुद्धिशरीराख्य इत्यर्थः )
स जातु तेन मृगयासंगाद्दूरमितो वने ॥ ५ ॥

महत्सरो ददर्शात्र स्ना[४५ b]र्थे कांचिदागताम् ।
सा जहार मनस्तस्य राजपुत्रस्य तत्क्षणात् ॥ ६ ॥

सोऽप्यहार्षीत्ततस्तस्याः युवा दृष्ट्वा विलोचने ।
यथा नैक्षत सा कन्या लज्जां स्वामप्यलंकृतिम् ॥ ७ ॥

यूनि पश्यति तस्मिन्सा केयं स्यादिति सानुगे ।
करोति स्मोत्पलं चक्रे गृहीत्वा पुष्पशेखरात् ॥ ८ ॥

चिरं च दन्तरचनां चकाराधाय च व्यधात् ।
पद्मं शिरसि साकूतं हृदये चादधे करम् ॥ ९ ॥

क्षणाच्च सा ययौ कन्या नीयमानानुगैस्तदा ।
सोऽपि गत्वा स्वनगरीं तथर्त्ते[1] कृच्छ्रमासदत् ॥ १० ॥

अनभिज्ञः स्वयं सख्या मन्त्रिपुत्रेण तेन सः ।
मा शुचो विदितं सर्वं मया तस्या इतीरितः ॥ ११ ॥

किं न दृष्टं त्वया तद्यत्संज्ञया सूचितं तया ।
न्यस्तं यदुत्पलं कर्णे तेनैत्तत्ते तयोदितम् ॥ १२ ॥

कर्णोत्पलस्य राष्ट्रेऽहं निवसामि महीभृतः ।
कृता यद्दन्तरचना तयैतत्सूचितं तव ॥ १३ ॥

तत्र जानीहि मां दन्तघाटकस्य सुतामिति ।
पद्मावतीति नामोक्तं तयोक्तं सितपद्मया ॥ १४ ॥

त्वयि प्राणार्पणं प्रोक्तं हृदयार्पितहस्तया ।
राजादयोऽप्यमी सर्वे विदिताः सन्ति लोकतः ॥ १५ ॥

ममेति विदितं सर्वं तत्तस्या इंगितं प्रभो ।
इत्यसौ तेन संज्ञप्तो हृष्टः संमन्त्र्य तद्युतः ॥ १६ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रियार्थे मृगयाव्याजात्पुनस्तगमदिशम् ।
कलिङ्गविषयं गत्वा कर्णोत्पलमहीभृतः ॥ १७ ॥
अन्विष्य दृष्ट्वा भवनं दन्तघाटस्य तस्य च ।
तदूरे च वासार्थमेकस्याः वृद्धयोषितः ॥ १८ ॥
गृहं प्राविशतां मन्त्रिपुत्रराजसुतावुभौ ।
तामाह मन्त्रिपुत्रोऽसौ किं मातर्दन्तघाटकम् ॥ १९ ॥
इहस्थं वेत्सि साहैवं तस्य धात्र्यहमद्य च ।
स्थापिता दुहितुः पार्श्वे पद्मावत्याश्च तेन भोः ॥ २० ॥
एवमुक्तवतीं प्रीतः स्वोत्तरीयादिदानतः ।
संतोष्य सोऽत्र वृद्धां तां मन्त्रिपुत्रोऽब्रवीत्पुनः ॥ २१ ॥
माता त्वं तद्वदेतत्तत्र गत्वा तां ब्रूहि स[४६ अ]आगतः ।
राजपुत्रस्त्वया दृष्टस्तत्र योऽभूत्सरस्तटे ॥ २२ ॥
तेन चेह तवाख्यातुं प्रेषिता प्रणयादहम् ।
श्रुत्वा गत्वाऽथ सा तुष्टागत्य पृष्टा जगाद तौ ॥ २३ ॥
युष्मदागमनं गुप्तं मय्याख्यातं निशम्य सा ।
मां निर्भर्त्स्य सिताभ्राक्तपाणिभ्यां मुखमालिपत् ॥ २४ ॥
ततः पराभवोद्विग्ना रुदत्यहमिहागता ।
एतास्तदङ्गुलीमुद्रा पुत्रौ मे पश्यतं मुखे ॥ २५ ॥
एवं तयोक्ते नैराश्यविषण्णं तं नृपात्मजम् ।
धीदेहः प्राह भद्रं ते सम्पन्नं श्रुणु चापि भोः ॥ २६ ॥
रात्रीर्दश प्रतीक्षस्व शुक्ले चन्द्रवतीरिमाः ।
इत्यङ्गुलिगयोक्तं ते तयेति मुदितो भव ॥ २७ ॥
तया दत्तव्ययौ तौ च कृत्वा मिष्टान्नभोजनम् ।
दशरात्रीरतीत्यामुं पुनः प्राहिणुतां मुदा ॥ २८ ॥
गत्वाथागत्य तौ साहाहताप्येवं तया पुनः ।
भवत्प्रीत्योक्तयावत्सौ करद्व्यङ्गुलिभिर्हता ॥ २९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सालक्तकाभिरंकास्तां पश्यतं किं करोम्यहम् ।
शंकितं राजपुत्रं तं साह मैवं श्रुणुष्व मे ॥ ३० ॥
आर्तवं त्र्यहमद्येति ततः कार्यं भवेदिति ।
गते पुनस्त्र्यहे सात्र प्रेषिता मानिता तया ॥ ३१ ॥
प्रीत्या पानादिलीलाभिर्दिनं धात्री विनोदिता ।
सायं गृहोद्यतायां च तस्यां कोलाहलो बहिः ॥ ३२ ॥
अभून्मत्तगजो लोकान्मर्षयतीति तयाप्यसौ ।
उक्ता स्पष्टपथा यातुं न युक्तं तेऽद्य भामिनि ॥ ३३ ॥
तत्पीठिकां समारोप्य बद्धलम्बनरज्जुकाम् ।
बृहद्गवाक्षेणानेन त्वामत्र प्रक्षिपामहे ॥ ३४ ॥
गृहोद्याने तत्र वृक्षमारुह्यामुं विलंघ्य च ।
प्राकारमारुह्यान्यवृक्षेण स्वगृहं व्रज ॥ ३५ ॥
साथ गत्वा यथोक्तेन पथा सर्वं शशंस तत् ।
ताभ्यां ततस्तमासह्यौ मन्त्रिपुत्रः श्रुणुष्व भोः ॥ ३६ ॥
सिद्धं तवेष्टं मार्गो हि युक्त्या ते दर्शितस्तया ।
तदनेन पथा राजन्प्रदोषे तद्गृहं विश ॥ ३७ ॥
इत्युक्तस्तद्युतोऽसौ तदुद्यानं सालमेव च ।
कृत्वारोहावरोहार्थं लम्बमानां [ ४६ब ]स पीठिकाम् ॥ ३८ ॥
विलोक्य रज्जुमास्थाय तां दास्युच्छलितोद्रुतम् ।
प्रापान्तिकं स कामिन्या मन्त्रिपुत्रोऽप्यगाद्गृहम् ॥ ३९ ॥
विलोक्य मुदिता साप्येनं मत्ताभूत्क्षणात्ततः ।
कण्ठाश्लेषादिभिस्तैस्तैरुपचारैरतोषयत् ॥ ४० ॥
ततस्तया गान्धर्वविधिनोढ़या सह ।
गुप्तं राजसुतस्तस्थौ पूर्णेच्छस्तत्र कान्तया ॥ ४१ ॥
स्थित्वा वाहानि कतिचिद्राज्ञौ तामवदत्प्रियाम् ।
सखा मम सहायातो मन्त्रिपुत्र इहास्थितः ॥ ४२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स चात्र तिष्ठत्येकाकी तव धात्री गृहे मया ।
तं संगम्य पुनश्चात्रागन्तव्यं तद्विसर्जय ॥ ४३ ॥
निशम्यासौ विचिन्त्यापि तं पप्रच्छ वदस्व मे ।
मत्संज्ञार्थः स्वयं ज्ञातोऽथवा तदुदितात्त्वया ॥ ४४ ॥
ज्ञातं तदुदितात्सर्वं दिव्यबुद्धिर्ह्यसौ मम ।
श्रुत्वा चिरं विचिन्त्यासौ प्रोवाच किमिदं चिरात् ॥ ४५ ॥
त्वयोक्तं भोः स मे भ्राता ह्युपचारैरपूजितः ।
ताम्बूलादि समाचारः कर्तव्योऽस्य ममाधुना ॥ ४६ ॥
इत्युक्तोऽनुमतः सोऽपि यथा तेनागतोऽब्रवीत् ।
सदाचारं स्वमित्राय श्रुत्वा युक्तमिदं ध्रुवम् ॥ ४६ ॥
एवं कथयतोस्तत्र विभाताभूद्विभावरी ।
अथैतयोर्विधौ सान्ध्ये निवृत्ते कुर्वतोः कथाः ॥ ४८ ॥
आगात्ताम्बूलपक्वान्नहस्ता पद्मावती सखी ।
प्रतीक्षमाणा भुक्तिं ते स्वामिनी याहि तद्द्रुतम् ॥ ४९ ॥
इदं च मन्त्रिपुत्रार्थं भोजनं प्रैषिषत्सदा ।
इत्यावेद्यैव यातायां तस्यां सोऽप्याह तं प्रभुम् ॥ ५० ॥
कौतुकं पश्य चेत्युक्त्वा शूने पूपं ततो ददौ ।
पूपं भुक्त्वैव सोऽप्याशु ममारेति विलोक्य सः ॥ ५१ ॥
किमिदं चेति पप्रच्छ तं स चैनमभाषत ।
संज्ञाज्ञानेन धूर्तं मां विदित्वा हंतुकामया ॥ ५२ ॥
तया विषान्नं प्रहितं मह्यं त्वदनुरक्तया ।
नास्मिन्सति मदेकाग्रो राजपुत्रो भवेदयम् ॥ ५३ ॥
एतद्दशश्च मुक्त्वा मां नगरीं स्वां व्रजेदिति ।
तन्मुञ्च मन्युं नैषात्र स्थाप्या नेया निजां पुरीं ॥ ५४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युक्तयेति[४७ अ]प्रवदस्मिन्बहिः कोलाहलोऽप्यभूत् ।
हा धिक्प्राज्ञसुतो बालो हत इत्युदिते रेव ॥ ५५ ॥
हृष्टो मन्त्रिसुतः प्राह तं गच्छाद्य गृहं निशि ।
तत्र तां पाययेस्तावद्यावत्पानमदेन सा ॥ ५६ ॥
निःसंज्ञा नष्टचेष्टा च गतजीवेव जायते ।
ततोऽस्याश्च सनिद्रायाः शूलेनांकं कटीतटे ॥ ५७ ॥
दत्त्वाग्नितप्तेनादाय तदाभरणसंचयम् ।
यथागतमथागच्छ येन भद्रान्तरं भवेत् ॥ ५८ ॥
कारयित्वार्पिपत्वैव त्रिशूलं राजसूनवे ।
राजपुत्रः स्वहस्ते तत्कृत्वा कुटिलकर्कशम् ॥ ५९ ॥
तथेति पूर्ववद्रात्रौ अगात्पद्मावतीगृहम् ।
अविचार्य शुचीनां हि मन्त्रिणां वाक्यमद्भुतम् ॥ ६० ॥
कृत्वा व्रत तथा सर्वं प्राग्वदागत्य चैव हि ।
भूष्याजातं प्रदर्श्यास्मै समुपाविशदन्तिके ॥ ६१ ॥
सिद्धं मनीषितं मत्वा मन्त्रिपुत्रः प्रगे स्वयम्[1] ।
गुरुर्भूत्वा विधायैनं शिष्यं पितृवनं ययौ ॥ ६२ ॥
धृत्वा तत्र च पद्मासीनाहैनं त्वमिमं नय ।
हारं मूल्येन बहुना विक्रेतुमिव दर्शय ॥ ६३ ॥
गुरुणा मम विक्रेतुमियं दत्तेत्यनाकुलः ।
सोऽतिष्ठदापणे हारं दधच्च पुररक्षिभिः ॥ ६४ ॥
गृहीतो दन्तघाटस्य हारचौरो गवेषिभिः ।
निन्ये च नगराध्यक्षनिकटे तैश्च तत्क्षणात् ॥ ६५ ॥
स तं प्राप समालोक्य साम्ना पप्रच्छ चादरात् ।
कुतस्त इति सोऽप्याह गुरुणेति स पृच्छ्यताम् ॥ ६६ ॥

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततश्चोपेत्य नत्वा तं सोऽप्याहैनं तपोधनाः ।
वयं भ्रमामोऽरण्येषु दैवाद्त्रगतिश्च नः ॥ ६७ ॥
निश्यत्र योगिनीचक्रं समागतमितस्ततः ।
अपश्यं चैकया तत्र चोद्घाटितहृदम्बुजः ॥ ६८ ॥
राजपुत्र इहानीतो भैरवाय निवेदितः ।
पानमत्ता च सा मेऽक्षमालिकां जपतः करात् ॥ ६९ ॥
हर्तुं यावत्समुद्युक्ता तावच्च जघनस्थले ।
त्रिशूलांके विधायास्य मन्त्रप्रज्वलिताग्निना ॥ ७० ॥
हृता मुक्ताव ( ४७ ब ) ली सेयं तस्याः कण्ठान्मया तदा ।
एषा च तापसानर्हा विक्रेया समवर्तते ॥ ७१ ॥
एतच्छ्रुत्वा पुराध्यक्षो गत्वा भूपं व्यजिज्ञपत् ।
श्रुत्वा राजा विलोक्यापि हारं तस्या निशम्य च ॥ ७२ ॥
प्रेक्षणप्रहितायाश्च वृद्धाया योषितो मुखात् ।
कट्यां शूलाङ्कमेतस्या मेने तां डाकिनीमिति ॥ ७३ ॥
ग्रस्तः सुतो मे डाकिन्याऽनयेति कृतनिश्चयः ।
स्वयं तस्यान्तिकं गत्वा मुनेः श्रुत्वा च निग्रहम् ॥ ७४ ॥
पितृभ्यां शोच्यमानायाः पुरान्निर्वासनं व्यधात् ।
निर्वासिताटवीस्थासौ नग्नापि न जहौ तनुम् ॥ ७५ ॥
उपायं मन्त्रिपुत्रेण तं संभाव्य तथाकृतम् ।
दिनान्ते तां च शोचन्तीमश्वारूढावुपेयतुः ॥ ७६ ॥
त्यक्ततापसवेशौ तौ मन्त्रिपुत्रनृपात्मजौ ।
आश्वास्यारोप्य तुरगे स्वराष्ट्रं निन्यतुश्च ताम् ॥ ७७ ॥
तत्र तस्थौ तया सार्कं राजपुत्रः स निर्वृतः ।
दंतघाटस्त्वरण्ये तां क्रव्यादैर्भक्षितां सुताम् ।
मत्वा व्यापादि शोकेन भार्या चानुजगाम तम् ॥ ७८ ॥
तद्राजन्संशयं छिन्धि दम्पत्योरेतयोर्वधात् ।
त्रिषु कस्याघमेतच्च, त्वं हि बुद्धिमतां वरः ॥ ७९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निशम्यं वचनं तस्य प्राहासौ नैषु कोऽप्यघम् ।
अर्हत्कर्णोत्पलस्यैतदघं राज्ञोस्ति भाति मे ॥ ८० ॥
पुनस्तमाह राज्ञः किं ते हि तत्कारिणस्त्रयः ।
काकाः किमपराध्यन्ति शुकैर्जग्धेषु शालिषु ॥ ८१ ॥
राजा ततोऽब्रवीच्चैनं न दुष्यन्ति त्रयोऽपि ते ।
मन्त्रिसूनोर्हि तत्तावत्प्रभुकार्यमपातकम् ॥ ८२ ॥
पद्मावतीराजसुतावपि कामशराग्निना ।
संतप्तावविचाराद्दावदोषौ स्वार्थमुद्यतौ ॥ ८३ ॥
कर्णोत्पलस्तु राजा स नीतिशास्त्रेष्वशिक्षितः ।
चारैः प्रजास्वनन्विष्यं सत्वशुद्धिं निजास्वपि ॥ ८४ ॥
अजान्धूर्तचरितानींगिताद्यविचक्षणः ।
( ४८ अ ) तथा तन्निर्विचारं यच्चक्रे तेन स पापभाक् ॥८५॥
तद्भाग्यैः समवाप्यापि नृपै राजासनं सदा ।
विचारैकपरैर्भाव्यं परथानर्थसंततिः ॥ ८६ ॥ इति

**इति नीतिकल्पे सूक्ष्मधर्मविचारणाख्यमेकोनचत्वारिंशं कुसुमम्**

**इति नीतिकल्पे व्यवहारपण्डितलक्षणकथनाख्यः**

**प्रथमः काण्डः ।**

---

इत्थं शब्दार्थभेदेन द्विविधपण्डितलक्षणानि दिङ्मात्रेण च तन्निदर्शनमुक्त्वाऽथेदानीं न मौर्ख्यं समर्ज्यमिति तत्प्रातियोग्येनोद्दिष्टमूर्खलक्षणम् । तत्रादौ साक्षान्मूर्खलक्षणम् ।

अश्रुतश्च समुन्नद्धो दरिद्रश्च महामनाः ।
अर्थांश्चाकर्मणा प्रेप्सुर्मूढ इत्युच्यते बुधैः ॥ १ ॥

महामनादानप्रवृत्तः, अकर्मणेति दैवमात्रेण, अकारप्रश्लेषाभावे कर्मणा नीतिरहितेनेति उभयसाध्यत्वादर्थानाम् ।

स्वमर्थं यः परित्यज्य परार्थमनुधावति ।
मिथ्या चरति मित्रार्थे यश्च मूढः स उच्यते ॥ २ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिथ्या चरति मिथ्याभिधानेन मित्रं प्रतारयति ।

अकामान्कामयति यः कामयानान्परिद्विषन् ।
बलवंतं च यो द्वेष्टि तमाहुर्मूढचेतसम् ॥ ३ ॥
अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ॥ ४ ॥
संसारयति कृत्यानि सर्वत्र विचिकित्सते ।
चिरं करोति क्षिप्रार्थे स मूढो भरतर्षभ ॥ ५ ॥

संसारयति लोके प्रसारयति । क्षिप्रार्थे क्षिप्रसाध्येऽर्थे ।

अनाहूतः प्रविशति अपृष्टो बहुभाषते ।
विश्वसेद्यः प्रमत्तेषु मूढचेता नराधमः ॥ ६ ॥
परान्क्षिपति दोषेण वर्तमानः स्वयं तथा ।
यस्तु क्रुध्यत्यनीशः सन्स च मूढतमो नरः ॥ ७ ॥
आत्मनो[४८ब]बलमज्ञात्वा परार्थपरिवर्जितम् ।
अलभ्यमिच्छन्नैष्कर्म्यान्मूढबुद्धिरिहोच्यते ॥ ८ ॥

परार्थपरिवर्जितं धर्मार्थवर्जितं सच्छलमिति यावत्, नैष्कर्म्यात्पुरुषकारं विना ।

अशिष्यं शास्ति यो राजन्ये च शून्यमुपासते ।
कदर्यं भजते यश्च तानाहुर्मूढचेतसः ॥ ९ ॥
एकः सम्पन्नमश्नाति वस्ते वासश्च शोभनम् ।
योऽसंविभज्य भूतेभ्यः को नृशंसतरस्ततः ॥ १० ॥

सम्पन्नं मिष्टम् ।

एकः पापानि कुरुते फलं भुङ्क्ते महाजनः ।
भोक्तारो विप्रमुच्यन्ते कर्ता दोषेण लिप्यते ॥ ११ ॥

महाजनः परिवारो यस्य तस्मात्परार्थं पापार्जनं मौर्ख्यमित्यर्थः ।

अतिमानोऽतिवादश्च काले त्यागो नराधिप ।
क्रोधश्चानुविधित्सा च मित्रद्रोहश्च तानि षट् ॥ १२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनुविधित्सोपकारेऽपकारेच्छा ।

एत एवायसा तीक्ष्णाः कृन्तन्त्यायूंषि देहिनाम् ।
एतानि मामवान्घ्नन्ति न मृत्युर्भद्रमस्तु ते ॥ १३ ॥
विश्वस्तस्यैति यो दारान्यश्चापि गुरुतल्पगः ।
वृषलीपतिर्द्विजो यश्च पानपश्चैव भारत ॥ १४ ॥
आदेशकृद्वृतिर्हन्ता द्विजानां परुषश्च यः ।
शरणागतहा चैव सर्वे ब्रह्महभिः समाः ॥ १५ ॥

आदेशकृत्मान्यानामपि ।

एतेषु नैव वक्तव्यं प्रायश्चित्तमिति श्रुतिः ।
अतिपापकरत्वाच्च महामूर्खा इमे स्मृताः ॥ १६ ॥

## इति नीतिकल्पे मूर्खकाण्डे साक्षान्मूर्खकुसुमम् ।

---

## [ ४१ ]

अथार्थिकमूर्खलक्षणम् । तत्र विदुरवाक्यं धृतराष्ट्रं प्रति :—

दुःशासनस्तूपहतान्तरात्मा
नावर्तते क्रोधवशात्कृतघ्नः ।
न कस्यचिन्मित्रमथो दुरात्मा
कलाश्चैता अधमस्येह पुंसः ॥ १ ॥
न श्रद्दधाति कल्याणं परेभ्योऽप्यात्मशंकितः ।
निराकरोति मित्राणि यो वै सोऽधमपूरुषः ॥ २ ॥

कल्याणं पुण्यं, परेभ्यः परेषाम् । स्वस्यासद्वृत्तदर्शनातिशं[४९अ]कितः ।

न तथेच्छन्त्यकल्याणाः परेषां वेदितुं गुणान् ।
यथैषां ज्ञातुमिच्छन्ति नैर्गुण्यं पापचेतनाः ॥ ३ ॥
विद्याशीलवयोवृद्धान्बुद्धिवृद्धांश्च भारत ।
धनाभिजनवृद्धांश्च नित्यं मूढोऽवमन्यते ॥ ४ ॥
अनार्यवृद्धमप्रज्ञमसूयकमधार्मिकम् ।
अनर्थाः क्षिप्रमायान्ति वाग्दुष्टं क्रोधनं तथा ॥ ५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



असंविभागी दुष्टात्मा कृतघ्नो निरपत्रपः ।
तादृङ्नराधमो लोके वर्जनीयो नराधिप ॥ ६ ॥
न स रात्रौ सुखं शेते ससर्पे इव वेश्मनि ।
यः कोपयति निर्दोषं सदैवाभ्यन्तरं जनम् ॥ ७ ॥
ये तु स्त्रीषु समासक्ताः प्रथमोत्पातितेष्वपि ।
ये चानार्यसमसक्ताः सर्वे ते संशयं गताः ॥ ८ ॥

प्रथमोत्पातितेषु प्रथमस्थानाच्चालितेषु ।

यत्र स्त्री यत्र कितवो बालो यत्रानुशासिता ।
मज्जन्ते तेऽवशा देशा नद्यामश्मप्लवा इव ॥ ९ ॥
यं प्रशंसन्ति कितवा यं प्रशंसन्ति चारणाः ।
यं प्रशंसन्ति बन्धक्यो न स जीवति मानवः ॥ १० ॥
अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन् ।
लभते बुद्ध्यवज्ञानमवमानं च भारत ॥ ११ ॥
परापवादनिरताः परदुःखोदयेषु च ॥
परस्परविरोधेषु यतन्ते सततोत्थिताः ॥ १२ ॥
सदोषं दर्शनं तेषां संवासात्सुमहद्भयम् ।
अर्थादाने महान्दोषः प्रदाने च महद्भयम् ॥ १३ ॥
ये पापा इति विख्याताः संवासैः परिगर्हिताः ।
युक्ताश्चान्यैर्महादोषैर्ये नरास्तान्विवर्जयेत् ॥ १४ ॥
निवर्तमाने सौहार्दे प्रीतिर्नीचे विनश्यति ।
या चैव फलनिष्पत्तिः सौहार्दे चैव यत्सुखम् ॥ १५ ॥
यतते चापवादाय यत्नमारभते क्षये ।
स्वल्पेऽप्यपकृते मोहान्न शान्तिमधिगच्छति ॥ १६ ॥
निशम्य निपुणं बुद्ध्या विद्वान्दूराद्विवर्जयेत् ।
तादृशं संग[४९ब]तं नीचैर्नृशंसैरकृतात्मभिः ॥ १७ ॥
अगारदाही गरदः कुण्डाशी सोमविक्रयी ।
पर्वकारी च सूची च मित्रध्रुक्पारजापिकः ॥ १८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुण्डाशी जरणशक्तावसत्यामपितृष्णया बहुभोजी, पर्वकारकः पर्ववादी ज्योतिषकः, स्वयं तिष्ठत्यत्याद्य वेद्यपि पर्ववदतीति, सूचकः सूची ।

भ्रूणहा गुरुतल्पी च यश्च स्यान्मधुपो द्विजः ।
अतितीक्ष्णश्च काकश्च नास्तिको वेदनिन्दकः ॥ १९ ॥

इत्यार्थिकमूर्खलक्षणाभिधमेकचत्वारिंशं कुसुमम् ।

---

[ ४२ ]

अथोत्तानाधियां वृत्तं दर्श्यते प्राज्ञसंविदे ।
यदाकर्णनमात्रेण प्राज्ञा नानर्थभाजनम् ॥ १ ॥

मुग्धबुद्धिर्वणिक्पुत्रः कटाहद्वीपमागमत् ।
भाण्डमध्ये च तस्याभून्महानगुरुसंचयः ॥ २ ॥

तेषां तदनभिज्ञानां नाददे कश्चिदेव तत् ।
विक्रीय भाण्डजातं तद्वययार्तोंगारगौरवम्[1] ॥ ३ ॥

वीक्ष्य संदाह्य तत्सर्वं व्यक्रीणाच्च तदर्घतः ।
अंगारभावमास्वासौ गृहानागत्य क्षाडयन्[1] ।
पित्रादौ हसितोऽप्येष मुमुदे विहितक्रियः ॥ ४ ॥

तन्मूल्यं न यथा नश्येन्नान्येषां चापि हास्यता ।
तथा व्यवहारेत्प्राज्ञो नागुर्वंगारकारवत् ॥ ५ ॥

इत्यगुरुदाहकाख्यमूर्खकथनाभिधं कुसुमम् ॥ ४२ ॥

---

[ ४३ ]

जात्वेकःकृषिको मृष्टतिलास्वादाद्धियं गता ।
अां किं मृष्टा उप्यन्ते मयीति कृतधीरसौ ॥ १ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अतीव मिष्टान्सुतिलान्भोजयामोऽखिलानिति ।
आघोष्य परितो रेमे तिलभक्षणहृष्टधीः ॥ २ ॥

तथा कृत्वा हताशाऽसौ हासमाप समंततः ।
मूढानां केवलं जन्म परहासाय निश्चितम् ।
इति मत्वा निजाज्ञाने परं पृष्ट्वा चरेद्बुधः ॥ ३ ॥

**इति तिलकार्षिकाख्यमूर्खकुसुमं त्रयश्चत्वारिंशम् ॥**

---

## [ ४४ ]

भार्यासीत्कस्यचिद्दूह्रस्वनासात्युच्चनसो गुरुः ।
प्रेममानास्पदे एतौ कथं स्यातां मुदे म[५०अ]म ॥ १ ॥

इति निश्चित्य संस्थाप्यधिया नासेतयोस्त्वसौ ।
च्छित्वा तदनुसारेण गुरोर्नासां रहो द्रुतम् ॥ २ ॥

आगत्य योजयामास भार्यानासाच्छिदि द्रुतम् ।
सुखं स्वपितुमारेभे मुग्धः कोलाहलात्ततः ॥ ३ ॥

वृद्धः सलज्जितो लोकैः पलाय्यास स दूरतः ।
तस्मान्मार्गं तथा प्रेम मूर्खाणां क्वापि निश्चितम् ।
अनर्थायेति रक्ष्यः स्वो धीरैर्मूर्खाशयादिति ॥ ४ ॥

**इति नासारोपकाख्यमूर्खकुसुमम् चतुश्चत्वारिंशम् ।**

---

## [ ४५ ]

मूर्खः कश्चित्पुमांस्तूलविक्रयायापणं ययौ ।
अशुद्धमिति तत्तस्य न जग्राहात्र कश्चन ॥ १ ॥

विमृश्य स्वर्णकाराय गत्वा स्वर्णं कथं त्वया ।
शोध्यतेऽग्नाविति श्रुत्वा सोऽपि चक्रे विधिं तथा ॥ २ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृष्ट्वा तत् खिलतां यातं विलपञ्जनहासतः ।
शुशोच मूढबुद्धीनां स्वनाशे परहास्यता ॥ ३ ॥

इति तूलिकाख्यमूर्खाभिधं पंचचत्वारिंशं कुसुमम् ।

[ ४६ ]

निधानदर्शी केनापि कोऽप्यानीतो महीभुजे ।
अनेन जंगले दृष्टं निधानमिति वादिना ॥ १ ॥
श्रुत्वाऽसौ मुदितो मायं पलायेतेति मन्त्रिणे ।
निचेक्षप स चाप्येनमन्धं चक्रे क्षणात्सुधीः ॥ २ ॥
दिनान्तरे नृपेणासौ कुत्रेति परिभाषितः ।
संरक्षितो मयेत्याह स मंत्री क्रियतां पुरः ॥ ३ ॥
इत्युक्तोऽसौ तमानीय चक्षुर्हीनमदर्शयत् ।
पलायनभयादस्य नेत्रे उत्पाटिते मया ॥ ४ ॥
यथासौ नः गत क्वापीत्युक्त्वा तूष्णीं गतोह्यसौ।
तत्रस्थैर्युगपत्सर्वैर्जहसेऽट्टाट्टकारिभिः ॥ ५ ॥
तस्माद्भूपतिभिः सम्यक्परीक्ष्यैव क्रियास्पदे ।
अधिकारी निधातव्यो लोकानन्त्यमभीप्सुना ॥ ६ ॥

इति मंत्रिमूर्खाभिधानं षट्चत्वारिंशं कुसुमम् ।

[ ४७ ]

(५०ब) वन्यः कोऽपि सुहृच्चासीत्कस्यापि पुरवासिनः ।
स जातु तेन सौहार्दादानीतः स्वगृहान्प्रति ॥ १ ॥
भोजितोऽथ कथमिदं स्वाद्विति तमसौ पुनः ।
लवणेनेति श्रुत्वासौ रहो लवणमुष्टिकाम् ॥ २ ॥
भुक्तौष्ठजिह्वानिर्दग्धो हा हेति विलपन्मुहुः ।
हासपात्रं परं जातो हासायैवाज्ञचेष्टितम् ॥ ३ ॥

इति लवणाग्निमूर्खाभिधं सप्तचत्वारिंशं कुसुमम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ ४८ ]

कस्यचिन्मुग्धबुद्धेर्गौरेका क्षीरशतंपलान् ।
प्रत्यहं प्रददौ जातूत्सवकृद्विचचार सः ॥ १ ॥
अवश्यं पयसो मेऽत्र बहुना भाव्यमञ्जसा ।
न दोह्मि मासं युगपत्तदा प्राप्स्ययिति स्थितः ॥२॥
उत्सवे त्वागतेऽसौ तां दोग्धुं यावदुपक्रमेत् ।
तावच्चासंस्तवात्तस्यास्तदल्पं समजायत ॥ ३ ॥
क्रुद्धो यावद्बलात्तस्याः दुग्धं लब्धुं प्रचक्रमे ।
तावद्रक्तं तया दत्तमालोक्य किमिदं जनैः ।
पृष्टो वृत्तं तदाख्याय हासपात्रं बभूव सः ॥ ४ ॥
इत्थं न केवलं जन्म मूढानां हास्यसिद्धये ।
यावच्च परपीडायै यथा गौर्दुदुहे सृजम् ॥ ५ ॥

**इति गोदोहिमूर्खाभिधं कुसुममष्टाचत्वारिंशम् ।**

---

[ ४९ ]

यद्यस्योचितमेतेन तत्र स्थेयं न जातुचित् ।
अनौचित्यापरं देयं तदनर्थाय केवलम् ॥ १ ॥
प्राप्यापि दैवयोगेन महासत्त्वोचितं धनम् ।
न स्वसीमा बुधैर्हेया यथापत्सहसा पतेत् ॥ २ ॥
तथा च श्रूयतामत्र कथा स्वपरहर्षदा ।
ग्राम्यः कश्चित्खनन्भूमिं प्राप्यालंकरणं महत् ॥ ३ ॥
चौरानीतं राजगृहात्तत्र स्थापितमस्ति यत् ।
सोत्तानधीस्तदानैव स्वां भार्यां पर्यभूषयत् ॥ ४ ॥
बबन्ध मेखलां मूर्ध्नि हारं च जघनस्थले ।
[५१ अ]नूपुरौ कर्णयोस्तद्वत्करयोरपि हंसकौ ॥ ५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हसद्भिः ख्यापिते लोकैर्बुद्ध्वा राजा न केवलम् ।
संजहार धनं तस्य यच्च किंचिच्चितं शनैः ।
सर्वं तद्धारयामास कारावद्धं चकार तम् ॥ ६ ॥

**इति ग्राम्यमूर्खाभिधमेकोनपञ्चाशं कुसुमम् ।**

---

[ ५० ]

विचित्रं विधिवैचित्र्यं धनं यद्दानभुक्तये ।
तद्गृहत्य बुधो येन स इहामुत्र खिद्यते ॥ १ ॥
किंवा मूढमतेश्चित्रं यदसौ राति नो धनम् ।
यः स्वयं नोपभुङ्क्ते तत्तस्य दानं खपुष्पवत् ॥ २ ॥
तथा च मूर्खः कोऽप्यासीदितः सत्कोशवानपि ।
न ददौ न च खादापि तथा तस्यौचिती यथा ॥ ३ ॥
एकदा जगदुश्चैवं मन्त्रिणस्तं हितैषिणः ।
दानं दहति देवेह दुर्गतिं पारलौकिकीम् ॥ ४ ॥
तद्देहि दानमायूंषि भङ्गुराणि धनानि च ।
तच्छ्रुत्वा स नृपोऽवादीद्दानं दास्याम्यहं तदा ।
दुर्गतिं प्राप्तमात्मानं मृतो द्रक्ष्याम्यहं यदा ॥ ५ ॥
ततश्चान्तर्हन्तस्ते तूष्णीमासत मंत्रिणः ।
एवं नोज्झति मूढोऽर्थान्यावदर्थैं स नोज्झ्यते ॥ ६ ॥

**इति धनमूर्खकुसुमं पञ्चाशम् ।**

---

[ ५१ ]

अन्यच्च श्रूयतां द्रव्यमूर्खो योऽसौ प्रतारितः ।
जीवन्नेव निजैरर्थमूर्खाख्यामाप यो भुवि ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अभूत्पर्वतदेशीयो राजा दैवात्प्रतापपान् ।
येनेयं पृथिवी सर्वा पूरिताभूद्वसुंधरा ॥ २ ॥
स कार्पण्यधृतास्थानो मुमुदे केवलं हृदि ।
कोशागारकृतैस्तैस्तैर्द्रव्यराशिभिरुद्यतः ॥ ३ ॥
रात्रिन्दिनं च ताच्चिन्तातुरः कथमयं मम ।
न कोशो भरितोऽस्तीति धिङ्मामिति विचिन्तयन् ॥ ४ ॥
महाकष्टेन दत्ते स्म भृतिं भृत्यजनाय सः ।
प्राणसंधारणार्थं च बुभुजे न तु भोगभुक् ॥ ५ ॥
इत्थं बला[५१ब]त्स भूपालधुरं दैवात्समाश्रितः ।
ऐहिकीं वर्तयामास वर्तनीं मन्त्रिशासनात् ॥ ६ ॥
क्वादः क्व चापि गन्तव्यं को नामासौ पराभिधः ।
लोक इत्यनुशास्तॄन्स बोधयामास बद्धधीः ॥ ७ ॥
नासौ ददे परत्रार्थं वराटमपि कस्यचित् ।
केवलं दैहिकीं चर्यां चारयामास तद्भयात् ॥ ८ ॥
जातु रोगसमापत्तौ ददौ वैद्यौषधादिना ।
न जातु विप्रदेवाग्निमुखेनासौ कदाचन ॥ ९ ॥
इत्थं वर्तयतस्तस्य लोकयात्रां कथंचन ।
प्राणान्तवेलाप्यगमद्धाहेति विलपन्नभूत् ॥ १० ॥
न कथंचन वैद्यानां क्रियाभूत्तस्य सार्थका ।
किं नाम क्रियते यत्नैः प्रारब्धे परमे सति ॥ ११ ॥
तामवस्थामवाप्तोऽसौ बोधितोऽपि बलान्निजैः ।
मन्त्रिभिर्न चकारासौ परलोकोपयोगदम् ॥ १२ ॥
प्राणान्तपीडामाप्त्वाथ स्खलद्वागादिकक्रियः ।
बलात्संश्रावितो देहि देहीति पारलौकिकम् ॥ १३ ॥
क्रुद्धोऽसौ प्रस्खलद्वाचा तेषामेवानुरोधतः ।
ददे यदि च कोऽप्यत्र जीवते प्रतिदास्यति ॥ १४ ॥
यदि जीवासि[1] तत्कश्चिद्यदि द्रव्यं ममार्पयेत् ।
दास्यामि तदिति ब्रूत किं तूष्णीं भूयतेऽधुना ॥ १५ ॥

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्तश्च हसतां तेषां कश्चिदुत्थाय दीर्घदृक् ।
सकलं ते प्रदास्यामि सकलं जीवतस्तव ॥ १६ ॥
गृहाण तदितं लेख्यमिति शीघ्रं समर्पिपत् ।
विलोक्य लेख्यं मुदितः शशासासौ प्रदीयताम् ॥ १७ ॥
प्रदीयतामिति मुदा व्याकोशहृदयो यदा ।
अभूत्तदैव द्राक्तस्य प्राणा देहाद्विनिर्ययुः ॥ १८ ॥
यद्यस्य संस्तुतं तस्य बलात्तद्विगमेऽथवा ।
इच्छया तस्य सा वेला प्राणान्तस्येति विद्यताम् ॥ १९ ॥
प्राणसत्त्वेऽपि यत्तेन द्रव्यं तत्कलयार्पितम् ।
[५२अ]तदर्थमूर्खतामेति पूर्णोऽत्रापि न राति यः ॥ २० ॥

**इत्यर्थमूर्खाभिधं कुसुममेकपञ्चाशत्तमम् ।**

---

## [ ५२ ]

असंबद्धं वदन्त्येव स्वपरान्हासयन्ति च ।
अत्यारोहन्ति पृष्टाश्चेन्मूर्खाः पश्वधमा मताः ॥ १ ॥
तथा च जनमध्यस्थो मूर्खः कश्चिन्नरोत्तमम् ।
दूरादायान्तमालोक्य भ्रातैष मम संगतः ॥ २ ॥
अर्थदायी भवाम्यस्य न चैष मम कश्चन ।
ततो नास्य तु भागो मे पश्यतान्तरमत्र मे ॥ ३ ॥
अहमनेन सदृशो नासौ मत्सदृशास्त्विति ।
वदन्पुरोगतां छोष्ठपाषाणानप्यहासयत् ॥ ४ ॥

**इति दायभागिनाममूर्खाभिधं द्वापञ्चाशत्तमं कुसुमम् ।**

---

## [ ५३ ]

कश्चित्पितृगुणाख्यानप्रवृत्तः सखिमध्यगः ।
तत्र स्वपितुरुत्कर्षं वर्णयन्नेवमभ्यधात् ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आबाल्याद्ब्रह्मचारी मे पिता नान्योऽस्ति तत्समः ।
कुतस्त्वमिति पृष्टस्तैर्माता वेत्तीति संवदन् ॥ २ ॥
सुखमशुंकबद्धं ते विधाय हसितः स तैः ।
अहो नैर्लज्ज्यमेतेषामिति तां सोऽप्यलज्जयत् ॥ ३ ॥

**इति व्याघातिमूर्खाभिधं त्रयःपञ्चाशत्तमं कुसुमम् ।**

---

## [ ५४ ]

बभूव नाम गणकः कश्चिद्विज्ञानवर्जितः ।
सभार्यापुत्रसहितः स्वदेशे वृत्त्यभावतः ॥ १ ॥
गत्वा देशान्तरं सोऽथ मिथ्याविज्ञानमात्मनः ।
कृतकप्रत्ययेनार्थपूजामाशुमदर्शयत् ॥ २ ॥
परिष्वज्य सुतं बालं तत्र सर्वजनाग्रतः ।
रुरोद पृष्टश्च[५२ब]जनैरेवं प्रायो जगाद सः ॥ ३ ॥
भूतं भव्यं भविष्यच्च जानेऽहं तदयं शिशुः ।
विपत्स्यते च दिवसे सप्तमे तेन रोदिमि ॥ ४ ॥
इत्युक्त्वा तत्र विस्माय्य लोकं प्राप्तेऽह्नि सप्तमे ।
प्रभात एव सुप्तं तं स संव्यापादितवान्सुतम् ॥ ५ ॥
दृष्ट्वा च तं मृतं बालं संजातप्रत्ययैर्जनैः ।
पूजितो धनमासाद्य स्वदेशं स्वैरमाययौ ॥ ६ ॥
लोकेऽर्थलोभान्मिथ्यैव विज्ञानज्ञापनेप्सवः ।
मूर्खाः पुत्रमपि घ्नन्ति रज्येन्नैतेषु बुद्धिमान् ॥ ७ ॥

**इति धनलोभमूर्खाभिधं चतुष्पञ्चाशत्तमं कुसुमम् ।**

---

## [ ५५ ]

केचिच्च बालिशाः प्राज्ञमानिनो जगतीतले ।
यैः सुव्यक्तोऽपि दोषः स्वः कौशलान्नैव बुध्यते ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा च श्रुण्वतः पुंसो बाह्यार्थस्य च कस्यचित् ।
अभ्यन्तरे गुणान्कश्चिच्छशंस सुजनाग्रतः ॥ २ ॥
तदा चैकोऽब्रवीत्तत्र सत्यं स गुणवान्सखे ।
किंतु द्वौ तस्य दोषौ स्तः साहसी क्रोधनश्च यत् ॥ ३ ॥
इति वादिनमेवैनं बहिर्वर्ती निशम्य सः ।
पुमान्प्रविश्य सहसा वाससावेष्टयद्गले ॥ ४ ॥
रे जाल्म साहसं किं मे क्रोधः कश्च मया कृतः ।
इत्युवाच च साक्षेपमसौ क्रोधाग्निना ज्वलन् ॥ ५ ॥
ततो हसन्तस्तत्रान्ये तमूचुः किं ब्रवीत्यदः ।
प्रत्यक्षदर्शितक्रोधसाहसोऽपि भवानिति ॥ ६ ॥

**इति साहसिमूर्खाभिधं पञ्चपञ्चाशत्तमं कुसुमम् ।**

---

## [ ५६ ]

( ५३ अ )मौर्ख्यमेतन्मनुष्याणामस्तु स्वपरहानिदम् ।
हिताय च भवत्येतन्महत्सु विहितस्थिति ॥ १ ॥
अत्रास्त्याभाणकं लोके मूढानां चेन्न मातरः ।
प्रसूयन्ते प्रवीणानां गेहाः स्युः पूरिताः कथम् ॥ २ ॥
तथा च कस्यचिद्राज्ञः कन्याभूद्रतिरूपभाक् ।
स वर्धयितुकामस्तामतिस्नेहेन सत्वरम् ॥ ३ ॥
वैद्यानानाय्य नृपतिः प्रीतिपूर्वमभाषत ।
सदौषधप्रयोगं तं कंचित्कुरुत येन मे ॥ ४ ॥
सुतैषा वर्धते शीघ्रं सद्भर्त्रे च प्रदीयते ।
तच्छ्रुत्वा तेऽब्रुवन्वैद्या उपजीवयितुं प्रभुम् ॥ ५ ॥
अस्त्यौषधमितो दूरदेशात्तत्रापि लभ्यते ।
आनयामश्च यावत्तावदेषा सुता तव ॥ ६ ॥
अदृश्या स्थापनीयैषा विधानं तत्र हीदृशम् ।
इत्युक्त्वा स्थापयामास च्छन्नां ते तां नृपात्मजाम् ॥ ७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संवत्सरानत्र बहूनौषधप्राप्तिशंसिनः ।
यौवनस्थां च तां प्राप्तामौषधेन प्रवर्धिताम् ॥ ८ ॥
ब्रुवाणा दर्शयामासुः सुतां तस्मै महीभृते ।
सोऽपि तान्पूरयामास वैद्यांस्तुष्टो धनोच्चयैः ।
इति व्याजाज्जडधियो धूर्तैर्भुज्यन्त ईश्वराः ॥ ९ ॥

**इति राजमूर्खाभिधं षट्पञ्चाशत्तमं कुसुमम् ।**

---

## [ ५७ ]

बहु क्षपयते मूर्खः स्वल्पस्यार्थे धनांधधीः ।
केनचिद्भृतको ग्राम्यः पणेन पणितः समाम् ॥ १ ॥
भृत्यतोषात्तमापृच्छ्य ययौ स च गृहं स्वकम् ।
गते तस्मिंश्च पप्रच्छ भार्या तन्विगतः समा ॥ २ ॥
त्वत्तः किंचिद्गृहीत्वेति साप्यर्धपणमभ्यधात् ।
क्रुद्धोऽर्धपणमेतस्मात्प्रत्यानेतुं स तीव्रधीः ॥ ३ ॥
चक्रे दशपणांस्तत्र पाथेयं तदवाप्तये ।
गत्वा च भृतकात्तस्मात्तमर्धपणमानयत् ।
तच्चार्थकौशलं शंसन्ययौ लोकहास्यताम् ॥ ४ ॥

**इति धनमूर्खाभिधं सप्तपञ्चाशत्तमं कुसुमम् ।**

---

## [ ५८ ]

मूर्खाणां जन्म ये प्राहुर्व्यर्थं ते न मता मम ।
आकल्पं हास्यदानात्तज्जन्म हर्षाय धीमताम् ॥ १ ॥
तथा च कस्यचिद्यानपात्रेणाब्धिं तरिष्यतः ।
सौवर्णं पात्रमपतज्जले तत्रैव स द्रुतम् ॥ २ ॥
आवर्ते जलगर्तेनाभिमुखं चिह्नमादधौ ।
[५३ ब]अस्त्वागमनवेलायामुद्धरामीति निश्चितः ॥ ३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पारं प्राप्याम्बुधेस्तीरे दृष्ट्वावर्तादि वारिणि ।
मज्जयामास सोऽबुद्धिर्नदीस्तांस्तत्र[1] सः ॥ ४ ॥
पृष्टः स तैः कथं कुत्र चोक्त्वा तद्वृत्तमादृतः ।
हाससापेत[1] हर्षाय मूढजन्म मनीषिणाम् ॥ ५ ॥

**इति मूर्खजन्मसाफल्याभिधमष्टपञ्चाशत्तमं कुसुमम् ।**

---

[ ५९ ]

न राज्ञां प्रत्ययो ग्राह्यो निग्रहे वाप्यनुग्रहे ।
प्रायो विमूढमतयस्ते भाग्योदयजीविनः ॥ १ ॥
तथा च कश्चिद्भृत्यं स्वं हृतमांसं महानसात् ।
विलोक्याज्ञापयामास देहादेतन्मितं पलम् ॥ २ ॥
कर्त्यतामिति देवेद्रः[1] पलपंचक उत्कृते ।
दृष्ट्वा तं पतितं भूमौ क्रन्दन्तं चाप्यसौ पुनः ॥ ३ ॥
जातानुकम्पो द्वाःस्थं तं प्राह पञ्चपली द्रुतम् ।
देह्यस्मै चेन्न तुष्येत तदतोप्यधिकं पलम् ॥ ४ ॥
किं जीवति शिरच्छिन्नो दत्तैरपि शिरःशतैः ।
विमृष्य दास्य इत्युक्त्वा गत्वा क्षत्ता हसद्भिः ॥ ५ ॥
तं समाश्वास्य वैद्येभ्यः कृत्तं मांसं व्यचीकलत् ।
एवं मूढप्रभुर्वेत्ति निग्रहं नाप्यनुग्रहम् ॥ ६ ॥

**इति मूढप्रभुकथनाभिधमेकोनषष्टितमं कुसुमम् ।**

---

[ ६० ]

प्रायेण मूढमतयो राजानः प्रभवन्ति हि ।
प्रभावयुक्तमतिमान्राजा खलुः सुदुर्लभः ॥ १ ॥
तथा च श्रूयतां भाग्यपुंजोऽभूत्कश्चिदीश्वरः ।
यस्यौदार्यं दिगन्तेषु साम्प्रतं च स्थितिं गतम् ॥ २ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तमेकदा सुखासीनं लिखित्वाक्षोटपत्रिकाम् ।
स कायस्थेऽर्पयामास मुद्रां कुर्विति चार्थितः ॥ ३ ॥
विलोक्याक्षोटसाहस्रं किं दास्ये ते मतिः कुतः ।
डौम्बिन्या प्रणयो[1] भाति तैलमादीयतां त्वया ॥ ४ ॥
तैलार्थं तेऽप्यमी ग्राह्या वद किं दूरधावनात् ।
यथेच्छं तैलमादत्स्व न ते किञ्चिद्भयं मम ॥ ५ ॥
इति श्रुत्वा समाश्वस्योपविष्टोऽजलिभाग्द्रुतम् ।
आलिख्य तैलपत्रीं स समर्पयद्यथाञ्जसा ॥ ६ ॥
त्रिंशद्द्रोणमिता दृष्टानयासृत्वा चरस्व भोः ।
इत्युक्त्वाश्वर्पयन्मुद्रां नयेत्युक्त्वा निचिक्षिपे ॥ ७ ॥

**इति संख्याविभ्रमराजमूर्खाभिधं कुसुमं षष्टितमम् ।**

---

## [ ६१ ]

ध्रुवमल्पधियां द्रव्यं(५४अ)सपदोषाविमोहिनी[1] ।
यथैते वञ्चायित्वा स्वान्परं न्यस्तं विधाय तत् ॥ १ ॥
स्वमिहामुत्र गर्हार्हं कृत्वाकिञ्चनतां गताः ।
स्ववृत्तं गोपयन्त्येव मरणान्तमिति स्थितिः ॥ २ ॥
तथा च कश्चिद्धीक्षुद्रः[1] संचित्य द्रविणं बहु ।
पित्रादिभ्योऽथ कस्मिंश्चिन्मित्रे विश्वस्तसंविदा ॥ ३ ॥
संस्थाप्य नैव वाच्यं ते पितृभ्रात्रादिसंनिधौ ।
धनमस्येति नियमं कारयामास तं पुनः ॥ ४ ॥
तत्राप्यविश्वस्तमतिर्मा शङ्कीति च तं पुनः ।
स मुद्राङ्कं ददौ पत्रं मयासाद्धृतं धनम् ॥ ५ ॥
एतावदिति पित्रादीन्ज्ञापयामास संज्ञया ।
इत्थं गते प्रहृष्टोऽसौ वंचिताः स्वपरे मया ॥ ६ ॥

---

1 Corrupt.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्तयामास तेनासौ विश्वस्तहृदयः सुखम् ।
अथ कालान्तरे दैवाद्व्ययार्तोऽसौऽमुमभ्यगात्[1] ॥ ७ ॥
व्ययार्थं पूर्वमेवर्णं तावन्मोचय[1] संकुलः ।
संबद्धपाणिरधुनाहमप्यस्मीति चाह तम् ॥ ८ ॥
किं वक्षीति[1] स्वलंचास्मै यदा नैवं श्रुतिगतः ।
तदा विवादवृद्धौ स मुद्रांकं पत्रमग्रतः ।
विधाय ह्रेपयामास तं महाजनसन्निधौ ॥ ९ ॥
इति क्षुद्रधियो मूढा वञ्चयित्वा स्वकान्मुधा ।
स्वेनापि वञ्चिता लोके हास्यतां यान्ति निश्चितम् ॥ १० ॥
इत्थं मूर्खचरित्राणां निबद्धानां दृढं च तैः ।
शांतरज्ञा[1] भवन्त्यज्ञा विशेषज्ञं विना भुवि ॥ ११ ॥

**इति स्ववञ्चकमूर्खाभिधमेकषष्टितमं कुसुमम् ।**

---

## [ ६२ ]

निष्प्रज्ञो नाशयत्यर्थं प्रभोः स्वस्यापि चेटकः ।
तथा च केनचिद्भृत्यष्टंकार्थं प्रेषितोऽभवत् ॥ १ ॥
मिष्टमिष्टानि टंकान्यानयस्वेति स बुद्धधीः ।
हृदि कृत्वा प्रभोराज्ञां हठान्येत्र[1] तथाकरोत् ॥ २ ॥
एकैकं दशनच्छेदैरास्वाद्यानीतवाञ्जनः ।
आस्वाद्य मधुराण्येतान्यानीतानीक्षतो[1] प्रभुः ॥ ३ ॥
सोऽब्रवीत्सोऽपि तान्यर्धोच्छिष्टान्यालोक्य कुत्सया ।
जहौ गृहपतिस्तेन भृतेनाबुद्धिना समम् ॥ ४ ॥

**इत्युच्छिष्टक्षन्मूर्खाभिधं द्विषष्टितमं कुसुमम् ।**

---

1 Corrupt.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ ६३ ]

मूढः सुहृत्प्रमाणेन सदसद्भावि वांछति ।
तथा च श्रूयतां कोऽपि कर्णाटः स्वप्रभुं रणे ॥ १ ॥
तोषयामास तं सोऽपि वृण्विष्टं[५४ब]ते ददे वरम् ।
इत्युक्तोऽसौ नृपं वव्रे विलासी नापितं स्वकम् ॥ २ ॥
क्षौरकृद्देवेमध्येष क्षौरशोभमकरोद्बलम्[1] ।
इत्युक्तः स्वीचकारासौ प्रसन्नहृदयो हसन् ।
इत्यल्पचित्ताः स्वल्पेन प्रीतिं यान्ति विलासिनः ॥ ३ ॥

**इति विलासिमूर्खाभिधं त्रिषष्टितमं कुसुमम् ।**

---

[ ६४ ]

धीमद्भिर्धीः परिक्षिप्ता यथा मूर्खा अपि स्वयम् ।
विज्ञाप्य न चेद्वाचाख्यापयेयु र्निजाशयम् ॥ २ ॥
तथा च केनचिच्चैत्यगर्दभः पुष्टये कृशः ।
परसस्येषु मुक्तोऽभूदाच्छाद्य द्विपिचर्मणा ॥ २ ॥
स तानि खादन्द्वीपीति जनैस्त्रासान्न वारितः ।
एकेन दृश्यते जातु कार्षिकेन धनुर्भृता ॥ ३ ॥
स तं द्वीपीति मन्वानः कुब्जीभूय भयानतः ।
कंबलावेष्टिताशिरो गन्तुं प्रववृते ततः ॥ ४ ॥
तं च दृष्ट्वा ततो यान्तं खरोऽयमिति चिन्तयत् ।
खरस्तु स्वकृतेनोच्चैर्व्याहरत्सस्यपोषितः ॥ ५ ॥
तच्छ्रुत्वा गर्दभं मत्वा तमुपैति स कार्षिकः ।
अवधीच्छरघातेन कृतवैरं स्वया धिया ॥ ६ ॥
इति भिन्नमतिः साधुफलेश्चेन्न[1] जडाशयः ।
अंतरागम्य तां दैवात्स्फोटयेदिति निश्चयः ॥ ७ ॥

**इति हृदयस्फोटिमूर्खाभिधं चतुःषष्टितमं कुसुमम् ।**

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ ६५ ]

धूर्तानां कौशलं छद्म तेनामी छलयन्ति यत् ।
येन च्छलेन जहते धियं ते मूर्खशेखराः ॥ १ ॥
तथा चादाय याज्येभ्यश्छागं कोऽपि व्रजन्द्विजः ।
बहुभिर्ददृशे मार्गे धूर्तैश्छागं जिहीर्षुभिः ॥ २ ॥
एकश्चैतेभ्य आगत्य तमुवाच ससंभ्रमम् ।
ब्रह्मन्कथमयं स्कन्धे गृहीतः श्वा त्वया त्यज ॥ ३ ॥
तच्छ्रुत्वा तमनादृत्य स द्विजः प्राक्रमद्यदा ।
ततोऽन्यौ द्वावुपेत्याग्रे तद्वदेव तमूचतुः ॥ ४ ॥
ततः ससंशयो यावद्याति छागं निरूपयन् ।
तावदन्ये त्रयोऽभ्येत्य तमेवमवदञ्शठाः ॥ ५ ॥
कथं यज्ञोपवीतं त्वं श्वानं च वहसे सहम् ।
नूनं व्याधो न विप्रस्त्वं हंस्यनेन शुना मृगान् ॥ ६ ॥
तच्छ्रुत्वा स द्विजो दध्यौ नूनं भूतेन केनचित् ।
भ्रामितोऽहं दृशं हृत्वा सर्वे पश्यन्ति किं मृधा ॥ ७ ॥
इति विप्रः स तं हित्वा छागं स्नात्वा गृहं ययौ ।
[५५अ]धूर्ताश्च नीत्वा तमजं यथेच्छं समभक्षयन् ॥ ८ ॥

**इति मूर्खशेखराभिधं पञ्चषष्टितमं कुसुमम् ।**

---

[ ६६ ]

प्राणान्ददति नो द्रव्यमात्रं क्षुद्राः कथंचन ।
तथा च शृणतेमां भोः कथां कार्पण्यचित्रिताम् ॥ १ ॥
कदर्यः कोऽप्यभूत्क्वापि मूर्खष्ठको महाधनः ।
समार्यः स सदा भुंक्ते सक्तुंल्लवणवर्जितान् ॥ २ ॥
अन्यस्यान्नस्य बुबुधे नैवास्वादं कथंचन् ।
एकदा प्रेरितो धात्रा स भार्यामब्रवीन्निजाम् ॥ ३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षीरिणीं प्रति जाता मे श्रद्धा तामद्य मे पच ।
तथेति तस्य सा भार्या पेचे तां क्षीरिणीं तदा ॥ ४ ॥
तस्थौ चाभ्यंतरे गुप्तं स ठक्कः शयनं गतः ।
दृष्ट्वा प्राघूर्णकं कंचिदत्रासौ मा व्रजेदिति ॥ ५ ॥
तावत्तस्य मुहृद्धूर्तोऽन्यठक्कस्तत आययौ ।
क्व ते भर्तेति पप्रच्छ स च तां तस्य गेहिनीम् ॥ ६ ॥
साप्यदत्तोत्तरा तस्य प्राविशत्पत्युरन्तिकम् ।
आख्याय मित्रागमनं भार्यां सोऽपि जगाद ताम् ॥ ७ ॥
उपविश्येह रुदती पादावादाय तिष्ठ मे ।
भर्ता मे मृत इत्येव वेदश्च सुहृदं मम ॥ ८ ॥
ततो गतेऽस्मिन्नावाभ्यां भोक्तव्या क्षीरिणी सुखम् ।
इत्युक्ता तेन तावत्सा प्रवृत्ता रोदितुं तथा ॥ ९ ॥
तावत्प्रविश्य सोऽपृच्छत्किमेतदिति तां सुहृत् ।
भर्ता मृतो मे पश्येति तयोक्तः स व्यचिन्तयत् ॥ १० ॥
क्व पचन्ती मया दृष्टा सुखिता क्षीरिणीमिमाम् ।
क्वाधुनैव विपन्नोऽयमेतद्भर्ता रुजं विना ॥ ११ ॥
नूनं मां प्राघूर्णिकं दृष्ट्वा कृतमाभ्यामिदं मृषा ।
तन्मया नैव गन्तव्यमित्यालोच्योपविश्य सः ॥ १२ ॥
धूर्तो हा मित्र हा मित्रेत्याक्रन्दंस्तत्र तस्थिवान् ।
श्रुताक्रन्दाः प्रविश्यात्र बान्धवा मृतवत्स्थितम् ॥ १३ ॥
श्मशानं मौनठक्कं ते नेतुमासन्समुद्यताः ।
उत्तिष्ठ बान्धवैर्यावदेतैर्नीत्वा न दह्यसे ॥ १४ ॥
इत्युपांश्ववदत्कलमूले भार्या तदा च तम् ।
मैवं शठोऽयं ठक्को मे क्षीरिणीं भोक्तुमिच्छति ॥ १५ ॥
नोत्तिष्ठामि तदेतस्मिन्नगतेतः प्रिये यदि ।
प्राणेभ्योऽप्यन्नमुष्टिर्हि मादृशानां गरीयसी ॥ १६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति प्रतिभवेद्धार्यामुपांश्वेव तदा जडः ।
ततस्ते[५५ब]न कुमित्रेण नीत्वा तैः स्वजनैश्च सः ॥ १७ ॥
दह्यमानोऽपि निश्चेष्टो ददौ नामरणाद्वचः ।
एवं स मूढो विजहौ प्राणान्न क्षीरिणीं पुनः ॥
क्लेशाऽर्जितं च बुभुजे तस्यान्यैर्हेलया धनम् ॥ १८ ॥

**इति कदर्यमूर्खाभिधं षट्षष्टितमं कुसुमम् ।**

---

## [ ६७ ]

दोषाय निर्विमर्शानामकस्मादागतं भवेत् ।
यत्किंचिद्भक्ष्यभोज्यादि स्वाद्विष्टं तन्निशम्यताम् ॥ १ ॥
तडाककारिणोऽमुत्र पुण्यं स्यात्कोटिसंगुणम् ।
इति कश्चिज्जडः श्रुत्वा मठधारी धनोद्धतः ॥ २ ॥
अस्त्वहं चापि तत्कुर्वे तडाकं मठपार्श्वगम् ।
येनाहमेव भोक्ष्यामि तत्फलं चात्रजन्मनि ॥ ३ ॥

चैवार्थे अत्रैव जन्मनीति ।

धनमस्तीदमपि मे महत्तत्क्रियताप्यहम् ।
अत्रैव वृद्धिं नेष्यामि परेषां वार्यदानतः ॥ ४ ॥

अयं भावाः यदि परेप्यतो वार्यादास्यन्ति तत्तेषामपि सामान्यन्यायादमुत्रवृद्धिरिति तन्निरोधात्सर्वं पुण्यफलं मे दकलग्नं भविष्यतीतीहैव धनसमृद्धिर्मम भूयादिति ।

इति कृत्वा मतिं मूढः कारयामास सन्निधौ ।
मठस्यान्यनिषेधाय भित्तीः सर्वत्र आदधे ॥ ५ ॥
ततो रहःस्थानमिदमिति मत्वा गर्ते वृषः ।
हरस्य स्फटिकाद्रेश्च पानार्थं तत्पयः ययौ ॥ ६ ॥
पीत्वा च रह आलोक्य क्रीडां कृत्वा तटोपगाम् ।
जगामन्येद्युरप्येवमेवं चक्रे रहोगतः ॥ ७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दर्शं दर्शं च तत्रासौ कोऽयमाहन्ति मे तटान् ।
रोहत्राद्वारमेतस्मिंस्तटाक इति दुःखितः ॥ ८ ॥
शंकमानो ददर्शाशुमायान्तं वृषपुंगवम् ।
एकदा पृच्छमालंब्य व्यागृह्णात्तं निग्रहेच्छया ॥ ९ ॥
सोत्फाल्यागात्तुमाकृष्य कैलासं हरवाहनः ।
तत्राप्यसौ मुनीन्पश्यन्मोदमानोऽर्चितश्च तैः ॥ १० ॥
दिव्यमोदकदानेन तृप्तोऽत्यर्थं जहर्ष च ।
एकदा बांधवास्तस्य स्मृतिमापुः कथं नु ते ॥ ११ ॥
यामि तद्वार्तयास्यैव पुच्छलंबीति निश्चितः ।
विधाय च तथाप्त्वैव बंधुपृष्टो जगाद तत् ॥ १२ ॥
सर्वे ते विस्मिताश्चक्रुर्धियं तद्गमनाय वै ।
ततः सर्वे श्रुताश्चर्या भौतास्ते[५६अ]प्रार्थयन्त तम् ॥ १३ ॥
प्रसीद नय तत्रास्मानपि भोजय मोदकान् ।
तच्छ्रुत्वा स तथेत्येतान्युक्तिमुक्त्वा परेऽहनि ॥ १४ ॥
तडाकोपान्तमनयत्स च तत्राययौ वृषः ।
मुखे जग्राह लाङ्गूलं तत्र प्राणभयेन सः ॥ १५ ॥
तस्याप्यगृह्णाच्चरणावन्यस्तस्यापि चेतरः ।
इत्यन्योन्याभिलग्नैस्तैर्भौतैर्यावच्च शृङ्खला ॥ १६ ॥
रचिता स वृषस्तावदुत्पपात नभो जवात् ।
याति तस्मिंश्च वृषभे लांगूलालंबिभौतके ॥ १७ ॥
मुख्य भौतं तमप्राक्षीदेको भौतोऽथदैवतः ।
कियत्प्रमाणा भवता भक्षिता मोदका इति ॥ १८ ॥
स च भ्रष्टानुसंधानो वृषपुच्छं विमुच्य तम् ।
पद्माकारौ करौ धृत्वा संश्लिष्टौ भौतनायकः ॥ १९ ॥
इयत्प्रमाणा इत्याशु यावत्तान्प्रतिवक्ति सः ।
तावत्सोऽन्ये च ते सर्वे खान्निपत्य विपेदिरे ॥ २० ॥

**इति जलरोधकमूर्खाभिधं सप्तषष्टितमं कुसुमम् ।**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ ६८ ]

द्वौ लोकौ नाशयन्त्येव मूर्खा मूर्खोपदेशतः ।
तस्मान्मूर्खान्नसेवेत प्राज्ञः सेवेत पण्डितान् ।। १ ।।
तथा च भ्रातरौ विप्रावभूतां यद्धनं महत् ।
पित्र्यं तयोर्विवदतोः कलहः समजायत ।। २ ।।
कलहे वृद्धिमायाते बांधवैर्वैच खिद्यति[1] ।
अनुरागातुयोरन्यः स्वोपाध्यायो बुधोपमः ।। ३ ।।
सैवं कुरुत मात्रास्ति विचारो भागसाम्यता ।
वस्तु वस्तु समे द्वे द्वे एवं कृत्वा विभज्यताम् ।। ४ ।।
युवाभ्यां रह आगत्य न यथा कलहो भवेत् ।
गुरूक्तं तौ प्रतिश्रुत्य रहः शक्त्यादि भांडकम् ।। ५ ।।
एकमेकं द्विधा कृत्वा मूढौ विभजतः स्म तौ ।
सर्वं विभज्य तौ चार्धं पशून्कृत्वा तथैव तौ ।। ६ ।।
दास्येका च तयोरासीत्सापि ताभ्यां तथा कृता ।
तद्बुद्धा दंडितौ राज्ञा सर्वस्वं तावुभावपि ।। ७ ।।

**इति सामिकारिमूर्खाभिधमष्टाषष्टितमं कुसुमम् ।**

[ ६९ ]

मतिरेषा मतिमतां यत्संतोषरतिः सदा ।
असंतोषो हि दोषाय तथा चात्र निशम्यताम् ।। १ ।।
आसन्प्रव्राजकः केचिद्भिक्षासंतोषपीवराः ।
तान्दृष्ट्वा पुरुषः काश्चिदन्योन्यसुहृदोऽब्र[५६ब]वीत् ।। २ ।।
अहो भिक्षाशिनोऽप्येते पीनाः प्रव्राजका इति ।
एकस्तेषु ततोवादीत्कौतुकं दर्शयामि वः ।। ३ ।।
अहं कृशीकरोम्येतां भुंजानानपि पूर्ववत् ।
इत्युक्त्वा स निमन्त्र्यैतान्प्रवाजकान्गृही
एकाहं भोजयामास षड्रसाहारमुत्तमम् ।। ४ ।।

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा मूर्खा तदास्वादं स्मरन्तो भक्ष्यभोजनम् ।
तत्तथाभिलषन्ति स्म ते तद्दुर्बलतां गताः ॥ ५ ॥
तस्मात्प्राज्ञः सुखं वाञ्छन्सन्तोषे स्थापयेन्मनः ।
लोकद्वयेऽप्यसंतोषो दुःसहः श्रमदुःखदः ॥ ६ ॥

इत्यसंतोषिमूर्खाभिधं कुसुमम् ।

---

[ ७० ]

अज्ञातस्वाशया मूर्खास्तथा कार्याणि कुर्वते ।
यथा स्वपरहासः स्यात्तथा चेदं निशम्यताम् ॥ १ ॥
क्रीणाति स्मायुगः कश्चित्पणेनाष्टावपूपिकाः ।
तेषां च यावत्षड् भुङ्क्ते तावन्मेनेऽर्धतृप्तताम् ॥ २ ॥
सप्तमेनाथ भुक्तेन तृप्तिस्तस्योदपद्यत ।
ततश्चक्रन्द स जडो मुषितोऽस्मि न किं मया ॥ ३ ॥
नैष एकादितो भुक्तोऽपूपो येनास्मि तर्पितः ।
नाशिताः किं वृथैवान्ये मया मूर्खेण किं कृतम् ॥ ४ ॥
अथवा नापराधो मे कथमेनं न बाधये ।
येनासौ निहितो लोभात्सप्तमेऽत्र तले मम ॥ ५ ॥
व्यर्थं बताहं मुषितोऽनेनापूपिकदस्युना ।
तदसौ चेन्न कलितो लोकानेवं प्रतारयेत् ॥ ६ ॥
इत्युक्त्वाशु लगुडं गृहीत्वाभिययौ जवात् ।
तथा गते जनस्तत्र तं जघ्नुर्मिलिता इति ।
जहसे च क्रमातृप्तिं बोधितो विरराम ह ॥ ७ ॥

इत्यपूपमूर्खाभिधं सप्ततितमं कुसुमम् ।

---



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ ७१ ]

अनर्थायैव शब्दैकपरोऽतात्पर्यविज्जडः ।
तथा च दासो वणिजो मूर्खः केनाप्यभण्यत ॥ १ ॥
रक्षेर्विपणियन्त्रं त्वं रात्रौ गेहं विशाम्यहम् ।
इत्युक्तवति यातेऽस्मिन्वणिजि द्वारयन्त्रकम् ॥ २ ॥
विपणीतो गृहीत्वासौ दासो दृष्टमगात्तटम् ।
आगतोऽसौ प्रगे दृष्ट्वा विपणिं मुषितां निशि ।
विलपश्च समाहूय तमाह किमिदं कुतः ॥ ३ ॥
स्वामिंस्त्वदुक्तं सर्वं मे कृतं यन्त्रं तटीकृतम् ।
रक्षैतदिति चोक्तं ते पालितं किं मया कृतम् ॥ ४ ॥
इत्यनर्थैकफलकं मूर्खाणां चरितं महत् ।
[५७अ] विज्ञाय धीमता भाव्यं सदावहितचेतसा ॥ ५ ॥

इति पतियन्त्ररक्षकमूर्खाभिधमेकसप्ततितमं कुसुमम् ।

---

[ ७२ ]

अरहस्यं निगूहन्ति गुह्यं प्रकटयन्ति च ।
मौर्ख्याभिमानेनादत्ते मूर्खोऽप्रत्ययमात्मनि ॥ १ ॥
तथा च कंचिद्गृहिणी चण्डी मूर्खमभाषत ।
प्रतिवेशिगृहं यास्याम्युत्सवेऽस्मि निमन्त्रिता ॥ २ ॥
तत्त्वयोत्पलमालैका नानीता चेत्ततोऽसि मे ।
तन्न भार्यास्मि ते भर्ता नासो मम भवानिति ॥ ३ ॥
ततस्तदर्थं रात्रौ स राजकीयसरो ययौ ।
तत्प्रविष्टश्च कोऽसीति दृष्ट्वापृच्छत रक्षकैः ॥ ४ ॥
चक्राह्वोऽस्मीति च वदन्बध्वानीतः प्रगे स तैः ।
राजाग्रे पृच्छ्यमानश्च चक्रवाकरुतं व्यधात् ॥ ५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः स राज्ञा वृत्तान्तं स्वयं पृष्टोऽनुबन्धतः ।
मूर्खः कथितवृत्तान्तो मुक्तादेशो दयालुना ॥ ६ ॥

**इति चक्राह्वमूर्खाभिधं द्वासप्ततितमं कुसुमम् ।**

[ ७३ ]

हासायैवाप्यशक्यार्थप्रतिज्ञानविकत्थनम् ।
तदीदृशैर्मूढमार्गैः संचरेत न बुद्धिमान् ॥ १ ॥
कश्चिच्च लुब्धधीर्वैद्यः केनाप्यूचे द्विजन्मना ।
ककुदं मम पुत्रस्य कुब्जमभ्यन्तरं नय ॥ २ ॥
एतच्छ्रुत्वाऽब्रवीद्वैद्यो दश देहि पणान्मम ।
ददामि ते शतगुणान्साधयामि न चेद्वचः ॥ ३ ॥
एवं कृत्वा पणं तस्माद्गृहीत्वा तान्पणान्निजान् ।
स तं स्वेदाम्बुभिः कुब्जमरुजत्केवलं भिषक् ॥ ४ ॥
न चाशकदृजुकर्तुं ददौ शतगुणान्पणान् ।
को हि वक्रमृजुं कर्तुं शक्नुयादिह धीधनः ॥ ५ ॥

**इति पणपूर्वकृन्मूर्खाभिधं कुसुमं त्रिसप्ततितमम् ।**

[ ७४ ]

न जातु प्रत्ययः कार्यः कीनाशोक्तौ कथंचन ।
सन्त्येवाढ्याः पृथं ग्रामकृपणाश्च तथा पृथक् ॥ १ ॥
तथा च श्रूतयां गा . . . यो[1] तुषकाढ्यो जडाशयः ।
कश्चिद्गान्धर्विकेनाढ्यो गीतवाद्येन तोषितः ॥ २ ॥
भाण्डागारिकमाहूय तत्समक्षमभाषत ।
देहि गान्धर्विकायास्मै द्वे सहस्रे पणानिति ॥ ३ ॥
एवं करोमीत्युक्त्वा च स भाण्डागारिको ययौ ।
गान्धर्विकोऽथ गत्वा तान्पणानस्मादयाचत ॥ ४ ॥

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न चास्मै स्थितसंवित्तान्पणानेष ददौ तदा ।
[५७ब]अथाढयस्तेन विज्ञप्तस्तत्कृते वैणिकेन सः ॥ ५ ॥
उवाच किं त्वया दत्तं येन प्रतिददामि ते ।
गीतवाद्येन मे क्षिप्रं त्वया श्रुतिसुखं कृतम् ॥ ६ ॥
तथैव पारितोषेण कृतं क्षिप्रं मयापि ते ।
तच्छ्रुत्वा विहिताशोऽपि हसित्वा वैणिको ययौ ॥ ७ ॥
कीनाशोक्त्यानया किं न हासो ...[1] जायते ।
आढयत्वं नाम तदिदं वित्तौदार्यं प्रगीयते ।
नाढयत्वं धनवत्त्वं यदकिंचनसमं मतम् ॥ ॥ ८ ॥

इति कीनाशमूर्खाभिधं चतुस्सप्ततितमं कुसुमम् ।

## [ ७५ ]

न चापि मूर्खभृत्यौ द्वौ परस्परविरोधिनौ ।
रक्ष्यावनर्थपाताय तयो रक्षा निशम्यताम् ॥ १ ॥
गुरुः कस्याप्यभूतां द्वौ शिष्यावन्योन्यमन्थरौ ।
तयोरेको गुरोस्तस्य दक्षिणं पादमन्वहम् ॥ २ ॥
अभ्यज्य क्षालयामास वामं चैवं तथेतरः ।
दक्षिणाभ्यञ्जके जातु ग्रामं संप्रेषिते गुरुः ॥ ३ ॥
अभ्युक्तवामपादं तं द्वितीयं शिष्यमभ्यधात् ।
त्वमेव दक्षिणं पादमभ्यज्य क्षालयस्व मे ॥ ४ ॥
श्रुत्वैतन्मूर्खशिष्योऽसौ स तं स्वैरमभाषत ।
प्रतिपक्षस्य संबन्धी न पादोऽभ्यज्य एव मे ॥ ५ ॥
एवमुक्तवतश्चास्य निर्बन्धं सोऽकरोद्गुरुः ।
ततो विपक्षस्तच्छिष्यरोषादादाय तस्य तम् ॥ ६ ॥

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरोः शिष्यः स चरणं बलाद्ग्राव्णा बभञ्ज ह ।
मुक्ताक्रन्दे गुरौ तस्मिन्कुशिष्योऽन्यैः प्रविश्य सः ॥ ७ ॥
ताड्यमानः सशोकेन गुरुणानेन मोचितः ।
अन्येद्युः सोऽपरः शिष्यः प्राप्तो ग्रामाद्विलोक्य ताम् ॥८॥
पादपीडां गुरुपृष्टवृत्तान्तः प्रज्वलन्क्रुधा ।
नाहं धनजिनं पादं तस्य संबधिनो द्विषः ॥ ९ ॥
इत्याकृष्य द्वितीयाङ्घ्रिं गुरोस्तस्य बभञ्ज सः ।
ततोऽत्र ताड्यमानोऽन्यैरपि भग्नोभयाङ्घ्रिणा ॥ १० ॥
गुरुणा तेन कृपया दुःशिष्यः सोऽप्यमुच्यत ।
सर्वद्वेष्योपहास्यौ तौ शिष्यौ द्वौ ययतुस्ततः ।
गुरुश्च क्षमया श्लाघ्यः स्वस्थः सोऽप्यभवत्क्रमात् ॥ ११ ॥
एवमन्योन्यविद्विष्टो मूर्खः परिजनः प्रभुः ।
स्वामिनोऽर्थं निहन्त्येव न चात्महितमश्नुते ॥ १२ ॥

**इत्यन्योन्यविद्वेषिमूर्खाभिधं पञ्चसप्ततितमं कुसुमम् ।**

---

[ ७६ ]

विशेषज्ञात्यता पुंसां न जातु[५८अ] विफला भवेत् ।
तदज्ञाने ध्रुवं स्थूलदर्शिनां स्यात्पराभवः ॥ १ ॥
अल्पोऽपि हि गुणो जातु कस्यचिद्धितकृन्मनः ।
नान्तरज्ञेन हेयोसावापातबहुदर्शिना ॥ २ ॥
तथा च द्विशिरःसर्पवृत्तान्तोऽयं निशम्यताम् ।
कस्याप्यहेर्द्वे शिरसी अभूतामग्रपुच्छयोः ॥ ३ ॥
पौच्छं शिरस्त्वभूदन्धं चक्षुष्मत्प्रकृतं पुनः ।
अहं मुख्यमहं मुख्यमित्यासीदाग्रहस्तयोः ॥ ४ ॥
सर्पस्तु प्रकृतेनैव मुखेन विचचार सः ।
एकादास्य शिरः पौच्छं मार्गे कष्टमवापतत् ॥ ५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेष्टयित्वा दृढं तच्च सर्पस्यास्यात्कणद्गतिम् ।
ततस्तद्बलवन्मेने स सर्पो तु शिरोजयि ॥ ६ ॥
तेनैवान्धेन स ततः समुखेन भ्रमन्नहिः ।
अवटाग्नौ परिभ्रष्टो मार्गादृष्टेरदह्यत ॥ ७ ॥
एवं गुणस्य येऽल्पस्य बहवो नान्तरं विदुः ।
तद्धीनगुणसङ्गेन मूर्खा यान्ति पराभवम् ॥ ८ ॥

इत्यविशेषज्ञमूर्खाभिधं षट्सप्ततितमं कुसुमम् ।

[ ७७ ]

अविधेयं करोत्यज्ञो न च जानाति गूहितुम् ।
तथा च श्रूयतामत्र मूर्खस्तण्डुलभक्षकः ॥ १ ॥
आगात्कश्चित्पुमान्मूर्खः प्रथमं श्वाशुरं गृहम् ।
स तत्र तण्डुलांश्च पाकार्थं स्थापितान्सितान् ॥ २ ॥
दृष्ट्वा भक्षयितुं तेषां मुष्टिं प्राक्षिपदानने ।
तत्क्षणोपगतायां च श्वश्र्वां मूर्खः स तण्डुलान् ॥ ३ ॥
नाशकत्तान्निगरितुं न चापि[1] ... ह्रिया ।
त ...... गच्छन्त निरालापमवेक्ष्य च ॥ ४ ॥
तद्रोगशङ्कयाहूय पतिं श्वश्रूः समानयत् ।
सोऽप्यालोक्य निनायाशु वैद्यं वैद्योऽप्यपाटयत् ॥ ५ ॥
शोद्धशङ्की हनुं तस्य मूढास्याक्रम्य मस्तकम् ।
निर्ययुर्लोकहास्येन समं तस्माच्च तण्डुलाः ॥ ६ ॥

इति तण्डुलभक्षकमूर्खाभिधं सप्तसप्ततितमं कुसुमम् ।

[ ७८ ]

सद्योगः सविमर्शश्च धेयो भृत्यो मनीषिणा ।
उद्युक्तेन परं किंचित्कार्यं नैव प्रसिध्यति ॥ १ ॥

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न चानुयायिना तर्ककारिणा केवलं तथा ।
तस्माद्विचार्य मतिमान्भृत्यं कुर्याद्‌द्वयोज्वलम् ॥ २ ॥
दृश्यतां स्वामिना भृत्यो जगदे भोस्त्वया प्रगे ।
ग्रामे[५८ब] गन्तव्यमस्तीतः शीघ्रकार्यमुपस्थितम् ॥ ३ ॥
श्रुत्वेत्यपृष्ट्वैव विभुं तत्कार्थं प्रातरेव सः ।
गत्वा वृथैव तं ग्रामं तत आयात्कृतश्रमः ॥ ४ ॥
ग्रामं गत्वाहमायात इत्याह स्वामिनं च सः ।
गत्वेऽपि च किं सिद्धिं ममेत्याह स्म तं प्रभुः ॥ ५ ॥
तदेति निरतिप्रायचेष्टितो लोकहास्यताम् ।
मूर्खोऽनुभवति क्लेशं कार्यस्यातिक्रमोऽपि च ॥ ६ ॥

इति केवलोद्यमिमूर्खाभिधं कुसुमम् ।

---

[ ७९ ]

तथान्यः स्वामिना भृत्यो जगदे श्वस्त्वया प्रगे ।
अवश्यकार्ये पतितं गन्तव्यं शीघ्रमेव तु ॥ १ ॥
संस्थाप्यैव च तत्कार्यं परश्वस्तेऽथ नु पुनः ।
सायमागन्तव्यमत्रेति न वेलातिक्रमेदिति ॥ २ ॥
निशम्य कार्यं तत्तस्य विचार्य च पुनः पुनः ।
अहो संकटमेतन्मे कार्यमद्य पुरःस्थितम् ॥ ३ ॥
उक्तं च स्वामिना शीघ्रं परश्वः सायमेव हि ।
आगन्तव्यं कथं चैतत्सिद्ध्येदैवं हि दुर्घटम् ॥ ४ ॥
एतावानेव मार्गोऽयं नात्रास्ति विमतिः परम् ।
वृष्ट्यातपौ निरुन्ध्यात्कः क्षेपोऽप्यत्र भवेन्मम ॥ ५ ॥
मास्तां वै तत्कथं नाम मार्गे प्रवहतो मम ।
चौरसत्त्वादिभिश्चापि ततः शङ्का कथं न हि ॥ ६ ॥
इत्यादि विमृशन्नेव दिनं तदभ्यवाहयत् ।
सायं स्वामिनमागत्य तदाचक्षौ स्वतर्कितम् ॥ ७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निशम्यासावहो कार्यं नाशितं मे कुबुद्धिना ।
इत्यामृषन्निरासैनं दण्डताडनपूर्वकम् ॥ ८ ॥

इति केवलतर्किमूर्खाभिधमेकोनाशीतितमं कुसुमम् ।

[ ८० ]

न साहसेन कर्तव्यं कार्यं जात्वपि धीधनैः ।
सहसा चेष्टमानो हि हन्यते लोकयोर्द्वयोः ॥ १ ॥
तथा च देवशर्माख्यो ब्राह्मणो नगरे क्वचित् ।
अभूत्तस्य च भार्याभूद्देवदत्तेति विश्रुता ॥ २ ॥
धृतगर्भा च सा तस्य कालेऽस्य सुषुवे सुतम् ।
दरिद्रोऽपि स तं मेने निधिं लब्धमिव द्विजः ॥ ३ ॥
सूतकान्ते च सा तस्य भार्या स्नातुमगान्नदीम् ।
देवशर्मापि तस्थौ स गृहे रक्षन्सुतं शिशुम् ॥ ४ ॥
तावद्वाह्वायिका तस्य राजान्तःपुरतो द्रुतम् ।
चेटिका ब्राह्मणस्यागात्स्वस्तिवाचनजीविनः ॥ ५ ॥
ततः स दक्षिणालोभा[५९अ]न्नकुलं रक्षकं शिशोः ।
स्थापयित्वा ययौ गेहे चिरमाबाल्यसेवितम् ॥ ६ ॥
तस्मिन्गते ततोऽकस्माच्छिशोस्तस्यान्तिकागतम् ।
सर्पमालोक्य नकुलः स्वामिभक्त्या जघान सः ॥ ७॥
अथ तं देवशर्माणमागतं वीक्ष्य दूरतः ।
सर्पास्रसिक्तो नकुलो हृष्टोऽस्य निरगात्पुरः ॥ ८ ॥
स देवशर्मा तद्रूपं तं दृष्ट्वैवाश्मनावधीत् ।
ध्रुवं हि बालः पुत्रो मे हतोऽनेनेति संभ्रमम् ॥ ९ ॥
प्रविश्य चान्तर्दृष्ट्वा तं भुजगं नकुलाहतम् ।
जीवन्तं तं स्थितं बालं ब्राह्मणोऽन्तरतप्यत ॥ १० ॥
अविचार्योपकारी हि नकुलो किं मया हतः ।
इत्युपालभतायाता भार्यापि तदवेत्य तम् ॥ ११ ॥

इति साहसिकमूर्खाभिधमशीतितमं कुसुमम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[८१]

विचित्रविधिवैचित्र्यं भरितेत्र भवा...ति[1] ।
केचिच्च मूर्खशीर्षण्यशेखरत्वमुपागताः ॥ १ ॥
कस्यचिद्विभवोद्धतधियो यौवनशालिनः ।
राजदेशस्य जननी मृताभूच्छीलशालिनी ॥ २ ॥
स पारलौकिकं तस्या विधानं विभवोद्धतः ।
विधाय विधिवद्वादो यत्राभूद्विधिना सह ॥ ३ ॥
औदार्यस्येति स्वस्थोऽभूत्कृतार्थः पितृतत्परः ।
अथोक्थितः पिता तं...[1]मार्गणैर्विदधंस्तथा ॥ ४ ॥
द्वेषोऽपि धर्ममाश्रित्य लज्जयापि मनोऽभवत् ।
उद्वाहोऽस्य मदेर्ष्याढ्यमानगर्वितचेतसः ॥ ५ ॥
अस्त्वेवं विभवोन्नद्धा भजन्ते वारयोषितः ।
एषापि समा तत्पक्ष इति मत्वा शुचं जहौ ॥ ६ ॥
रात्रिं दिनं दहंश्चापि मन्मातृपदमागता ।
एषेति धिङ्मां नो साह्यमेतन्मेऽत्र कथंचन ॥ ७ ॥
अन्यच्चास्या मृतायास्तु कथं पिंडादिसंस्क्रियाम् ।
विधास्ये मातृनाम्नाहं केवलं योषितः पितुः ॥ ८ ॥
इति चिंतातुरः सोऽथ चिंतामग्नो दिने दिने ।
न लेभे निर्वृतिं रात्रौ दिवा वापि सुदुःखितः ॥ ९ ॥
अथासावन्तरङ्गैः स्वैः पृष्ट एवान्तगः सुधीः ।
किमिदं ते वदाधि स्वं चिकित्सामोऽन्यथा भरः ॥ १० ॥
बलात्स्ववृत्तमाख्याय दुःखितश्च रुदन्मुहुः ।
कथं पिण्डं ददाम्येनां मातृनाम्नेति मे रुजा ॥ ११ ॥
वेश्यापदं त्वमप्येनां नय येन निवर्तते ।
प्रेतपिण्डादिशंका ते स्वस्थो भव गतज्वरः ॥ १२ ॥
[५९ब]इत्याश्वासितचित्तोऽसौ कृतश्च मुदितस्तथा ।
विधाय श्लाघ्यमात्मानं मत्वा चक्रे स्ववर्तनीम् ॥ १३ ॥

1 Corrupt.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यैश्वर्यलवं प्राप्य मदमोहितचेतसः ।
किं किं न कुर्वते येन पात्यते स्वः स्वकाश्रये ॥ १४ ॥

इति स्वस्वीयपातककारिमूर्खनिरूपणं नाम कुसुममेकाशीतितमम् ।

---

अंगारी तिलमर्जि नासिपिचुका आंध्यप्रदो लावणी
गोदोह्याभरणी स्वमृत्युकलनो तोलप्रकी वाक्जडः ।
लोभी क्रोधरतस्तथान्यहितकृत्स्वघ्नोऽथ हास्यप्रदो- ।
दोषज्ञः कलनाजडः स्वहतिकृदुच्छिष्टकृद्विभ्रमी ।
हृत्स्फोटीपरवाक्यमान्यसुददोथोवारिरोध्यर्थको[1] ।
संतोषी स्वभूपभुङ् निगदितो यंत्रावनश्चक्रकः ।
तस्माच्चापि पणी ततोऽपि कृपणोतो विग्रही स्थूलदृक् ।
तस्मात्तंडुलभुक्ततोऽपि च परौ यौ केवलं चोद्यमी ।
तर्की साहसिकः कलंकधृदिमे मूर्खा बुधैर्दर्शिता– ।
श्चत्वारिंशदिहोदिता मयका[2] प्रीत्यै विदां संस्कृताः ।
निष्णाताश्च पुरोदिताः सुमतिभिर्यत्प्रातियोग्याद्भवेद्- ।
वस्तस्यैव मनीषिता गतिरिहामुत्रापि याप्यापरा ॥

इति नीतिकल्पे मौर्ख्यनिरूपणाभिधो द्वितीयः प्रप्रकांडः ॥

---

[ ८२ ]

उक्तं पाण्डित्यं समर्ज्यं नो मौर्ख्यमिति । तदुभयलक्षणं च साक्षादार्थिकं च सनिदर्शनं निगदितम् । तत्र कथमेतदुभयसमर्जनत्यागौ सिद्ध्यत इत्येदर्थमुत्तरारम्भः । सद्दित्यादि । सुजनशुभशास्त्रार्थनिपुणैः सदा सङ्गो धार्य इति पांडित्यसमर्जननिमित्तम् । पाषांडप्रवणमतिभिर्वञ्चनपरैर्मूर्खैः सह सङ्गो न धार्य इति मौर्ख्यत्यागनिमित्तम् । तत्र सुजनाः कामादिव्यसनानभिभूताः । एतत्प्रभवत्वात्सर्वदोषाणाम्, तथा च गीतम्:–

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ १ ॥ इति

एतत्प्रभवांश्चानर्थान्भृगुराह:—

दशकामसमुत्थानि तथाष्टौ क्रोधजानि च ।
व्यसनानि दुरंतानि[६० अ]प्रयत्नेन विवर्जयेत् ॥ २ ॥

कामः सुखेच्छा ।

कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः ।
वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव हि ॥ ३ ॥
मृगयाक्षा दिवास्वप्नः परिवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाट्याश्च कामजो दशको गणः ॥ ४ ॥

अक्षाः पासकादिक्रीडा सकलकार्यविघातिनी ।

पैशुन्यं साहसं द्रोह ईर्षासूयार्थदूषणम् ।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोष्टकः ॥ ५ ॥

अर्थदूषणमर्थपारुष्यम् ।

द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः ।
तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ॥ ६ ॥
पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत्कष्टतमं विद्याच्चतुष्कं कामजो गणे ॥ ७ ॥
दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे ।
क्रोधजेऽपि गणे विद्यादेतत्कष्टं त्रिकं सदा ॥ ८ ॥
सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषंगिणः ।
पूर्वं पूर्वं गुरुतरं विद्याद्व्यसनमात्मवान् ॥ ९ ॥

सप्तको वर्गः पानादि वर्गः तत्र पूर्वः पूर्वो गुरुतरो । पानं मद्यपानेन मत्तस्य संज्ञाप्रणाशाद्यथेष्टचेष्टया देहधनादि निरोधः । द्यूते तु पाक्षिकी धनाप्तिरप्यस्ति । एवमुत्तरेष्वपि स्वयमूह्यम् ।

व्यसनस्य च मृत्योश्च कष्टं व्यसनमुच्यते ।
व्यसन्यधोधो व्रजति स्वर्यात्यव्यसनी मृतः ॥ १० ॥ इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न केवलं व्यसनत्याग एव सुजनत्वसंपादको यावद्धर्मविद्धर्मसेवनं तत्त्वापादकं सन्ति च केचिद्यथा जाता एव पशुधर्माणो न हि ते सुजनेषु प्रविशन्तीति । उभयमृष्टा ह्यमी । तथा च मनुः —

चतुर्भिरपि चैवैतैर्नित्यमाश्रमभिर्द्विजैः ।
दशलक्षणको धर्मः सेव्यतव्यः प्रयत्नतः ।। ११ ।।
धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियसंयमः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।। १२ ।।

## इति सुजनतानिरूपणाभिधं कुसुमम् ।

---

## [ ८३ ]

सौजन्यसंपत्तिनिमित्तं च शुभशास्त्राणि यान्यास्तिक्यप्रवर्धकानि इति शुभशास्त्रेत्यवतारितं तानि च यानि धर्मनिरूपणैकतत्पराणि । ( ६०ब ) तान्युद्दिश्यति स्म याज्ञवल्क्यः !

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदस्थानानि विद्यानां धर्मस्य च चतुर्दश ।। १ ।। इति

अत्र मीमांसा वाक्यविचाररूपत्वात्पूर्वोत्तरभेदभिन्नाया उभय्या अपि ग्रहणम् । तेन विद्यान्तविद्ययोऽपि न पृथग्यत्ननिष्पाद्यत्वमिति ध्येयम् । तथा च ब्राह्मे —

एवं चतुर्दशैतानि धर्मस्थानानि सुव्रत ।
वेदान्तः पञ्चदशमं विद्या षोडशिका भवेत् ।। इति

पृथङ्निर्देशोऽपि न संख्याधिक्यमिति । तत्र वेदान्तः शारीरकम्, विद्या बृहदारण्यकादि रहस्यम् । इत्थं च

एतेभ्योऽपि यदन्यत्स्यात्किंचिद्धर्माभिधायकम् ।
तद्दूरतरतो विद्धि मोहस्तस्याश्रयो मतः ।। २ ।। इति

एतेभ्यः पुराणादिभ्यो यदन्यत्तत्पौरुषेयत्वाद्धेयमिति स्थिते शैवपांचरात्रपाशुपतादीनामतिप्रमाणत्वावदूषणमेव स्वीकारनिमित्तमिति समाधेयम् ।
तथा च — सांख्यं योगः पांचरात्रं वेदाः पाशुपतं तथा ।
अतिप्रमाणान्येतानि हेतुभिर्न विचालयेत् ।। ३ ।।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथाः— द्रुतेन त्रपुणापूर्णवक्त्रास्तिष्ठन्ति दुःखिताः ।
द्वेष्टारः शिवशास्त्राणां ये च वेदविदूषकाः ॥ ४ ॥

इति कृतं बहुना ।

शुभशास्त्राणां चामीषामवश्यमर्थज्ञानवता भाव्यम् । अन्यथा एतद्दतेर-किंचित्करत्वादित्याशयो **नार्थनिपुणैरि**त्युक्तम् । तथा च भगवान्व्यासः ।

न वेदपाठमात्रेण संतोषं कारयेद्द्विजः ।
पाठमात्रावसानो हि पंके गौरिव सीदति ॥ ५ ॥ इति

तथा यथा पशुर्भारवाही न तस्य भजते फलम् ।
द्विजस्तथार्थानभिज्ञो न वेदफलमश्नुते ॥ ६ ॥ इति

तथा अधीत्य यत्किंचदपि वेदार्थाधिगमे रतः ।
स्वर्गलोकमवाप्नोति धर्मानुष्ठानविद्धि सः ॥ ७ ॥ इति

अमीषां च शुभशास्त्राणामुद्देशमात्रेण स्वरूपं **'भारतीनूपुरझांकारे'** यथा ।

नियतपदाऋक्सामानियतं छंदोवन्तं यजुश्चैतत् ।
त्रितयं सुक्रममक्रममथो चतुर्थं च यद्ब्रह्म ॥ ८ ॥

**सुक्रम**[ ६१ अ ]**मिति** शोभनक्रमं प्रवृत्तिमार्गेण चतुर्वर्गसाधनमित्यर्थः। **अथो** इति पूर्वव्यतिरिक्तलक्षणसूचनार्थम् । चतुर्थं ब्रह्माथर्वाख्यमक्रमं व्यभि-चारादि कर्मोपदेशसाधनात्वान्निवृत्तिमार्गप्रधानत्वाच्च । तत्वादेव च । **अस्य** ब्रह्मेति ब्रह्मोपदेशकत्वं प्राधान्येनेति ध्येयम् । तथा शिक्षादीनां च तत्रैव लक्षणम् ।

शिक्षाक्षरजनिबोद्ध्री, कल्पो यागक्रियोपदेशकरः ।
शब्दान्वाख्यानपरं व्याकरणमथो निरुक्ताख्यम् ॥
व्युत्पत्तिसाधनमथो ज्योतिषमुदितादिसिद्धिकृच्छंदः ।
देवस्वरूपमन्त्रावरणमिमान्याहुरङ्गानि ॥ ९ ॥

सर्गादिलक्षणं खलु पुराणेषूक्तं तदनुषक्ता इतिहासाः प्राग्वृत्ताकलनाश्रु तिबृंहकं द्वितयम् । इति मीमांसान्यायधर्मविद्यानां लक्षणानि सर्वतः प्रकाशान्ये-वेति नेह्यापस्तामिति[1] ।

**इति सच्छास्त्रोद्देशाभिधं कुसुमं त्र्याशीतितमम् ।**

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ ८४ ]

**न धूर्तैरिति** । :— धूर्तैः सह सङ्गो न कदापि धार्यः । तत्सङ्गस्येहामुत्रापि सर्वथानर्थदायित्वात् । तद्विहितशास्त्राणामसच्छास्त्रत्वात् । ते च चार्वाकबौद्धकापालिकादिभेदेनानेकविधाः । तच्छ्रवणस्याप्ययावद्दत्वाद्विनेयबोधार्थं किंचिन्मात्रे तन्मतं प्रदर्श्यते । तथा च **भारतीनूपुरझांकारे** किंचिन्मात्रेण प्रदर्शितम् । तत्रादौ **चार्वाकमतम्** :—

भूतचतुष्कं तत्त्वान्यथ मानं चैकमध्यक्षम् ।
मदशक्ति यत्परस्परयोगे चैतन्यमात्मनो भवति ॥ १ ॥
परलोककथा व्यर्था नो दृष्टा दग्धतरुफलोत्पत्तिः ।
मरणं मुक्तिर्जागृतत्यक्तभयाश्चेति चार्वाकाः ॥ २ ॥

अथ **जैनमतम्** । —

दोषाष्टादशरहितो जिनदेवस्तत्त्वदर्शको येषाम् ।
तन्मतमभिधास्येह य आर्हताः क्षपणकाश्चोक्ताः ॥ ३ ॥
वादोपवर्गमार्गश्चारित्रं ज्ञानदृक्प्रमाणे द्वे ।
स्पष्टास्पष्टतया खलु जगद्द्विधा सप्ततत्त्वानि ॥ ४ ॥
जीवाजीवास्रवसंस्रवनिर्जरबंधमोक्षनामानि— ।
द्वावाद्यौ सं[ ६१ब ]क्षेपाद्व्यासः पंचास्तिकायाद्याः ॥ ५ ॥
बन्धोऽष्टविधो द्वेधा तन्मुक्तिर्मुक्तिरुच्यते नित्या ।
अन्तर्भावाद्धर्माद्ययोर्न युक्तं च नवधात्वम् ॥ ६ ॥
त्रय एते[1] लुंचितमूर्धजाश्च भैक्षाशिनः क्षमाशीलाः ।
अथवा शयपत्रास्ते प्रोक्ता जिनसाधवो नाम ॥ ७ ॥
सह योषयाशनमियं नो मुक्तिं चरति केवला जातु ।
महदुपपदशुक्लांबरभिक्षूणां भिन्नता सैषा ॥ ८ ॥
दीप इवात्मा मान्योऽस्मिन्गृहमध्ये नवद्वारे ।
आत्मा मलस्वभावो व्यर्था शुद्धिर्वरं सुखाचरणम् ॥ ९ ॥

---

1 Corrupt.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ बौद्धमतम् ।

सुगतो देवो विश्वं तत्त्वचतुष्कं क्षणक्षयीदमपि ।
वैनाशिकमतमेतद्भिन्नं सौत्रान्तिकादिभेदेन ॥ १० ॥
पारोक्ष्यापारोक्ष्याद्बाह्यार्थे भिन्नतोभयोर्बाह्यम् ।
नास्तीत्याकारगतान्ययोस्त्वसौ यदन्यदविशिष्टम् ॥ ११ ॥
अर्थो ज्ञानान्वितो वैभाषिकेण बहु मन्यते ।
सौत्रान्तिकेन प्रतिभाग्राह्योऽर्थो न बहिर्गतः ॥ १२ ॥ इति
दुःखमथाप्यायतनं समुदयमार्गौ चतुष्कमर्थानाम् ।
दुःखं पञ्चस्कन्धा आयतनं द्वादशेंद्रियादिनि ॥ १३ ॥
बाह्यान्तरताप्येषां क्षणिकत्वात्कल्पनासारा ।
निर्विषयाधीधारा गलिताखिलवासना मोक्षः ॥ १४ ॥
भावाक्षविणरमेद्धा[1] निरात्मका बहिरिवाभान्ति ।
कृत्तिकमंडलुचीरं मौंजी पूर्वाह्णभोजनं[1] संगः ।
रक्तांशुक ते,...,तीयं[1] चर्येषां द्वे प्रमाणे च ॥ १५ ॥
मृष्टं गृहं च भावानुसारिणी वाणिजी सुगतिः ।
क्षक्षिकाभावानात्मास्थायीर्षायन्मलं [1]नाम ॥ १६ ॥
इति चर्यया विचरतां जात्वस्यां संततौ कश्चित् ।
ज्ञानक्षणः समुच्छिन्नवासनो मुक्तये भवति ॥ १७ ॥
मुद्राकंकणकटकादीनां भेदे मिथः सुवर्णस्य ।
न भिदास्ति तथा भिन्नं जगन्मिथोऽस्मादभिन्नं च ॥ १८ ॥

अथ कापालिकमतम् ।

पितृवनवासो माला नरास्थिभिः पारणा सुरामांसैः ।
पात्रं कपालमर्घ्यो नरबलिना भैरवो देवः ॥ १९ ॥
दृष्टं विना तद्विषयैः क्वापि सुखं नोचिता शिलावस्था ।
सोमः कथयांचक्रे चर्यां भगवान्सु[६२ अ]भक्तेभ्यः ॥२०॥ इति
अतिगहनं चेदमाधुनिकबुद्धिदुरवगाहमिति विरम्यते । एतच्चर्चा च कृष्णमिश्रैः संक्षेपेण निबद्धा । यथाः —

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेश्यावेश्मसु शीधुगंधललनावक्त्रासवामोदितै-
र्नीत्वा निर्भरमन्मथोत्सवरसैरुन्निद्रचन्द्राः क्षपाः ।
सर्वज्ञा इति तापसा इति चिरात्प्राप्ताग्निहोत्रा इति
ब्रह्मज्ञा इति दीक्षिता इति दिवा धूर्तैर्जगद्वञ्च्यते ॥ २१ ॥
नैवाश्रावि गुरोर्मतं न विदितं कौमारिलं दर्शनं
तत्त्वं ज्ञानमहो न शारिकगिरां वाचस्पतेः का कथा ।
सूक्तं नापि महोदधेरधिगतं माहाव्रती नेक्षिता
सूक्ष्मा वस्तु विचारणा नृपशुभिः सुस्थैः कथं स्थीयते ॥२२॥इति
प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः ।
वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते ॥ २३ ॥
स्वर्गः कर्तृक्रियाद्रव्यविनाशे यदि यज्वनाम् ।
तदा दावाग्निदग्धानां फलं स्याद्भूरिभूरुहाम् ॥ २४ ॥
मृतानां यदि जन्तूनां श्राद्धं स्यात्तृप्तिकारणम् ।
निर्वाणस्य प्रदीपस्य स्नेहः संवर्धयेच्छिखाम् ॥ २५ ॥

इत्यलं श्रवणमात्रेणाप्यनिष्टदायिनानेन वादजालेन । इत्थं दूरपरिहार्यतया दुष्टधूर्तमतप्रदर्शितमिति । प्रमाणसिद्धेषु शैवादिषु शैवादीनां प्रसिद्धत्वादिदानीं पाशुपतं पञ्चरात्रमतं च प्रदर्श्यते ।

कार्यं करणयोगौ विधिदुःखान्तौ पंचतत्त्वानि ।
पशुपाशविमोक्षार्थं पशुपतिनोक्तानि तेनेशाः ॥ २६ ॥

तत्र विधिरन्तःकरणशोधनार्थं, योग ईश्वरसमाधिस्तत्प्रतीत्यर्थम् । 'समाधिनैव मुक्तिर्दुःखान्त इति कथ्यते ' । सांख्यास्तु प्रकृतिपुरुषान्यज्ञाता ज्ञानं मुक्तिरित्याहुरिति । मुक्तावेव ततोऽमीषां भेदोऽन्यत्समानम् ।

भागवता मन्यन्ते ' भगवानेकोऽस्ति वासुदेवाख्यः स चतुर्धा स्वयं व्यूहोत्पन्नः संकर्षणादि भेदेन ' ।

इत्थंभूततमिमभिगमनादानयोगाद्यैः ।
इष्ट्वा क्षीणक्ले[६२ब]शाः प्रतिपद्यंते तमीशानम् ॥ इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनुः।— 'पाषंडिनो विकर्मस्थान्बैडालव्रतिकाञ्छठान्।
हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्' ॥ २६ ॥

तत्र वेदबाह्यागमोक्तकारी पाषंडी, आश्रम व्यतिरिक्तो वा, युक्तिबलेन श्रुतिस्मृत्युक्तधर्मदूषयिता हैतुकः।

तथा 'न वार्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे।
न बकव्रतिके विप्रे नावेदविदि वेदवित्॥ २७ ॥

तथा धर्मध्वजी सदालुब्धश्छाद्मिको लोकदांभिकः।
बैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः॥ २८ ॥
यस्य धर्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः।
प्रच्छन्नानि च पापानि बैडालं नाम तद्व्रतम्॥ २९ ॥
अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः।
शठो मिथ्याविनीतश्च बकवृत्तिरुदाहृतः॥ ३० ॥
ये बकव्रतिनो विप्रा ये च मार्जारलिङ्गिनः।
ते पतन्त्यन्धतामिस्रे तेन पापेन कर्मणा॥ ३१ ॥
अलिङ्गी लिङ्गवेषेण यो वृत्तिमुपजीवति।
स लिङ्गिनां हरत्येनस्तिर्यग्योनौ च जायते'॥ ३२ ॥

**इति धूर्तवर्जनाभिधं कुसुमम् चतुराशीतितमम्।**

---

## [ ८५ ]

अथ च सुजनशुभशास्त्रार्थनिरतैरित्युक्तं तत्र यदर्थमुक्तलक्षणशुभशास्त्रार्थसेवा येन च तत्सेविनां सुजनत्वम्। तत्पर्यन्तकाष्ठाध्यात्मशास्त्रं सर्वमूर्धनि यद्वर्तते तदिदानीं सनत्सुजातीयादि मुखेन किंचिन्निदर्श्यते। तत्र धृतराष्ट्रवाक्यम्

'सनत्सुजात यदिदं शृणोमि न मृत्युरस्तीति तव प्रवादम्।
देवासुरा ह्याचरन्ब्रह्मचर्यममृत्यवे तत्कतरन्नुसत्यम्'॥ १ ॥

तव प्रवादः शिष्यान्प्रति त्वयोपदिष्टमिति विदुराच्छ्रुतम्। देवासुराश्च मृत्युजयार्थं ब्रह्मचर्यं, गुरौ वासादिकमाचरन् कृतवन्त इत्यसतो निवर्तनासंभवान्मृत्युरस्तीति लक्ष्यतेऽतः संदेहः।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[६३ अ]सनत्सुजातः । — ' अपृच्छः कर्मणा यन्मां मृत्युर्नास्तीति चापरम् ।
शृणु मे ब्रुवतो राजन्यथैतन्मा विशङ्किथाः ' ॥ २ ॥

कर्मणा ब्रह्मचर्यादिना मृत्युर्नास्तीति मृत्युसंभावमपरं नास्त्येव मृत्युरिति ।

'उभे सत्ये क्षत्रिय तस्य विद्धि मोहान्मृत्युः संमतो यत्कवीनाम् ।
प्रमादं वै मृत्युमहं ब्रवीमि सदाप्रमादममृतत्वं ब्रवीमि ' ॥ ३ ॥

यत् यस्मात्कवीनां मोहान्मिथ्याज्ञानान्मृत्युः संमतस्तस्मादुभे सत्ये, मोह-सत्वे मृत्युरस्ति तन्निवृत्तौ नास्तीति फलितमाह । प्रमादमिति । प्रमादः स्वाभाविकस्वरूपाविस्मृतिः, अप्रमादः स्वाभाविकस्वरूपेणावस्थानमिति ।

'प्रमादाद्वा असुराः पराभवन्नप्रमादाद्ब्रह्मभूताः सुराश्च ।
नैवं मृत्योर्व्याघ्रादिवोद्विजन्ति नाप्यस्य रूपमुपलभ्यते हि ' ॥४॥

ये प्रमादिनोऽसुरास्ते, ये पुनरप्रमादिनस्ते सुरा इति । एवमित्यप्रमादे । प्रमादे पुनः

' यमं त्वेके मृत्युमतोऽन्यमाहुरात्मावासममृतं ब्रह्मचर्यम् ।
पितृलोके राज्यमनुशास्ति देवः शिवः शिवानामशिवोऽशिवानाम्' ॥५॥

आत्मावासं शारीरिणम् । चरणमाचरणं चरस्तमर्हतीति चर्यः । अमृतं ब्रह्मचर्यम् तदाचरणार्हः अस्मदादिवत्तदुपासनपर इत्यर्थः । असमश्चः समास-आर्षः ।

ततश्च ' कामानुसारी पुरुषः कामाननुविनश्यति ।
कामान्व्युदस्य धुनुते यत्किंचित्पुरुषो रजः ' ॥ ६ ॥

अयं च कामः—'तमोऽप्रकाशो भूतानां नरकोऽयं प्रदृश्यते ।
गृह्यन्त इव धावन्ति गच्छन्तः श्वभ्रवत्सुखम्' । ७ ॥

कामेनाकार्यकरणादसौ कामस्तमो भूत्वा नरकरूपेण परिणमते । तत्र गृह्यन्तोऽन्येन बलाद्गृहीता इव सुखार्थं धावन्तीति ।

एतदेवं संगृह्णाति ।

' अविद्या वै प्रथमं हन्ति लोकान्कामक्रोधाववगृह्यासु पश्चात् ।
एते बलान्मृत्यवे प्राप्नुवन्ति धीरास्तु धैर्येण चरन्ति[६३ब]तत्त्वम् ' ॥८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चरन्त्याचरन्ति तत्त्वमात्मज्ञानम् ।

' अमन्यमानः क्षत्रिय किंचिदन्यन्नाधीयते बाल इवाश्मव्याघ्रम् ।
क्रोधाल्लोभान्मोहभयान्तरात्मा स वै मृत्युस्त्वच्छरीरे य एषः ' ॥ ९ ॥

अमन्यमान आत्मनोऽन्यत्किंचिदजानन् असावन्यत्किंचिद्विषयजातं नाधी-बीत न प्राप्नुयात् । अत्र व्यतिरेकदृष्टान्तः । यथा बालोऽश्मव्याघ्रं व्याघ्रत्वेन जानाति प्रमादे सत्यमृत्यु...ष्टमान[1] एवास्तु इत्याह । क्रोधेति मृत्युस्त्वच्छरीरे य एष इति प्रमादेन मृत्युसत्त्वमुपपादितम् । तत्र कोऽसौ प्रमाद इति प्रमाद-स्वरूपं ' **भारतीनूपुरझांकारे** ' स्फुटमुक्तम् । यथा

' वस्तुन्यवस्तुकलनाज्ञानं शक्तिद्वयेन तत्सकलम् ।
आभास इति निरासे तस्याद्वैतं परं ब्रह्म ॥ १० ॥

अत्रार्थः ।—यथा व्यावहारिकवस्तुत्वेनाभिमते रज्जौ भ्रमेण अवस्तुभूतसर्पकलना तथा सच्चिदानंदात्मकब्रह्मवस्तुनि अवस्तुभूतसकलजडं पदार्थकलनाज्ञानमित्यु-च्यते । कथमिदं तथात्वेनोल्लसतीत्याह शक्तीति । अस्याज्ञानस्य तथा भासनाया-मावरणविक्षेपाख्ये शक्ति द्वे स्तो याभ्यामर्थोल्लासयतीति । तत्र यथा रज्जुस्वरू-पस्य विद्या तदावरणकर्तृत्वादावरणशक्तिस्तत्र सर्पाकारभासेन परिणममाना सर्पाकारविवर्तेन विक्षिपति । तथाभासे मरणपर्यन्तदुःखदानेन व्याकुलयतीति विक्षेपशक्तिः तथा सच्चिदानंदस्वरूपस्य तदावरणकर्तृत्वादावरणशक्तिर्ब्रह्मादि-स्थावरान्तनामरूपात्मकजगदाकाराभासेन परिणममाना जगदाकारविवर्तेन विक्षि-पति, तत्सृष्टानेकविधदुःखदानेन व्याकुलयतीति शक्तिद्वयोपेतमज्ञानमज्ञानं सकलमाभासयतीति कथनस्याशयः । रज्जुस्वरूपावरणेन सर्पाकारविवर्तनं च यथा रज्जुस्वरूपे न काचन हानिर्दृष्टा [६४अ] बुद्धेरेवावरणनिक्षेपसमापत्तिरेवं स्वरूपावरणेन जगदाकारविवर्तनं न ब्रह्मणो वस्तुनः स्वरूपे हानिः प्रमाबुद्धे-रेवावरणविक्षेपसमापत्तिरिति । तथा चाचार्याः—

' घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्यते निष्प्रभं चातिमूढः ।
तथा बद्धवद्भाति यो मूढबुद्धेः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ११ ॥ इति

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्थमध्यारोपेणाद्वैतं समर्थ्यापवादेन तन्निरासप्रकारमाह । तस्येति । यथाप्तोपदेशेन स्वयमूहितेन वा नायं सर्पः किन्तु रज्जुरिति विशेषदर्शनकालेऽधिष्ठानरज्जुसाक्षात्कारेण रज्जुज्ञाननिवृत्तौ सर्पभ्रान्तिनिवृत्तिपूर्वं तज्जनितं दुःखादिकं निवर्तते । तथाप्तोपदेशेन स्वयमूहितेन वा विशेषदर्शनकालेनेदं भानं सकलं स्वात्मना किं च न ब्रह्मैवेदं सर्वमिति साक्षात्कारेण तदज्ञाननिवृत्तौ जगद्भ्रान्तिनिवृत्तिपूर्वं तज्जनितदुःखादिकं निवर्तते इति । तथाचार्याः—

'ब्रह्मण्यवस्थिता मायाविक्षेपावृत्तिरूपिका ।
आवृत्याखंडतां तस्मिञ्जगज्जीवौ प्रकल्पयेत्' ॥ १२ ॥ इति ।

जीवगतश्च विशेषस्तैरेव विवृतो यथा ।—

'अवच्छिन्नश्चिदाभासस्तृतीयः स्वप्नकल्पितः ।
विज्ञेयस्त्रिविधो जीवस्तत्राद्यः पारमार्थिकः' ॥ १३ ॥

अवच्छिन्नो घटाकाशादिवत्प्राणादिसंघातावच्छिन्नःप्रत्यगात्मेत्येकः । उदक इव सूर्यादेर्बुद्ध्याद्युपाधौ चित्प्रतिबिम्बोपाधिधर्मास्कंदितो द्वितीयः । देवोऽहं मनुष्योऽहमित्येवं स्वप्न इव स्थूलसंघाताभेदेन कल्पितो जीवस्तृतीयः । तत्राद्योऽवच्छिन्नः पारमार्थिकमुक्तियोग्य इत्यर्थः । कथमवच्छिन्नस्य पारमार्थिकतेत्यत्रापि तैरेव समर्थितम् । —

'अवच्छेदः कल्पितः स्यादवच्छेद्यं तु वास्तवम् ।
तस्मिञ्जीवत्वमारोपाद्ब्रह्मत्वं तु स्वभावतः' ॥ १४ ॥

कल्पित इति निरवयवस्यावच्छेदायोगादुपाधिपरिच्छेदेनैव तत्परिच्छेद इति भावः । वास्तवमिति त्ववच्छेदस्य । कल्पितत्वेऽपि तदवच्छेद्यं वास्तवं चरणावरणसमारोपे चरणवेष्टनस्यावास्तवत्वेऽपि चरणत्वेन वेष्ट्यमानं वास्तवमेवेति । [ ६४ ब ] तस्मादिदमत्र सिद्धमित्याहुः ।

अवच्छिन्नस्य जीवस्य तादात्म्यं ब्रह्मणा सह ।
तत्त्वमस्यादिवाक्यानि जगुर्नेतरजीवयोः ॥ १५ ॥

इतरजीवयोश्चिदाभासस्वप्नकल्पितयोः सृष्टिप्रलयजागरस्वप्नव्यवस्था पुनरत्रेत्थमिति च तैरुक्तमिति निशम्यताम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'चिदाभासे स्थिता निद्रा विक्षेपावृत्तिरूपिणी ।
आवृत्य जीवजगती पूर्वं नूत्नेन कल्पयेत्' ॥१६॥

पूर्वं सुषुप्तिप्रलययोः प्रविकल्प्य स्वात्मसात्कृत्वा पुनः प्रबोधसृष्ट्येर्नूतनरूपेण कल्पयेत् । पुनर्जीवजगद्व्यवहारं प्रवर्तयेत् । अत एवानयोः प्रातिभासिकत्वमित्याहुः ।

'प्रतीतिकाल एवैते स्थितत्वात्प्रातिभासिके ।
न हि स्वप्नप्रबुद्धस्य पुनः स्वाप्नस्थितिस्तयोः ॥१७॥
तस्मात्प्रातिभासिकजीवस्तु जगत्तत्प्रातिभासिकम् ।
वास्तवं मन्यते यस्तु मिथ्येति व्यावहारिकः' ॥ १८ ॥

स प्रातिभासिकजीवो यस्तत्स्वप्नकल्पितं जगत् देहोऽहं मनुष्योऽहमित्यादिलक्षणम् ।

'वास्तवं मन्यते यः पुनरिदं जगन्मिथ्येति मन्यते ।
स्वप्नमतस्य जाग्रद्व्यवहाराभावात्' ॥ १९ ॥

असौ व्यावहारिकजीवः परलोकादिव्यवहारासमर्थकत्वात् । तथा च व्यावहारिकजीवलक्षणम् । भोक्तेत्यादिव्यवहारोचितः परलोकगामीचेति । तथा च 'भारतीनूपुरझांकारेः'—

'कर्तृत्वाद्यभिमानादिह परगामी च धीगता छाया ।
जीवो व्यवहर्तासौ न भिद्यते जातुचित्तस्मात्' ॥ २० ॥ इति

न भिद्यते जातुचित्तस्मादित्युक्तिस्तु पारमार्थिकजीवेनास्य व्यावहारिकजीवस्यैकसमारोपेण सामान्यतयेति समाधेयम्[1] । ततश्च

'व्यावहारिकजीवस्तु जगद्व्यावहारिकम् ।
सत्यं प्रत्येति मिथ्येति मन्यते पारमार्थिकः' ॥ २१ ॥

सत्यं कालत्रयाबाध्यम् । य इत्थं मन्यते स व्यावहारिकजीव इति योजना । यस्तु मिथ्येति मन्यतेऽसौ पारमार्थिकः इत्थं च

[६५अ] 'पारमार्थिकजीवस्तु ब्रह्मैकं पारमार्थिकम् ।
प्रत्येति वीक्ष्यते नान्यद्वीक्षते त्वनृतात्मना' ॥ २२ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न वीक्षत एव यदि कदाचिद्युक्त्या दशा......[1]वीक्षतेऽपि वा तद्-नुतात्मना वीक्षते इति । अयमत्र संक्षेपः

' आद्यः संघातदर्श्युक्तो द्वितीयः करणात्मकः ।
ब्रह्मैकदर्शी गदितस्तृतीयः पारमार्थिकः ' ॥ २३ ॥ इति

तत्राद्ययोरविद्याकल्पितत्वेन जडत्वेऽपि जीवत्वसाधकैश्च तत्प्रयो-यो-दृष्टान्तद्वाराचार्यैर्दर्शितो यथा ।—

' माधुर्यद्रव्यशैत्यादि जीवधर्मा तरङ्गके ।
अनुगम्यापि तन्निष्ठे फेनेऽप्यनुगता यथा ॥ २४ ॥
साक्षिस्थाः सच्चिदानंदाः संबद्धा व्यावहारिके ।
तद्द्वारेणानुगच्छन्ति तथैव प्रातिभासिके ' ॥ २५ ॥ इति

इत्यनुलोमक्रमेण यथा सच्चिदानंदानां यथावतरणं तथा प्रतिलोमक्रमेणारो-हणमपि येन मोक्षलाभ इति स्थितम् । तथा च

' प्रातिभासिकजीवस्य लये स्युर्व्यावहारिके ।
तल्लये सच्चिदानंदाः पर्यवस्यन्ति साक्षिणि ' ॥ २६ ॥ इति

**इति पारमार्थिकपांडित्यकथनाभिधाने तृतीयप्रकांडे सच्छास्त्रार्थ-वर्णनाभिधो जीवब्रह्मैक्यवर्णनाभिधश्च पंचाशीतितमो गुच्छकः ।**

---

## [ ८६ ]

इत्थं पारमार्थिकपाण्डित्ये कृतनिर्णये पारमार्थिकमौर्ख्यस्यावसरप्राप्तौ सत्या-मप्यसच्छास्त्रपारतयैव तल्लक्षणं गतप्रायं सन्नुपादेयत्वेन च पुनर्निदर्शनानर्हं तत्, तस्माद्यत्किंचित्सच्छास्त्रार्थव्यतिरिक्तविहितविपरीतप्रतिषिद्धसेवनलक्षणं विहिता-सेवनलक्षणं वा । तत्र दुष्टयोनिनरकपशुस्थावरादियोनिप्रापकं तत्सर्वं पारमार्थिकमौर्ख्यमिति स्थितम् । अतिगौरवात्किंचिद्वितन्यते दिङ्मात्रेण, चोप-हसिता एव त इति किंचिन्मात्रेण निदर्श्यते ।

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'उज्झित्वात्मसमाधानं ध्यायन्त्यन्यान्यदेवताः ।
भिक्षन्ते भूरिवित्तास्ते भिक्षित्वाऽपि बुभुक्षिताः ॥ १ ॥
योऽन्यथा सन्तमात्मानमन्यथा प्रति [ ६५ ब ] पद्यते ।
किं तेन न कृतं पापं चौरेणात्मापहारिणा' ॥ २ ॥

इति कृतं बहुना ।

इयत्पुनरत्र शिष्टं वर्तते । साक्षात्कृततत्त्वस्य तत्त्वसाक्षात्कारो वा गति-प्रदो मरणवेला वेति । तत्र तावदुत्तानबुद्धयः केचित्

'यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय तदा तद्भावभावितः' ॥ ३ ॥

इति स्मृतिप्रामाण्यात्पर्यन्तिक्येव वेला गतिकारणमिति । न चाप्यसौ नियमः साक्षात्कृततत्त्वस्यासौ वेलाऽवश्यं स्मृतिदायिनीति महात्मनामपि तद्वेलायामति-गहनत्वात् । अत्राभियुक्तः साक्षात्कार एव गतिकारणमिति । तथा च कृतना-शाकृताभ्यागमप्रसंगो निरवकाशो भवति । पतंजलिना चेदमेव निबद्धम् ।

'करणगणसंप्रमोषः स्मृतिनाशः श्वासकलिकताच्छेदः ।
सममर्मरुजाविशेषाः शरीरसंस्कारजो भोगः ॥ ४ ॥
स कथं विग्रहयोगे सति न भवेत्तेन मोहयोगेऽपि ।
मरणावसरे योगी न च्यवते स्वात्मपरमार्थात्' ॥ ५ ॥ इति ॥

न चास्य तीर्थपरिग्रहादि नियमोऽपि कश्चित् अधिगतस्य स्वात्मपरमार्थस्य सर्वतीर्थतीर्थत्वात् ।

तथा च 'स एव तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन्देहम् ।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः' ॥ ६ ॥ इति

वसिष्ठोऽपि तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथवा ।
ज्ञानसम्प्राप्तिसमये मुक्तोऽसौ विगताशयः ॥ ७ ॥ इति

तीर्थादि नियमः पार्यन्तिकवेलास्मरणादिकं चाज्ञाततत्त्वानामुपकारकं ज्ञात-तत्त्वानां पुनस्तत्त्वसाक्षात्कार एव फलवानिति । तथा च पतंजलिरेव:—

'पुण्याय तीर्थसेवा, निरयाय श्वपचसदननिधनगतिः ।
पुण्यापुण्यकलङ्कस्पर्शाभावे तु किं तेन' ॥ ८ ॥ इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न च यं यं वापीति स्मृतिविरोधः । तत्राप्येतदाशयात् । तथा च यं यं भावं स्वास्थ्यवेलायामसौ स्मरन्नासीत तस्यां पुनरसौ तं तं भावं स्मरन्नपि [६६अ] शरीरसंस्कारादस्मरन्तं तमेवेति न पुनस्तात्कालिकमेवेत्यनेन सूचितम् । अतश्च 'तस्मात्सर्वेषु कालेषु मामनुस्मरेति' निगदितम् । यथा तस्यामपि वेलायां स एव भावितो भावः स्मृतिं यातीति सिद्धं तीर्थादिसेवा, सत्कालवेलासम्प्रातिस्तात्कालिकस्मरणादिकं वा ज्ञाततत्त्वानां पुण्यवर्धकानीति । तथा ज्ञाततत्त्वसाक्षात्काराणां सर्वधर्माधर्मकलना यथा स्थितैव न कथंचनापि धर्ममधर्मं वा स्वफलमदत्त्वा विलीनं जायत इति । अत्र बहुश्रुताबहुश्रुतविशेषोऽकिंचित्करः । न खलु बहुश्रुतस्य पापं न स्पृशतीति, अबहुश्रुतस्य वा स्पृशतीति विचारो विमर्दसहः । तथा च धृतराष्ट्र—विदुर—सनत्सुजातप्रश्नोत्तरिकाख्यायिका । तत्र धृतराष्ट्रः । —

'ऋचो यजूंष्यथर्वेदं सामवेदं च वेद यः ।
पापानि कुर्वन्पापेन लिप्यते किं न लिप्यते' ॥ ९ ॥

सनत्सुजातः । —

'नैव सामऋचो वापि न यजूंषि विचक्षणम् ।
त्रायन्ते कर्मणः पापान्न ते मिथ्या ब्रवीम्यहम् ॥ १० ॥
आधाय स्वधियं धीमान्कुर्यात्कार्यविनिर्णयम् ।
अंधस्येवान्धलग्नस्य विनिपातः पदे पदे' ॥ इति ॥

**इति प्रासंगिककथनाभिधं षडशीतितमं कुसुमम् ।**

---

## [ ८७ ]

इति प्रासंगिकं परिसमाप्य प्रकृतं निगद्यते । एकमित्यादि । अत्रार्थः । —यो धीमान्कलनाभिज्ञः वृत्तवर्तमानवर्तिष्यमाणकलनाचतुर एकादिदशान्तं तत्तत्परिच्छेद्यवस्तूनि ज्ञात्वैकादिसप्तकान्तं वा परिच्छेद्यवस्तूनि ज्ञात्वा हेयोपादेयकलनाय यथास्थानं युञ्ज्यात् । अस्य धीसाधनस्य स्वबुद्ध्युपकारणस्य प्रेत्य परलोके इह चेहलोके वा न नरकशाश्वतादिभवं ईषत् क्लेशमात्रेणापि जायते । भूश्च क्षयगता हस्तप्राप्तास्य भवेत् । निःसपत्नमखण्डं भूराज्यं कृत्वा सुगतिमाप्नोतीत्यर्थः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा चैकादि[६६ब]क्रमेणोदाहरणमेवास्य व्याख्यानम्।

**एकं द्वौ त्रीनप्यत्र चतुरः पंचषट्सप्तमूलं**
**चाष्टौ सम्यग्धीमान्नवदश तथैकादितः सप्त यावत्।**
**ज्ञात्वा युंज्याद्य इहकालनाभिज्ञ ईषन्नचास्य**
**त्रासः प्रेत्येह च शयगता भूश्च धीसाधनस्य ॥ ४ ॥**

'एकमेवाद्वितीयैतद्यद्राजन्नावबुध्यसे।
सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव' ॥ १ ॥

धृतराष्ट्रं प्रति सञ्जयवचनमेतत्। अद्वितीयेति विभक्तिलोपः आर्षः। अथ वाद्वितीयेत्यामंत्रणपदमेतत्।

तथा।– 'एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा।
विद्यैका परमादृष्टिरहिंसैका सुखावहा ॥ २ ॥
एकः क्षमवतां दोषो द्वितीयो नोपलभ्यते।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥ ३ ॥
सोऽप्यदोषोऽस्य मन्तव्यः क्षमा हि परमं बलम्।
अक्षमावान्परं दोषैरात्मनमपि योजयेत्' ॥ ४ ॥

स्वस्य हिंसादोषः परस्य मृत्युरिति।

'एकः स्वादु न भुञ्जीत एकश्चार्थान्न चिंतयेत्।
एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात्' ॥ ५ ॥

इत्येकज्ञानम्।

'द्वे कर्मणी नरः कुर्वन्नत्र लोके विराजते।
अब्रुवन्परुषं कंचिदसतो नार्थयंस्तथा ॥ ६ ॥
द्वाविमौ पुरुषव्याघ्र परप्रत्ययकारिणौ।
स्त्रियः कामितकामिन्यो लोकः पूजितपूजकः ॥ ७ ॥
द्वाविमौ कण्टकौ राजन्शरीरपरिशोषणौ।
यश्चाधनः कामयते यश्चकुप्यत्यनीश्वरः' ॥ ८ ॥

शरीर स्वशरीरम्।

'द्वाविमौ पुरुषौ राजन्सर्वस्योपरितिष्ठतः।
प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रतापवान्' ॥ ९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यायागतस्य द्रव्यस्य बोद्धव्यौ द्वावतिक्रमौ ।
अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनम् ॥ १० ॥
द्वाविमौ ग्रसते भूमिः सर्पो बिलशयानिव ।
राजानं चाप्ययोद्धारं ब्राह्मणं चाप्रवासिनम् ' ॥ ११ ॥

ब्राह्मणः परिव्राट् तस्य परितो भ्रमणौचित्यात् ।

' द्वाविमौ पुरुषौ राजन्सूर्यमंडलभेदिनौ ।
परिवाड् योगयुक्तश्च युद्धे चाभिमुखं हतः' ॥ १२ ॥

## इति द्विकज्ञानम् ।

' त्रयो न्याया[६७अ] मनुष्याणां श्रूयन्ते भरतर्षभ ।
कनीयान्मध्यमः श्रेष्ठ इति धर्मविदो विदुः ' ॥ १३ ॥

न्यायश्चारित्रम् । ज्ञान–योग–कर्मभेदेन त्रिविधमिदम् ।

' त्रिविधाः पुरुषा राजन्नुत्तमाधममध्यमाः ।
नियोजयेद्यथावृत्तं त्रिविधेष्वेव कर्मसु ' ॥ १४ ॥

एतन्निरूपणमग्रे कर्मभेदनिरूपणे भविष्यति ।

' त्रय एवाधना राजन्भार्या दासस्तथा सुतः ।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ॥ १५ ॥
सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ' ॥ ६ ॥

## इति त्रिकज्ञानम् ।

'चत्वारि राज्ञा तु महाबलेन वर्ज्यान्याहुः पण्डितास्तानि विद्यात् ।
न दीर्घसूत्रैः सहमंत्रं प्रकुर्यादल्पप्रज्ञैरलसैश्चारणैश्च ' ॥ १७ ॥

अलसैरितिस्थाने रभसैरिति क्वचित्पाठः । रभसैर्हर्षतरलैः चारणैः सद्भिस्ततश्चरणशीलैः ।

' चत्वारि ते तातगृहे वसन्तु श्रियाभिजुष्टस्य गृहस्थधर्मे ।
वृद्धो ज्ञातिरवसन्नः कुलीनः सखा दरिद्रो भगिनी चानपत्या ' ॥८॥

वृद्धज्ञातेः कुलधर्मोपदेशकत्वात् । अवसन्नः श्रान्तः कुलीनोऽतिथित्वेन, अन्यथा श्रान्तातिथिसत्कारस्यावश्यकार्यस्य कुलीनत्वाभावे चौर्याद्यनर्थदोषायत्तेः । सखा दरिद्र ऋणी तस्य तदर्थं यत्नसंभवात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'चत्वार्याह महाराज सद्यस्कानि बृहस्पतिः ।
पृच्छयते त्रिदशेन्द्राय तानीमानि निबोध मे ॥ १९ ॥
देवतानां च संकल्पमनुभावन्तु धीमताम् ।
विनयं कृतविद्यानां विनाशं पापकर्मणाम् ' ॥ २० ॥

संकल्पश्चिकीर्षितम् । विनाशो मरणं सद्यः फलदं भवति नरकहेतुर्भवति ।

## इति चतुष्कज्ञानम् ।

'पञ्चाग्नयो मनुष्येण परिचर्याः समंततः ।
पितामाताग्निरात्मा च गुरुश्च भरतर्षभ ॥ २१ ॥
पंचैव पूजयंल्लोके यशः प्राप्नोति केवलम् ।
देवान्पितृन्मनुष्यांश्च भिक्षूनतिथिपञ्चमान् ' ॥ २२ ॥

मनुष्या अत्र ऋषयः ।

'पंचेन्द्रियस्य मत्तस्य छि[६७ब]द्रं चैकैकमिन्द्रियम् ।
ततोऽस्य क्षरति प्रज्ञा दृतेः[1]... पादादिवोदकम् ' ॥ २३ ॥
छिद्रमसंवृत्तम् । पादादाननात् ।

## इति पंचकज्ञानम् ।

'षट्दोषा पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तंद्री भयं क्रोध आलस्यं दीर्घसूत्रता ' ॥ २४ ॥

भयं स्वोच्छेदबुद्धिः ।

'षडिमान्पुरुषो जह्याद्भिन्ना नावमिवार्णवे ।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥ २५ ॥
अरक्षितारं राजानं भार्यां चाहितवादिनीम् ।
ग्रामकामं च गोपालं वनकामं च नापितम् ' ॥ २६ ॥

अप्रवक्तारं रहस्यस्य ।

'षडेव तु गुणाः पुंसा न हातव्याः कदाचन ।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः ' ॥ २७ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनालस्यमुद्योगः ।

'षण्णामात्मनि नित्यानामैश्वर्यं योऽधिगच्छति ।
न स पापैः कुतोऽनर्थैर्युज्यते विजितेन्द्रियः ' ॥ २८ ॥

*षण्णामिन्द्रियाणामैश्वर्यं वशित्वम् ।*

'षडिमे षट्सु जीवन्ति सप्तमो नोपलभ्यते ।
चौरः प्रमत्ते जीवन्ति व्याधितेषु चिकित्सकाः ॥ २९ ॥
प्रमदाः काममानेषु यजमानेषु याजकाः ।
राजा विवदमानेषु नित्यं मूर्खेषु पण्डिताः ' ॥ ३० ॥

## इति षट्कज्ञानम् ।

'सप्तदोषाः सदा राज्ञा हातव्या व्यसनोदयाः ।
प्रायशो यैर्विनश्यन्ति कृत्तमूलाश्च पार्थिवाः ॥ ३१ ॥
स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पंचमम् ।
महच्च दण्डपारुष्यमर्थदूषणमेव च ' ॥ ३२ ॥

अर्थदूषणमर्थपारुष्यम् ।

## इति सप्तकज्ञानम् ।

'अष्टौ पूर्वनिमित्तानि नरस्येह विनश्यतः ।
ब्राह्मणानां प्रथमं द्वेष्टि ब्राह्मणैश्च विरुध्यते ॥ ३३ ॥
ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति ।
रमते निन्दया चैषां प्रशंसां नाभिनन्दति ' ॥ ३४ ॥

विरुध्यते कलहं करोति ।

'नैतान्स्मरति कृत्येषु याचितश्चाभ्यसूयति ।
एतान्दोषान्नृपः प्राज्ञो बुद्ध्या बुद्ध्वा च वर्जयेत् ' ॥ ३५ ॥

कृत्येष्वाभ्युदायिककर्मसु । असूयति समक्षमेव दूषयति ।

'अष्टाविमानि हर्षस्य महास्थानानि भारत ।
व[६८अ]र्तमानानि दृश्यन्ते तान्येव सुसुखानि च ॥ ३६ ॥
समागमश्च सखिभिर्महांश्चैव धनागमः ।
पुत्रेण च परिष्वंगः सन्निपातश्च मैथुने ॥ ३७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समये च प्रियालापः स्वयूथेषु समुन्नतिः ।
अभिप्रेतस्य लाभश्च पूजा च जनसंसदि ' ॥ ३८ ॥

## इत्यष्टकज्ञानम्

' नवद्वारमिदं वेश्म त्रिस्थूणं पंचभूमिकम् ।
क्षेत्रज्ञाधिष्ठितं विद्वान्यो वेद स परः कविः ' ॥ ३९ ॥

त्रिस्थूणाः त्रिगुणाः स्तंभधारणाहेतुत्वात् । पंचभूमिकं पंचमहाभूतरचितम् ।

## इति नवकज्ञानम् ।

' दशवर्षे न जानन्ति धृतराष्ट्र निबोध तान् ।
मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।
त्वरमाणश्च भीरुश्च लुब्धःकामी च ते दश ' ॥ ४० ॥

## इति दशकज्ञानम् ।

## इत्येकादिदशपर्यन्तज्ञानं नाम कुसुमम् ।

## [ ८८ ]

अथैकादिसप्तकान्तं तथैकादितः सप्तयावदिति यन्नीतिकुसुममुद्दिष्टं तद्विवरणम् ।

यथाः— ' एकया द्वे विनिश्चित्य त्रींश्चतुर्भिर्वशी कुरु ।
पंच जित्वा विदित्वा षट् सप्त हित्वा सुखी भव ' ॥ १ ॥

व्याकोशितं चेदं मार्कण्डेयेन यथाः—

' एकया प्रज्ञया राजन्कार्याकार्यद्वयं नरः ।
विनिश्चित्य तु यः कुर्यात्कार्यं त्वत्र स पूजितः ॥ २ ॥
मध्यस्थं यदि वा मित्रं शत्रुं वा कार्यगौरवात् ।
ज्ञात्वा देशं च कालं च ह्युपायैरभ्युपक्रमेत् ॥ ३ ॥
साम-भेदः प्रदानं च उपायाः परिकीर्तिताः ।
उपायश्चतुर्थोऽत्र दण्डस्त्वगतिका गतिः ॥ ४ ॥
पंचेन्द्रियजयो येन कृत आदौ जिगीषुणा ।
तुल्या विजयस्तस्य न दूरे प्रतिभाति मे ॥ ५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पंचेन्द्रियजयं कृत्वा गुणषट्कमुपाश्रयेत् ।
बुद्ध्वा बलाबलं सम्यगात्मनश्च परस्य च ॥ ६ ॥
राजदोषाश्च ये सप्त येन त्यक्ता नराधिप !
सिद्धिं तस्य समायान्ति यथाकालं गुणा नृप ॥ ७ ॥
मृगयापानमक्षाश्च स्त्रियश्च परुषा गिरः ।
अर्थसंदूषणं चैव दण्डपारुष्यमेव च ॥ ८ ॥
एते सप्तमहादोषा[९८ब]महीपानां प्रकीर्तिताः ।
रता येषु महीपालाः समूलं नाशमाप्नुयुः ' ॥ ९ ॥

षड्गुणनिरूपणं चाग्रे सविस्तरं वक्ष्यामः ।

**इत्येकादिसप्तकान्तज्ञानाभिधं कुसुममष्टाशीतितमम् ॥**

---

[ ८९ ]

अथ च **शयगता भूश्च धीसाधनस्येति** शस्त्रादिकं कार्यसाधकं तावदस्तु यस्तु तत्स्थानीयां धियमेवाधिकां मन्यते तस्य धीसाधनस्य भूर्भूमिः शयगताऽवश्यं हस्तं यास्यतीति ।

' एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुर्भृता ।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराजकम् ' ॥ १ ॥ इति

तथाः— ' एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते ।
सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविस्रवः ' ॥ २ ॥

मन्त्रविस्रवः मन्त्रप्रसारणम् । एतदाशयेनैव राजपुरुषाणां धीबाणेत्याख्या, धीरेव बाणः कार्यसाधकं यस्येति कृत्वा ।

**इति धीमाहात्म्यकथनाभिधमेकोननवतितमं कुसुमम् ।**

---

[ ९० ]

इत्थं पण्डितापण्डितलक्षणं समूलं निदर्शनं प्रदर्श्येदानीं नीतौ दर्शयितव्यायां राजतदुपकरणलक्षणं तावदवतारयति राजेति द्वाभ्याम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजा मन्त्रिपुरोधसौ च गणको राज्ञी गजाश्वौ रथः
छत्रं चामरमासनं शरधनुरस्त्राणि खड्गास्तथा ।
सेनानीर्भृतकः सहायसुहृदोऽथो यामिको द्वाःस्थितो
दूतः सन्धिकराश्चराश्च पुरपो नागाश्वपौ सारथिः ॥ ५ ।
धर्मायव्ययदुर्गवस्त्वधिकृताः सूदाश्च पौरोगवोऽ-
स्त्राचार्यः स्थपतिश्च लेखकसभास्ताराश्च वैद्योऽस्त्रपः ।
शुद्धांताधिकृताः प्रसादमृगयाविज्ञास्तथा येऽपरे
संग्राह्या निपुणं सुधीभिरपि यै राज्यर्द्धिवृद्धिर्भवेत् ॥ ६ ॥

यैरमीभिः सल्लक्षणराजादिभिः राज्यवृद्धी राजभावकर्मलक्षणस्य राज्यस्य वृद्धिः सर्वोत्कर्षो भवेत् ते संग्राह्या इति संबन्धः ।

तत्र प्रकृतिकार्ये राजसंग्रहः राजकार्यंच सल्लक्षणप्रकृतिसंग्रहो विधेय इति[६९अ]विधिः । किंलेत्यप्रतिपत्तौ । अत्रोभयस्मिन्न कस्यचिद्विमतिरिति । तत्र राज्ञः सल्लक्षणप्रकृतिसंग्रहः स्वाधीन एव मनाक् स्वविधेयविच्युतौ न तत्स्थाने परासंजनात् । प्रकृतीनां तु परम्परागते राज्ञि प्रकृतिच्युते (चालनार्थे) यद्यपि दिक्पालांशत्वादस्य न स्वातन्त्र्यं स्वाधीनं, तथा सन्मार्गगामित्वमेव-दिक्पालांशत्वे चाल्पत्वानियामकं परथा तु दिक्पालानामेव तत्र कुपितत्वाद्वेयते[1] प्रकृतिभिरप्यसौ च्यावयितुं शक्यत एतेत्युभयविधिवचनमनवद्यम् । तथा च

'आदौ सर्वप्रयत्नेन राष्ट्रमुख्यैर्नरेश्वरः ।
परीक्ष्य सर्वैः कर्तव्यो धार्मिकः सत्यसंगरः' ।

इति राजा संग्राह्य इत्युक्तम् । तत्रापि प्रथमं राजत्वसाधकं प्रजारञ्जनं यस्य भवेदसौ यौगिक्या संज्ञया राजेत्युच्यते इति मुख्यलक्षणं राज्ञः । यथा चाभियुक्ता रघुवर्णने ।

'यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजप्रकृतिरञ्जनात्' ॥ १ ॥ इति

यथा मनुः । –'मौलाञ्छास्त्रविदः शूराँल्लब्धलक्ष्यान्कुलोद्गतान् ।
सचिवान्सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान्' ॥ २ ॥ इति

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्साधकानि च लक्षणानि यथाः—

‘ सर्वलक्षणलक्षण्यो विनेता प्रियदर्शनः ।
अदीर्घसूत्री धर्मात्मा जितक्रोधो जितेन्द्रियः ॥ ३ ॥
स्थूललक्ष्यो महोत्साहः स्मितपूर्वाभिभाषकः ।
सुरूपः शीलसंपन्नः क्षिप्रकारी महाबलः ’ ॥ ४ ॥

स्थूललक्ष्य उदारचेता बहुप्रद इत्यर्थः ।

‘ ब्रह्मण्यश्चाविसंवादी दृढभक्तिः प्रियंवदः ।
अलोलुपः संयतवागाभीरोद्धतशासनः ॥ ५ ॥
नातिदण्डो न निर्दण्डश्चारचक्षुरजिह्मगः ।
व्यवहारे समः प्राप्ते पुत्रस्य रिपुणासह ॥ ६ ॥
पूज्यपूजयिता नित्यं दण्ड्यं दण्डयिता तथा ।
षाड्गुण्यस्य प्रयोक्ता च शक्त्युपेतस्तथैव च ॥ ७ ॥
प्रजानां रक्षणार्थाय विष्णु[६९ ब]तेजः प्रवेशितः ।
मानुष्ये जायते राजा देवसत्त्ववपुर्धरः ’ ॥ ८ ॥

विदुरः।— ‘ यस्तात नो क्रुध्यति सर्वकालं भृत्यस्य भक्तस्य हिते रतस्य ।
तस्मिन्भृत्या भर्तरि विश्वसन्ति न चैनमापत्सु परित्यजन्ति ॥९॥
न भृत्यानां वृत्तिसंरोधनेन बाह्यं जनं संजिघृक्षेदपूर्वम् ।
त्यजन्ति हीनमुचितावरुद्धाः स्निग्धा ह्यमात्याः परिभोगहीनाः’।१०

उचिता इत्यवरुद्धा उचितावरुद्धाः । राजाधीनमेव जगद्वर्तेत इत्याह भगवान्व्यासः ।

‘अराजकेषु राष्ट्रेषु नैव कन्या प्रदीयते ।
विद्यते समता नैव तथा वित्तेषु कस्यचित् ॥ ११ ॥
मात्स्यो न्यायः प्रवर्तेत विश्वलोपस्तथैव च ।
लोके न कश्चिद्विद्येत गुरोर्वचनकारकः ॥ १२ ॥
नाधीयीरं त्रयीं विद्यां त्रयोवर्णा द्विजातयः ।
देवानां पूजनं न स्यादनावृष्टिस्ततो भवेत् ॥
नृलोकः सुरलोकश्च स्यातां संशयितावुभौ ’ ॥ १३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रजातरोर्मूलमिहावनीशस्तद्रक्षणाद्वृद्धिमुपैति राष्ट्रम् ।
तस्मात्प्रयत्नेन नृपस्य रक्षा सर्वैश्च कार्या विधिवत्समेतैः' ॥१४॥ इति

इत्थं तावदिह सामान्येन राजलक्षणं दर्शितम् यश्चात्र विशेषः सोऽग्रे भविष्यति ।

## इति राजलक्षणाभिधं नवतितमं कुसुमम् ।

---

## [ ९१ ]

मन्त्री राज्ञा विधातव्यो विनीतः प्रियदर्शनः ।
उत्साही स्वामिभक्तश्च प्रियवादी सुलक्षणः ॥ १ ॥
राजद्वेषेण यः कार्यं न च हन्ति महीक्षितुः ।
न लोकापवादभयं राजार्थे यस्य जायते ॥ २ ॥
क्लेशक्षमस्तथा चायं विजितात्मा जितेन्द्रियः ।
गूढमन्त्रश्च दक्षश्च प्राज्ञा रक्तो जनप्रियः ॥ ३ ॥
इङ्गिताकारतत्त्वज्ञ ऊहापोहविशारदः ।
शूरश्च कृतविद्यश्च न च मानी विमत्सरः ॥ ४ ॥

कुत्र विस्तारो देयः कुत्र च संक्षेप इत्यत्र विशारदः ।

चारप्रचारकुशलः प्रणिधिप्रणयात्मवान् ।
षाड्गुण्यविधितत्त्वज्ञ उपायकुशलस्तथा ॥ ५ ॥
[७०अ] वक्ता विधाता कार्याणां न च कार्यातिपातिता ।
समश्च राजभृत्यानां कृतज्ञश्च गुणप्रियः ॥ ६ ॥
कृतानां चाकृतानां च कर्माणां चानुवेक्षिता ।
यथानुरूपमर्हाणां पुरुषाणां नियोजिता ॥ ७ ॥
राज्ञः परोक्षं कार्याणि कृत्वा च समरे त्वरन् ।
निवेदितस्य वेत्ता च कर्मणा गुरुलाघवम् ॥ ८ ॥
विदितानि तथा कुर्यान्नाज्ञातानि महीक्षिता ।
अज्ञातानि नरेन्द्रस्य कृत्वा कार्याणि मन्त्र्यसौ ।
अचिरेणैव विद्वेषं राज्ञः गच्छत्यसंशयम् ॥ ९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं गुणो यस्य भवेच्च मन्त्री कार्ये च तस्याभिरतो विशेषात् ।
राज्यं स्थिरं स्याद्विपुला च लक्ष्मीर्यशश्च दीप्तं भुवनत्रयेऽपि ॥१०॥

**इति तृतीयप्रकाण्डे राजसमृद्धिशाखायां मन्त्रिलक्षणं नाम कुसुमम् ।**

---

[ ९२ ]

कल्पज्ञो लक्षणोपेतोऽनुकूलश्चास्तिकस्तथा ।
दैवज्ञानुगतो यस्तु स पुरोहित इष्यते ।। १ ।।
यश्चाभिमानी दीप्ताङ्गः प्रतिकूलोऽस्य स द्रुतम् ।
राज्ञा त्याज्यो भवेन्नूनं नात्र कार्या विचारणा ।। २ ।।
नक्षत्रवैतानसंहितांगिरः-क्षान्तिकल्पभेदेन पंचकल्पास्तद्वेदी कल्पज्ञः ।
नित्यनैमित्तिकं काम्यं त्रिविधं विदधीत सः ।
दैवज्ञवचनात्कर्म यथा राज्यं स्थिरीभवेत् ।। ३ ।।

**इति पुरोहितलक्षणाभिधं कुसुमम् ।**

---

[ ९३ ]

अथ गणकलक्षणम् ।

विना चन्द्रं यथा रात्रिर्मुकुटं नायकं विना ।
विना ज्योतिष्यकमेतद्राज्यं तद्वद्विनिर्दिशेत् ।। १ ।।
सुलक्षणो विनीतश्च त्रिस्कंधज्योतिषश्रमी ।
अदीनवादी धर्मज्ञो जितनिद्रो जितेन्द्रियः ।। २ ।।
अव्यङ्गो नाधिकाङ्गश्च वेदवेदाङ्गपारगः ।
चतुषष्ठ्यङ्गतत्वज्ञ ऊहापोहविचक्षणः ।। ३ ।।
भूतभव्यभविष्यज्ञो गणितज्ञो विशेषतः ।
आस्तिकः श्रद्धधानश्च प्रतिभावानृतार्थवान् ।। ४ ।।
दैवं पुरुषकारेण जेतुं यो वेत्ति तत्त्वतः ।
तमेव रक्षेद्राजा सदा देवार्चने[७०ब]रतम् ।। ५ ।।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न तत्र नागाः सुधृता न योधा राज्ञो न माता न पिता न बंधुः ।
यत्रास्य साध्ये भवतीह विद्वान्सांवत्सरो धर्मविदप्रमत्तः ॥ ६ ॥

इति दैवज्ञलक्षणं नाम कुसुमम् ।

[ ९४ ]

अथ राज्ञीलक्षणम् ।

विनीता गुरुभक्ता च ईर्षाक्रोधविवर्जिता ।
राज्ञः प्रियहिते सक्ता सुवेशा वसुलक्षणा ॥ १ ॥
भृताभृतकदानज्ञा भृत्यानामन्ववेक्षिणी ।
अभृतानां जनानां च व्यक्तिकर्मप्रवर्तिनी ॥२॥
रागद्वेषवियुक्ता च सपत्नीनां सदैव या ।
भोजनाशनपानेन सर्वासामन्ववेक्षिणी ॥ ३ ॥
सपत्निपुत्रेष्वपि या पुत्रवत्परिवर्तते ।
मन्त्रिसांवत्सराचार्यानन्यान्पूजयते सदा ॥ ४ ॥
ब्रह्मण्या च दयायुक्ता सर्वभूतानुकम्पिनी ।
कृताकृतज्ञा या राज्ञश्च विदिता मण्डलेष्वपि ॥ ५ ॥
परराजकलत्रेषु प्रीयमाना मुदान्विता ।
दूतादिप्रेषणकरी राजद्वारेषु सर्वदा ।
तद्वारेण नरेन्द्राणां कार्यज्ञा च विशेषतः ॥ ६ ॥

इति राज्ञीलक्षणं नाम कुसुमम् ।

[ ९५ ]

इत्थं लक्षितलक्षणयुताश्च नार्यो विकारिका दृष्टाः ।
दुर्लभतराश्च नृपरा[1]स्तस्माद्रक्षेत्समागमस्तासाम् ॥ १ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रकृत्या कुटिला नार्यः प्रकृत्या सरला नराः ।
तस्मात्समागमं यायात्परीक्ष्य पुरुषः स्त्रियम् ॥ २ ॥

तथा च । 'शस्त्रेण वेणीविनिगूहितेन विदूरथं स्वा महिषी जघान ।
विषप्रदिग्धेन च नूपुरेण देवी विरक्ता किल काशिराजम् ॥ ३ ॥
एवं विरक्ता जनयन्ति दोषान्प्राणच्छिदोऽन्यैरनुकीर्तितैः किम् ।
रक्ता विरक्ता पुरुषैरतोऽर्थात् परीक्षितव्याः प्रमदाः प्रयत्नात् ॥४॥
स्नेहं मनोभवकृतं कथयन्ति भावा नाभीभुजस्तनविभूषणदर्शनानि ।
वस्त्राभिसंयमनकेशविमोचनानि भ्रूक्षेपकंपनकटाक्षनिरीक्षितानि॥५॥
उच्चैः ष्ठीवनमुत्कटप्रहसनं शय्यासनोत्सर्पणं
गोत्रस्फोटनजृम्भणानि सुलभद्रव्याल्पसंप्रार्थना ।
बालालिङ्गनचुम्बनान्यभिमुखे सख्याः समालोकनं
दृक्पाताश्च पराङ्मुखे गुणकथा कर्णस्य कण्डूयनम् ॥ ६ ॥
इमां च विद्यादनुरागचेष्टां प्रियाणि वक्ति स्वधनं ददाति ।
विलोक्य संहृष्यति वीतरोषा प्रमार्ष्टि दोषान्गुणकीर्तनेन ॥ ७ ॥
तन्मित्रपूजा तदरिद्विषत्वं कृतस्मृतिः प्रोषितदौर्मनस्यम् ।
स्तनौष्ठदानान्युपगूहनं च स्वेदोऽथ चुम्बाप्रथमाभियोगः' ॥ ८ ॥

इति प्रेमचेष्टालक्षणम् ।

'विरक्तचेष्टा भ्रुकुटीमुखत्वं पराङ्मुखत्वं कृतविस्मृतिश्च ।
असम्भ्रमो दुष्परितोषिता च तद्द्विष्टमैत्री परुषं च वाक्यम् ॥ ९ ॥
स्पृष्ट्वाथवालोक्य धुनोति गात्रं करोति गर्वं न रुणद्धि यान्तम् ।
चुम्बाविरामे वदनं प्रमार्ष्टि पश्चात्समुत्तिष्ठति पूर्वसुप्ता ॥ १० ॥
भिक्षुणिका प्रव्रजिका दासी धात्री कुमारिका रजकी ।
मालाकारी दुष्टाङ्गना सखी नापिती दूत्यः ॥ ११ ॥
कुलजनविनाशहेतुर्दूत्यो यस्मादतः प्रयत्नेन ।
ताभ्यः स्त्रियोऽभिरक्ष्या वंशयशोमानवृद्ध्यर्थम् ॥ १२ ॥
दुष्टस्वभावाः परिवर्जनीया विमर्दकालेषु न च क्षमा याः ।
यासामसृग्वासितनीलपीतमाताम्रवर्णं च न ताः प्रशस्ताः' ॥ १३ ॥

इति नारीरागविरागकथनं नाम कुसुमम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ ९६ ]

अथ पुरुषलक्षणं संक्षेपेण तावत् ।-

एकाढ्यो द्विसितश्च निम्नविपुलव्यापिप्रलम्ब्यानता-
भिज्ञस्त्रिष्वथ यश्चतुर्ष्वविषमः कृष्णः सुगन्धस्तथा
ह्रस्वं पञ्चसु सौक्ष्म्यभागपि च तथा दीर्घस्तथा चोन्नतः
षट्सु स्नेहयुतश्च सप्तसु तथा वंशोन्नतश्चाष्टसु ॥ १ ।
शुद्धस्यान्नवके बृहच्च दशके पद्मप्रभश्चापि यः
स्याद्यापि समश्चतुर्दशमुखः स्यात्षोडशाक्षस्तथा
तेनेयं जगती जिता विजयते भूमण्डलेऽसौ सदा
याप्यं व्यस्ततया फलं खलु समप्राढ्या जना दुर्लभाः ॥ २ ॥

अत्रार्थः । एते गुणा महापुरुषाणां महाराज्ञां वा विधेयाः । परं ते तत्सामस्त्यं मनुष्याणां [ ७१ ब ] भुवि दुर्लभम् । देवतोपलक्षकत्वादमीषामिति । अन्तरे पुनरेतत्प्रचुरा महापुरुषा महाराजानो वा भवन्ति । अल्पतया चैतत्सत्वे मध्यममनुष्यत्वम् । असत्वे पुनरधमत्वमिति । तत्र सांसारिकाणां धर्मार्थकामसारत्वं नियतम् । तन्मध्ये धर्मोध्यक्ष्यवानेकाढ्य इति । कनीनिके विना शुक्लनेत्रः शुक्लदशनश्च द्विसित इति । त्रिष्विति निम्नादिषु संबध्यते । त्रिनिम्नः त्रिविपुलः त्रिव्यापी त्रिप्रलंबी त्र्यानतः त्र्यभिज्ञ इति । तत्र नाभीस्वरसत्वगभीरस्त्रिनिम्नः । तथाच वराहाचार्यः । ' नाभीस्वरः सत्वमिति प्रशस्तं गभीरमेतत्त्रितयं नराणाम् ' । वक्त्रोरोललाटविस्तीर्णस्त्रिविपुलः । तथा च स एव वदतीति 'उरो ललाटं वदनं च पुंसां विस्तीर्णमेतत्त्रितयं प्रशस्तं' । तेजोयशःश्रीभिः सर्वव्यापकस्त्रिव्यापी । प्रलंबमानभुजवृषणकर्णस्त्रिप्रलंबी । देवद्विजगुरुप्रश्रयी आनतः । धर्मार्थकामसेवाकालवित् अभिज्ञ इति सिद्धम् । निम्नविपुलव्यापिप्रलंब्यानताभिज्ञस्त्रिष्विति । अथ यश्चतुर्षु अविषमः कृष्णः सुगन्धः ह्रस्व इति । तत्राङ्गुलिहृदयपृष्ठकटीष्वविषमश्चतुरविषमः । कनीनिकाभ्रूकेशश्मश्रूकृष्णश्चतुःकृष्णः । नासास्यस्वेदकक्ष्यासौगन्ध्यवांश्चतुर्गन्धः । लिङ्गग्रीवाजंघोभयह्रस्वश्चतुर्ह्रस्व इति । पञ्चसु सौक्ष्म्यभागपि तथा दीर्घ इति पञ्चसूक्ष्मः पञ्चदीर्घश्चेति । अङ्गुलि–केश–नख–द्विज–त्वक्षु सूक्ष्मः पञ्चसूक्ष्मः । हनुनेत्रललाटनासास्तनांतरदीर्घः पंचदीर्घः । तथा च वराहाचार्यः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'हनुलोचनबाहुनासिकाः स्तनयोरन्तरमत्र पञ्चमम् ।
इति दीर्घमिदं तु पञ्चकं न भवत्येव नृणामभूभृताम् ' ॥३॥ इति

[७२अ] षट्सून्नत इति वक्षोकक्ष्यनखनासाकृकाटिका इति । सप्तसु स्नेहयुत इति । त्वक्केशलोमदन्तदृग्वाणीनखेषु स्निग्ध इति । वंशोन्नतश्चाष्टसु इति । जानुभुजोरुपृष्ठनासा वंशवत्सरला उन्नताश्च यस्यासावष्टवंशोन्नत इति । शुद्धःस्यान्नवके इति । नवसंख्याङ्केऽङ्गजाते नेत्रनासाकर्णोभयमेढ्पायुमुखच्छिद्रलक्षणे यः शुद्धो मलरहित इति । तथा च बृहद्दशक इति । दशसंख्याङ्के गणे बृहन्महामानः । तच्च दशकम् । पाणिपादमुखग्रीवाश्रवणहृदयशिरोललाटोदरपृष्ठलक्षणम् । अमीषु महामान इति पीवर इति यावत् ।

दशके च पद्माभः । तच्च जिह्वौष्ठताल्वुनेत्रान्तपाणिपादस्तनाशिश्नाग्रवक्षोलक्षणमनेन खलु पद्मवर्णाभेन सद्भाग्याः पुरुषा भवन्तीति । समश्चतुर्दशस्विति । पाद-गुल्फ-स्फिक्पार्श्ववृषणेक्षणहनुकर्णोष्ठसक्थिजंघाहस्तभुजभ्रूयुगुलानि यस्य परस्परसमानि स भाग्यवानिति । षोडशाक्षस्तथेति ।

'विद्यास्थानानि यानीह कथितानि चतुर्दश ।
तत्पूर्वं नेत्रयुग्मेन यः पश्यति स पूरुषः' ॥४॥ इति षोडशनेत्रः ।

इति महापुरुषमहाराजलक्षणानि तावत्सामान्येनोदितानि यश्चात्र विशेषोऽसौ समनन्तरमेवायास्यतीत्यास्तां तावत् । तत्र मानेनापि चोत्तममध्यमाधमत्वं लक्ष्यते । तत्र वराहमिहिरः ।–

' अष्टशतं षण्णवतिः परिमाणं चतुरशीतिरिति पुसाम् ।
उत्तमसमहीनानामङ्गुलसंख्या स्वमानेन ' ॥ ५ ॥

अष्टाधिकं शतमष्टशतमिति मध्यमपदलोपी समासः ।

तथा ।– ' भारार्धतनुः सुखभाक्तुलितोऽतोदुःखभाग्भवत्यूनः ।
भारोऽतीवाढ्यानामध्यर्धः सर्वधरणीशः ' ॥ ६ ॥

तत्र भारमानं[७२ब]खारी=आढकौ(२)पलाः(२०)भारार्धमेतदर्धं द्रोणः आढकः १ पलाः१० अध्यर्धभारः खारी १ द्रोणः १ इति । एतदुभयमानपरीक्षां च स एवाह ।

' विंशतिवर्षा नारी पुरुषः खलु पञ्चविंशतिभिरब्दैः ।
अर्हति मानात्मानं जीवितभागे चतुर्थे वा ' ॥ ७ ॥ इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र मानं तुला । मानमुन्मानमङ्गुलमानम् ।

**इति महाराजलक्षणाभिधं कुसुमम् ।**

---

## [ ९७ ]

अत्रैव प्रसङ्गाद्राज्ञीलक्षणमपि मात्रया लिख्यते ।

'भृङ्गारासानवाजिकुंजररथश्रीवृक्षयूपेषुभि-
र्माला कुण्डलचामरांकुशयवैः शैलैर्ध्वजैस्तोरणैः ।
मत्स्यस्वस्तिकवेदी काव्यजनकैः शंखातपत्राम्बुजैः
पादे पाणितलेऽथवा युवतयो गच्छन्ति राज्ञीपदम् ॥ १ ॥

तथा निगूढमणिबन्धनौ तरुणपद्मगर्भोपमौ
करौ नृपतियोषितस्तनुविकृष्टपर्वाङ्गुली ।
न निम्नमतिनोन्नतं करतलं सुरेखान्वितं
करोत्यविधवां चिरं सुतसुखार्थसंभोगिनीम् ॥ २ ॥

मध्याङ्गुलिं या मणिबन्धनोत्था रेखागता पाणितलेऽङ्गनायाः ।
ऊर्ध्वा स्थिता पाणितलेऽथवा या पुंसोऽथवा राज्यसुखाय सा स्यात्' ॥ ३ ॥

**इति राज्ञीलक्षणाभिधं कुसुमम् ।**

---

## [ ९७ अ ]

अथ हस्तिलक्षणम् ।

राज्यं हस्तिविराजितं व्रजति यत्कीर्तिं च सांग्रामिकीम्
यात्रा तैः समये विराजतितरां तल्लक्षणं तद्ब्रुवे ।
भद्राद्यैः शुभलक्षणैर्भवति तद्वृद्धं विहीनं तथा
शण्ठाद्यैरिति तत्परीक्षणमतो हर्षाय संख्यावताम् ॥ १ ॥
मृगो मन्दश्च भद्रश्च संकीर्तिश्च शुभा इमे ।
गन्धेभोऽभ्यर्चितास्तेषां राज्यश्रीकीर्तिवर्धनाः ॥ २ ॥
वामनो मत्कुणो मूढो पालकः कुल्बकस्तथा ।
सत्कुदन्तौ वामकुटोऽस्सस्पृक्कूटोऽथ[1] शण्ठकः ॥ ३ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विकटश्चेति विज्ञेया हानिदा हस्तिनी च या ।
हस्तिलक्षणसंयुक्ता[७३अ]गर्भिणी चात्र नो शुभा ' ॥ ४ ॥

अथैषां लक्षणानि ।

'पञ्चोन्नतिः सप्त मृगस्य दैर्घ्यमष्टौ च हस्ताः परिणाहमानम् ।
एकद्विवृद्धावथ मन्दभद्रौ संकीर्णनागोऽनियतप्रमाणः' ॥ ५ ॥

एकेति । एवं मन्दस्य षडुच्छ्रायः । अष्टौ दैर्घ्यं नवपरिणाहः । भद्रस्य सप्तोच्छ्रायः । नवदैर्घ्यं दशपरिणाहः । तत्र च मानकलना यथा

' मुखादासेचकं दैर्घ्यं पृश्निपार्श्वोदरान्तरम् ।
अनाह उच्छ्रयः पादाद्विज्ञेयो यावदासनम्' ॥ ६ ॥ इति ॥

अनियतप्रमाण इति संमिश्रप्रमाणः ।

' कृष्णो मदश्चाभिहितो मृगस्य मन्दस्य हारिद्रकसन्निकाशः ।
भद्रस्य वर्णो हरितो मदश्च संकीर्णनागस्य सदा विमिश्रः ' ॥ ७ ॥

एतन्मध्य एवैकः कश्चिदतिमदो गन्धगजः ।

तथा ' पुरीषगन्धमादाय यस्यारण्येऽपि हिंसकाः ।
दूरादेव पलायन्ते व्याघ्राद्या गांधिकस्त्वसौ ॥ ८ ॥
विस्तीर्णनाभिहनुकर्णललाटगुह्याः कूर्मोन्नतैर्द्विनवविंशतिभिर्नखैश्च ।
रेखात्रयोपचितवृत्तकराः सुवाला धन्या भवन्ति मदपुष्करमारुताश्च' ॥९॥

द्विनवाष्टादशकूर्मोन्नतैर्मध्योन्नतैः रेखात्रयं च दैर्घ्येण स्थितमिति ध्येयम् ।

पाराशरः ।—

' विंशत्यष्टादशनखाः स्थिराः कूर्मोन्नतान्तराः ।
गजानां पूजिताः पादा ये च स्युरकचाविलाः ॥ १० ॥
दीर्घाङ्गुलिरक्तपुष्कराः सजलाम्भोदनिनादबृंहिणः ।
बृहदायतवृत्तकन्धरा धन्या भूमिपतेर्मतङ्गजाः' ॥ ११ ॥

पुष्करं करान्तः, अङ्गुलिः करान्तगता मांसपेशी ।

मार्कण्डेयः ।—

कर्णौ च विपुलौ येषां सूक्ष्मबिंदूचितत्वचौ ।
ते प्रशस्ता महानागा तथा सप्तसु सुस्थिताः ॥ १२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सप्तसुस्थितलक्षणं यथाः–

'वर्णः सत्वं बलं रूपं कान्तिः संहननं जयः ।
सप्तैतानि सदा यस्य स गजः[७३ब]सप्तसुस्थितः ॥ १३ ॥

तथा येषां भवेद्दक्षिणपार्श्वभागे रोम्णां च पुञ्जः पिटकोऽथ वापि ।
ते नागमुख्या विजयाय युद्धे भवन्ति राज्ञां न हि संशयोऽत्र ॥१४॥
दन्तच्छेदेषु दृश्यन्ते येषां स्वतिकलक्षणम् ।
भृङ्गारबालव्यजनांकुशास्ते स्युः सुलक्षणाः ' ॥ १५ ॥

अत्र भार्गवः ।–

'गजमाने ह्यङ्गुलं स्यादष्टभिस्तु यवोदरैः ।
चतुर्विंशत्यङ्गुलैस्तैः करः प्रोक्तो मनीषिभिः ॥ १६ ॥
बृहद्दण्डवालस्तु धृतशीघ्रगतिः सदा ।
गजश्रेष्ठस्तु सर्वेषां शुभलक्षणसंयुतः ' ॥ १७ ॥

## इति शुभगजलक्षणम् ।

अथ वामनादीनां लक्षणम् । तत्रादौ सामान्येनानिष्टगजलक्षणम् ।

आनाहायामसंयुक्तो योऽतिह्रस्वो भवेद्गजः ।
वामनः स गजो प्रोक्तो भर्तुर्नार्थयशप्रदः ॥ १८ ॥
सर्वलक्षणसंपूर्णो दन्तैस्तु परिवर्जितः ।
मत्कुणः स समाख्यातः संग्रामे प्राणहारकः ॥ १९ ॥
नीलतालु नीलजिह्वो वक्रदन्तो ह्यदन्तकः ।
लु ...[1] क्रूरमदस्तथा पृष्ठविधूननः ॥ २० ॥
दशाष्टो न नखो मन्दो भूविशोधकपुच्छकः ।
एवंविधो गजोऽनिष्टो विपरीतः शुभावहः ॥ २१ ॥
दशां चतुर्थीं संप्राप्य वर्धेत यस्य न द्विजौ ।
स्थूलावनायतौ स्यातां स मूढाख्यो गजाधमः ॥ २२ ॥
अकपालेन विशालेन दन्तेनैकेन वारणः ।
पराजयप्रदो ज्ञेयो राज्ञां संग्रामयायिनाम् ॥ २३ ॥

---

1 Corrupt.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संक्षिप्तवक्षोजघनः पृष्ठमध्यसमुन्नतः ।
प्रमाणहीन उन्नाभिः स कुब्जो वारणाधमः ॥ २४ ॥
उर्ध्वोन्नताभ्यां सदन्तः कुदन्तो बाह्यसन्नतः ।
वामोन्नतरदो नागो वामकूटश्च कथ्यते ॥ २५ ॥
दन्तावस्रस्पृशौ यस्य सोऽस्रस्पृक् कथितो बुधैः ।
एकदन्तस्तथा नागः कूट इत्यभिधीयते ॥ २६ ॥
पादयोः सन्निकर्षः स्या[७४अ]द्यस्य नागस्य गच्छतः ।
स शंठो ध्वनियुद्धे च लक्षणज्ञैर्न पूजितः ॥ २७ ॥
अस्रत्र्यभ्याधिकं यस्य विस्तरेण स्तनान्तरम् ।
विकरः स विनिर्दिष्टो दुर्गतिर्निन्दितो गजः ॥ २८ ॥

अत्र वराहाचार्यः—

'स्वल्पवक्त्ररुमहत्कुणशण्ठान् हस्तिनीं च गजलक्षणयुक्ताम् ।
गर्भिणीं च नृपतिः परदेशं प्रापयेदतिविरूपफलास्ते' ॥ २९ ॥

गजलक्षणयुक्ता स्थूलदन्ता समदा चेत्यर्थः ।

## इत्यशुभगजलक्षणानि ।

अत्रैव महायतीनां महीपतीनां शुभाशुभज्ञानाय हस्तिचेष्टितं कथ्यते । तत्रादौ दन्तकल्पनम् ।

'दन्तस्य मूलपरिधिं द्विरायतं प्रोज्झ्य कल्पयेच्छेषम् ।
अधिकमनूपचराणां न्यूनं गिरिचारिणां किञ्चित्' ॥ ३० ॥

परिधिमितं द्विगुणं कृत्वा तत्प्रमाणं त्यक्त्वा शेषं कल्पयेत् छिंद्यात् । अनूपचराणां जलचराणाम् । श्रीवत्सवर्धमानछत्रध्वजचामरानुरूपेषु च्छेदेषु दृष्टेष्वारोग्यविजयधनवृद्धिसौख्यानि । प्रहरणसदृशेषु जयो । नन्द्यावर्ते प्रणष्टदेशाप्तिः । लोष्टे लब्धपूर्वस्य देशस्य संप्राप्तिः भवति । लोष्टे मृतखण्डौ कृतौ स्त्रीरूपेषु विनाशो । भृङ्गारेऽभ्युत्थिते सुतोत्पत्तिः । कुम्भेन निधिप्राप्तिर्यात्राविघ्नं च दण्डेन । स्त्रीरूपे योषिदाकृतौ । कृकलासकपिभुजङ्गेषु सुभिक्षव्याधयो रिपुवशित्वम् । गृध्रोलूकध्वांक्षश्येनाकारेषु जनमारकः[1] 'पाशे बाधकबन्धे जन-

1 Corrupt.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मृत्युर्जन ..., रूक्षे दुर्गंधे चाशुभं भवति। पाशः सर्पाकारः।

'शुक्लः समः सुगन्धिः स्निग्धोऽपि शुभावहो च्छेदः।
गलनम्लानिफलानि च दन्तस्य समानि भङ्गेन' ॥ ३१ ॥

गलनं भाण्डस्येव विदलनं। स्रावश्च म्लानं वैवर्ण्यं समानि फलेन, भङ्गो वक्ष्यमाणः।

'मूलमध्यदशनाग्रसंस्थिता देवदैत्यमनुजाः क्रमात्ततः।
स्फीतमध्यपरि[७४ब]पेलवं फलं शीघ्रमध्यचिरकालसंभवम्' ॥३२॥

फलं शुभमशुभं वा।

दन्तभङ्गफलमत्र दक्षिणे भूपदेशबलविद्रवप्रदम्।
वामतः सुतपुरोहिते भयान् हन्ति साटविकदारनायकान्' ॥३३॥

अत्रापि मूलमध्यप्रान्तकल्पना क्रमेणोह्या। साटविकेत्याद्यापि वामत एव। एवमेव प्रागतिदिष्टगलनम्लानफलमपि वाच्यम्।

'आदिशेदुभयभङ्गदर्शनात्पार्थिवस्य सकलं कुलक्षयम्।
सौम्यलग्नतिथिभादिभिः शुभं वर्धते शुभमतोऽन्यथा वदेत्' ॥३४॥

उभयभङ्गदर्शनादिति—उभयोर्दन्तयोः स्फोटदर्शनात्। शुभमिति शुभाचिह्नं वर्धते, उत्पन्नं वृद्धिं याति। पापलग्नादिभिरशुभं चिह्नं वृद्धिं याति अन्योन्यतायां याप्यमिति भावः।

'क्षीरमृष्टफलपुष्पपादपेष्वापगातटविघट्टनेन वा।
वाममध्यरदभङ्गखण्डनं शत्रुनाशकृदतोऽन्यथा परम्' ॥ ३५ ॥

वामदन्तस्य मध्ये स्फोटनमेतैर्यदि स्यात्। अन्यथेति दुष्टवृक्षैर्मूलाग्रयोस्तस्था दक्षिणदन्तमूलमध्याग्रेषु न शुभमिति।

'स्खलितगतिरकस्माद्रस्तकर्णोऽतिदीनः।
श्वसिति मृदु सुदीर्घं न्यस्तहस्तः पृथिव्याम्।
द्रुतमुकलितदृष्टिः स्वप्नशीलो विलोमो
भयकृदहितभक्षी नैकशोऽसृक्शकृत्कृत्' ॥ ३६ ॥

---

1 Corrupt,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वल्मीकस्थाणुगुल्मक्षुपतरुमथनस्वेच्छयाहृष्टदृष्टि-
र्यायाद्यात्रानुलोमं त्वरितपदगतिर्वक्त्रमुन्नाम्यचोच्चैः
कक्ष्यासन्नाहकाले जनयति मुहुः शीकरं बृंहितं वा
तत्काले वा मदाप्तिर्जयकृदथ रदं वेष्टयन्दक्षिणं च ॥ ३७ ॥

वेष्टयन्करेणालम्बयन् ।

'प्रवेश[७५अ]नं वारिणि वारणस्य ग्राहेण नाशाय भवेन्नृपस्य ।
ग्राहं गृहीत्वोत्तरणं गजस्य तोयात्स्थलं वृद्धिकरं नृभर्तुः' ॥३८॥

**इति राजोपकरणवर्णनाख्ये तृतीयप्रकाण्डे गजलक्षणाभिधाना शाखा ।**

---

## [ ९८ ]

'सन्त्येव यानानि महीपतीनां महार्घलभ्यानि परंतु वाजी ।
अनर्घ्य इत्येष महामणीनां मूर्धेति तल्लक्षणमुच्यतेऽद्धा' ॥ १ ॥

अद्धा तत्त्वतः ।

'दीर्घग्रीवाक्षिकूटात्रिकहृदयपृथुस्ताम्रताल्वोष्ठजिह्वः
सूक्ष्मत्वक्केशवालः सुशफगतिमुखो ह्रस्वकर्णोष्ठपुच्छः ।
जंघाजानूरुवृत्तः समसितदशनश्चारुसंस्थानरूपो
वाजी सर्वाङ्गशुद्धो भवति नरपतेः शत्रुनाशाय नूनम्' ॥ २ ॥

केशा मूर्धजा, वालाः पुच्छजात्वौष्ठः उत्तरौष्ठः, पुच्छः पुच्छस्थलम् यत्रास्थिलग्ना वाला जायन्ते, सुप्रमाणेन सुलक्षणेन शफगतिमुखानि यस्य ।
अथ मानादिवर्णनम् ।—

'जघन्यमध्यज्येष्ठानामश्वानामायतिर्भवेत् ।
अङ्गुलानां शतं हीनं विंशत्यादशभिस्त्रिभिः ॥ ३ ॥
परिणाहाङ्गुलानि स्युः सप्ततिः पञ्चसप्ततिः ।
एकाशीति समानेन त्रिविधः स्याद्यथाक्रमम् ॥ ४ ॥
तथा षष्टिश्चतुषष्टिरष्टाषष्टः समुच्छ्रयः ।
द्विपञ्चसप्तकयुता विंशतिः स्यान्मुखायतिः ।
श्मश्रुहीनं मुखं कान्तं प्रलम्बं तुङ्गनासिकम्' ॥ ५ ॥ इति

For Private and Personal Use Only

अथावर्तलक्षणम्

' रन्ध्रोपरन्ध्रयोर्द्वौद्वौद्वौद्वौ सृक्कवक्षसोः ।
प्रमाणे च ललाटे च ध्रुवावर्ता दशस्मृताः ॥ ६ ॥
एकोऽपि न भवेद्यस्य ध्रुवावर्तस्तु वाजिनः ।
नासौ प्रशस्तो गदितः तस्मात्तं परिवर्जयेत् ॥ ७ ॥

रोमवर्तो ध्रुवावर्तः प्रमाणमुत्तरौष्ठाधो भागः । तत्र कुक्षिनाभिमध्यभागे रन्ध्रस्थानम् । तदुपर्युपरन्ध्रम् ।

तथा च पराशरः —

' कुक्षिनाभ्यन्तरे रन्ध्रमुपरन्ध्रं तथोपरि ' । इति

एवं एको [७५ब] रन्ध्र एकोऽप्युपरन्ध्रे द्वयोः पार्श्वयोश्चत्वार इति ।

' ये प्रमाणगलकर्णसंस्थिताः पृष्ठमध्यनयनोपरिस्थिताः ।
ओष्ठसक्थिभुजकुक्षिपार्श्वगास्ते ललाटसहिताः सुशोभनाः ' ॥८॥

प्रमाणमुक्तलक्षणम् । गलो निगालाक्षः, पृष्ठं पर्याणस्थानम्, नयनोपरि भ्रूसमीपे, भुजौ प्राग्भागे, जानूपरि कुक्षिरत्र यामभागे, ललाटं भ्रूमध्यम् ।

अस्रुपातश्चक्षुरधो भागः, गलं हृत्कण्ठसन्धिः, कर्णनिकटभागः शङ्खकः, जानुनी जङ्घासन्धी, ककुत् बाहुपृष्ठभागः, चरणाः सर्वे पादाः ।

' कृष्णताल्वुर्द्विदन्तश्च यमजः कृष्णजिह्वकः ।
हीनदन्तो द्विदन्तश्च द्विशफः श्वित्रवांस्तथा ॥ ९ ॥
ककुदि कृष्णपुच्छश्च मूकस्तितिरिसन्निभः ।
विषमश्वेतपादश्च ध्रुवावर्तविवर्जितः ।
अशुभावर्तसंयुक्तो वर्जनीयस्तुरङ्गमः ॥ १० ॥
आवर्तस्तु निगालस्थो ज्ञेयो देवमणिः शुभः ।
कण्ठतो रोदमानश्च ज्ञेयावेतौ शुभाशुभौ ॥ ११ ॥
शुकेन्द्रगोपसंकाशा ये च वायससन्निभाः ।
सुवर्णवर्णाः स्निग्धाश्च प्रशस्यन्ते सदैव ते ' ॥ १२ ॥

अत्र शालिहोत्रः ।—

' यः सन्नद्धो हयो रावमूर्ध्ववक्त्रं करोति हि ।
खुराग्रेण स्पृशन्भूमिं स शंसति रणे जयम् ॥ १३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यः करोत्यसकृन्मूत्रं पुरीषं चास्रमोचनम् ।
स शंसति पराभूतिं तथोपहतोऽपि यः ॥ १४ ॥
निर्निमित्तं निशीथे यो ह्रेषते भूपतेर्हयः ।
स शंसति ध्रुवं तस्य स्थिरस्यापि प्रयाणकम् ॥ १५ ॥
स्फुलिङ्गा यस्य दृश्यन्ते पुच्छतो वह्निसंभवाः ।
निर्गच्छन्तः प्रभोर्नाशं ते वदन्ति निशागमे ॥ ६ ॥
अश्वशालां समासाद्य यदा च मधुमक्षिकाः ।
मधुजालं प्रबध्नन्ति तदाश्वा[७६अ]न्हन्ति सर्वशः ॥ १७ ॥
ब्राह्मणं वाचयेत्तत्र नित्यं वेदविचक्षणम् ।
तिलहोमं तथा कुर्याज्जपेच्च शतरुद्रियम् ॥ १८ ॥
सितो रक्तस्तथा पीतः सारङ्गः पिङ्गः एव च ।
नीलः कृष्णोऽथ सर्वेषां श्वेतः श्रेष्ठतमः स्मृतः ॥ १९ ॥
श्वेतः प्रालेयसंकाशो रक्तः कुंकुमसन्निभः ।
हरिद्रासन्निभः पीतः सारङ्गश्चित्रितः स्मृतः ॥ २० ॥
पिङ्गश्च कपिलाकारो नीलो दूर्वाग्रसन्निभः ।
कृष्णो ह्रस्वफलाकारः शास्त्रज्ञैः समुदाहृतः ॥ २१ ॥
पीताभः श्वेतपादो यस्तथा स्यात्सितलोचनः ।
चक्रवाकः स विज्ञेयो राजार्हो वाजिसत्तमः ॥ २२ ॥
मुखे चन्द्रकरावर्ते जम्बूफलसमाकृतिः ।
श्वेतपादः स विज्ञेयो मक्षिकाक्षः सुपूजितः ॥ २३ ॥
चत्वारोऽप्यसिताः पादाः सर्वश्वेतस्य वाजिनः ।
भवन्ति यस्य स त्याज्यो यमदूतः स दूरतः ॥ २४ ॥
यस्य पादाः सिताः सर्वे पुच्छं वक्षो मुखं तथा ।
मूर्धजास्तु सिता यस्य तं विद्यादिष्टमङ्गलम् ॥ २५ ॥
भस्माभं तुरगं जह्यात्सुचिरेण नराधिपः ।
यदि कर्माणि वाञ्छेत् स तत्करोति महद्भयम् ॥ २६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्य वर्णविभेदेन जायते रोमसंचयः ।
पुष्पाक्षः स परित्याज्यः सर्ववाजिभयावहः ॥ २७ ॥
यस्य पादाः सिताः सर्वे तथा वक्त्रं च मध्यतः ।
पञ्चकल्याणकः प्रोक्तः शतकल्याणकृद्धयः ॥ २८ ॥
विमिश्रवर्णकाः सर्वे प्रशस्ता वाजिनः स्मृताः ।
कृष्णनीलस्य मिश्रत्वमेवमुक्त्वा सुदूरतः ॥ २९ ॥
यस्य कृष्णेतरा वर्णा वृद्धिं यान्ति शनैः शनैः ।
नाशयन्ति तथा नीचान्स करोति जयं मुहुः ॥ ३० ॥
यस्याधमेन वर्णेन च्छाद्यन्ते हि प्रधानकाः ।
वृद्धिं गच्छन्ति ते सोऽपि करोति हयसंक्षयम् ॥ ३१ ॥
त्रयो यस्य ललाटेस्युरावर्ताश्चोत्तरोत्तराः ।
त्रिकूटः स परिज्ञेयो वाजिव्याधिकरः परम् ॥ ३२ ॥
एवमेव प्रकारेण त्रयो ग्रीवासमाश्रयाः ।
वद्यावर्ताः स वाजीशो जायते भूपमन्दिरे ॥ ३३ ॥
लटा[७६ब]टे युगलावर्तश्चन्द्रकोशः प्रकीर्तितः ।
वाजिनो यदि तौ स्यातां वाजिवृद्धिकरौ मतौ ॥ ३४ ॥
रोमावर्तो भवेद्यस्य वाजिनो दक्षिणाश्रयः ।
स करोति महत्सौख्यं स्वामिनः शिवसंज्ञितः ॥ ३५ ॥
तद्वामाश्रयः क्रूरः स करोति धनक्षयम् ।
इन्द्राख्यावुभौ शस्तौ नृपराज्यविवृद्धिदौ ॥ ३६ ॥
कर्णमूले यदावर्तस्तन्मध्ये च तथा परः।
विजयाख्यावुभौ शस्तौ युद्धकाले जयप्रदौ ॥ ३७ ॥
स्कन्धपार्श्वे यदावर्त एको वा यदि वा त्रयः ।
चक्रवर्ती स विज्ञेयो वाजी भूपालवृद्धिदः ॥ ३८ ॥
स्कन्धे यस्य महावर्त एको वाष्टौ भवन्ति च ।
चिन्तामणिः स विज्ञेयो वित्तवृद्धिकरो हि सः ॥ ३९ ॥
शुक्राक्षौ तालुकेशस्थौ चावर्तौ कीर्तिवृद्धिदौ ।
यो हयः स्वामिभक्तोऽसौ सदैव च सुखावहः ॥ ४० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जानुदेशे यदावर्तो भवेद्यस्य च वाजिनः ।
प्रवासं सततं ब्रूते स भर्तुः क्लेशसंयुतम् ॥ ४१ ॥
वाजी मेढ्रतलावर्तो वर्जनीयो महीभुजा ।
स करोति परं नाशं परस्परसमुद्भवम् ॥ ४२ ॥
पृष्ठवंशे यदावर्तो यस्यैकः संप्रजायते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतः बुधैः ॥ ४३ ॥
गुह्ये पुच्छे गले यस्य भवन्त्यावर्तकास्त्रयः ।
स कृतान्तसुरूपेण वर्जनीयस्तुरङ्गमः ॥ ४४ ॥
षट्पदाभो भवेद्यस्य कृष्णतालुर्न दुष्यति ।
शुक्लपादमुखो वाथ आवर्तैः कुत्सितैः परैः ' ॥ ४५ ॥

अत्र वैराहाचार्यः ।—

' चन्द्रांशुशुक्लास्तुरगाः प्रशस्ताः कर्णान्तकेशैर्गवलालिवर्णैः ।
ये रक्तवर्णाश्च समग्रपादैः शुक्लाश्च वर्णेन महानुभावाः ' ॥४६॥

कान्तिलक्षणमाह वररुचिः ।—

' बालार्काग्निप्रवालद्रुतकनकनिभा वह्निजैश्वर्यवृद्ध्यै
नीलाम्भोजाभ्रवर्णा भवति सलिलजा सर्वदुःखापहर्त्री ।
गम्भीरा नीलवर्णा दिशति च तुरगे पार्थिवी सर्वकामा
वायव्यारूक्षवर्णा त्वशुभफलकरी निन्दिता व्योमजा च' ॥४७॥

गतिलक्षणं चाह वराहाचार्यः ।—

' त्वरित[७७अ]गतिविलासैर्विक्षिपन्पादमुच्चै-
र्व्रजति नकुलगामी कम्पयन्स्वं शिखाग्रम् ।
अथ विकटखुराग्रैर्दह्यमानो यथोर्वीम्
स्पृशति चरणपातैस्तैस्तिरं चैव यातम् ॥ ४८ ॥
स्थिरपदनिहतांसो दूरमुन्नम्य वक्त्रम्
व्रजति च सुविलासं बर्हिवद्बर्हिगामी ।
सुगतमथ तुरङ्गं योऽधिरुह्याभिगच्छेत्
स भवति सुखगामी शत्रुनाशं च कुर्याद् ' ॥ ४९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ महिषवराहश्चोष्ट्रमार्जारगामी
कपिकरटशृगालैस्तुल्यगामी च योऽश्वः ।
स दिशति धननाशं शत्रुनाशं च कुर्यात्
भवति न च सुखाय स्वामिनः शोकदाता ' ॥ ५० ॥

शत्रुभ्यो नाशः शत्रुनाश इति पञ्चमीति योगविभागात्पञ्चमीसमासः ।

अथ स्वरलक्षणम् ।

' भेरीशङ्खनृसिंहद्विपपवनवृषस्निग्धगम्भीरनादाः
वीणा-पुंस्कोकिलानां मधुरपटुरवा वाजिनो राजवाहाः ।
काकोलूकोष्ट्रभासश्च खरवृकरवा रूक्षविच्छिन्नघोषा
अन्ये चेत्थं प्रकारास्त्वशुभफलकरा हानिशोकप्रदाश्च ' ॥५१॥
सायं ग्रीष्मे तु शरदि प्रातश्चं च वहेत्सदा ।
वर्षासु न वहेदीषत्तथा विषमभूमिषु ॥ ५२ ॥

अत्रोशनाः ।—

' सायं प्रातश्च हेमन्ते शिशिरे कुसुमागमे ।
सुगत्याग्निर्बलं दार्ढ्यमारोग्यं वर्धते हरेः ।
भारमार्गपरिश्रान्तं शनैश्चंक्रमयेद्धयम् ॥ ५३ ॥
गच्छेत्षोडशमात्राभिरुत्तमाश्वो धनुःशतम् ।
यथा यथा न्यूनगतिरश्वो हीनस्तथा तथा ' ॥ ५४ ॥

अथ गतिशिक्षानिरूपणम् ।

' सहस्रचापप्रमितं मण्डलं गतिशिक्षणे ।
उत्तमं वाजिनो मध्यं तदर्धं च तदर्धकम् ॥
अल्पं शतधनुः प्रोक्तमल्पं च तदर्धकम् ॥ ५५ ॥
शतयोजनगन्ता स्याद्दिनैकेन यथा हयः ।
गतिं संवर्धयेन्नित्यं तथा मण्डलविक्रमैः ॥ ५६ ॥

अथ कषाताडनवेला स्था[७७ब]नकथनम् ।

' हेषायां स्कन्ध उद्दिष्टः स्खलिते जघनान्तरम् ।
भीतौ वक्षःस्थलं हन्याद्वक्त्रं चोन्मार्गगामिनि ॥ ५७ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुपिते पुच्छसंस्थानं भ्रान्ते जानुद्वयं तथा ' ।

अथ भार्गवः ।—

ह्रेषिते कक्ष्ययोर्हन्यात्स्खलिते पक्षयोस्तथा ॥ ५८ ॥
भीतौ कलौत्तरे चैव ग्रीवासून्मार्गगामिनि ।
कुपिते बाहुमध्ये च भ्रान्तचित्ते तथोदरे ॥ ५९ ॥
अश्वं संताडयेत्प्राज्ञो नान्यस्थानेषु कर्हिचित् ।
सर्वथा प्राप्तदण्डस्य दण्डमेकं निपातयेत् ॥ ६० ॥
अस्थाने ताडितो वाजी बहुदोषं प्रकुप्यति ।
तावद्भवन्ति ते दोषा यावद्वाजी स जीवति ' ॥ ६१ ॥

अथैषां वयोमानलक्षणम् ।

' षड्भिर्दन्तैः सिताभैर्भवति हयशिशुस्तैः कषायैर्द्विवर्षः
सन्दंश्यैर्मध्यमान्त्यैः पतितसमुदितैस्त्र्याब्धिपञ्चाब्दिकाश्वः ।
सन्दंशानुक्रमेण त्रिकपरिगणिताः कालिकाः पीतशुक्लाः
काचा मक्षीकशङ्खावटचलनमतो दन्तपातं च विद्धि ' ॥ ६२ ॥

अत्रार्थः । अश्वानामधोदन्तपाल्यां दंष्ट्रोभयमध्ये षट् दन्ताः । तैः षड्भिर्दन्तैरग्रवर्तिभिर्द्वयोरपि पाल्योः सिताभैः शिशुरेकवर्षारोह्यश्वो ज्ञेय इति । तैरिति । तैः षड्भिर्दन्तैः कषायैः कृष्णलोहितवर्णैः द्विवर्षः । संदंशेति दन्तपाल्यः सममध्यवर्तिनौ द्वौ द्वौ दन्तौ संदंशावुच्यते । तत्पार्श्ववर्त्येकैको मध्यमः । तयोरपि पार्श्ववर्त्येकैकोऽन्त्यसंज्ञः । ततश्च संदंशैः पतितसमुदितैस्त्रिवर्षः । मध्यमैः पतितसमुदितैश्चतुरब्दः । अन्त्यैः पतितसमुदितैः पञ्चाब्द इति संदंशानुक्रमेणेति । अयमर्थः । संदंशदन्तेषु चोत्कालिका कृष्णबिन्दुस्तदा षड्वर्षः । मध्यमेषु चेत्सप्ताब्दः । अन्त्येषु चेदष्टाब्दः । एवं संदंशानुक्रमेण पीतबिम्बावेकादशाब्दः । तत्राप्ययं क्रमः । संदंशेषु न[७८अ]वमाब्दः । मध्यमेषु दशाब्दः । अन्त्येष्वेकादशाब्दः । इति । एवमग्रेऽपि । संदंशमध्यमान्त्यक्रमेण क्रमो ज्ञेयः । अतश्च शुक्लबिन्दौ चतुर्दशाब्दः । काचवल्लौ सप्तदशाब्दः । मक्षिकाकृतौ विंशत्यब्दः । शङ्खाकृतौ त्रयो विंशत्यब्दः । अवटे च्छिद्रबिन्दौ षड्विंशाब्दः । चलने कम्पने एकत्रिंशदब्दः । पतने द्वात्रिंशदब्दः । एकमन्तरे मध्यमान्तक्रमेण

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रमो ज्ञेयः । द्वात्रिंशदब्द एवं ह्यश्वस्य परमायुरिति । द्वात्रिंशदब्दप्राप्तः परमायुः प्राप्त इति । तथा च मुनिमतम् ।

‘ समाः षष्टिर्द्विघ्ना (१२५) मनुजकरिणां पञ्च च निशा
हयानां(३२)द्वात्रिंशत्खरकरभयोः पञ्चककृतिः(२५) ।
विरूपासाद्वायु[1](२४)र्वृषभमहिषयोर्द्वादश(१२)शुनः
स्मृतं छागादीनां दशकसहिताषट्(१६) च परमम् ॥ ६३ ॥

## इत्यश्वलक्षणस्तबकोऽयं समाप्तः

अथास्येङ्गितलक्षणम् ।

‘ उत्सर्गान्न शुभदमासनात्परस्थं वामे च ज्वलनमतोऽपरं प्रशस्तम् ।
सर्वाङ्गज्वलनमवृद्धिदं हयानां द्वे वर्षे दहनकणाश्च धूपनं वा ’ ॥ ६४ ॥

आसनं पर्याणस्थानम् । तस्मात्पश्चिमभागे वामपार्श्वे ज्वलनं शुभम् । अश्वानामुत्पातवशेन ज्वालारूपमवयवेषु दृश्यते तत्रोत्सर्गोऽयं यदपरभागतद्वाम-पार्श्वज्वलनमशुभमिति ।

‘ अन्तःपुरं नाशमुपैति मेढ्रे कोशः क्षयं यात्युदरे प्रदीप्ते ।
पायौ च पुच्छे च पराजयः स्याद्वक्त्रोत्तमाङ्गज्वलने जयश्च’ ॥६५॥

उत्पातरूपत्वे सत्यपि जयादिफलकथनं न विरुध्यते शुभसूचकत्वादप्यु-पयातस्य । तथा च शुभाशुभसूचको महाभूतविकार इति तल्लक्षणम् ।

‘ नासापुटप्रोथशिरोऽश्रुपाते[७८ब]नेत्रेषु रात्रौ ज्वलनं जयाय ।
पलाशताम्रासितकर्बुराणां नित्यं सिताभस्य शुकस्य चेष्टम्’ ॥ ६६॥

एतद्बाह्याङ्गानामेकतमस्य द्वयोर्बहूनां निशि दिने च ज्वलनं शस्तमिति ।

‘ प्रद्वेषो यवसाम्भसां प्रपतनं स्वेदो निमित्तं विना
कम्पो वा वदनाच्च रक्तपतनं धूमस्य वा संभवः ।
अस्वप्नश्च विरोधिनां निशि दिवा निद्रालसध्यानता
सादोऽधोमुखता विचेष्टितमिदं नेष्टं स्मृतं वाजिनाम् ’ ॥ ६७ ॥

यवस्तृणादेः विरोधितां वाजिनां रात्रौ परस्परं वैरं कुर्वन्ता जागरणमिति ।

‘ आरोहणमन्यवाजिनां पर्याणादियुतस्य वाजिनः ।
उपवाह्यतुरङ्गमस्य वा कल्पस्यैव विपन्नशोभना ’ ॥ ६८ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आदिना पुरुषयुतस्यान्यवाजिनामुपर्यारोहणं नेष्टम् । उपवाह्येति यस्मिन्प्रत्यहमारुह्यते तस्याकस्मान्मरणं नेष्टमिति ।

'क्रौञ्चवद्रिपुवधाय ह्रेषितं ग्रीवया त्वचलया च सोन्मुखम् ।
स्निग्धमुच्चमनुनादि हृष्टवद्ग्रासरुद्धवदनैश्च वाजिभिः ॥ ६९ ॥
पूर्णपात्रदधिविप्रदेवतागन्धपुष्पफलकाञ्चनादि वा ।
द्रव्यमिष्टमथवा परं भवेद्धेषतां यदि समीपतो जयः ॥ ७० ॥
भक्ष्यपानखलिनाभिनन्दिनः पत्युरौपयिकनन्दिनोऽथवा ।
सव्यपार्श्वगतदृष्टयोऽथवा वाञ्छितार्थफलदास्तुरङ्गमाः' ॥ ७१ ॥

सव्यपार्श्वमात्मीयदक्षिणपार्श्वम् ।

'वामैश्च पादैरभिताडयन्तो महीं प्रवासाय भवन्ति भर्तुः ।
सन्ध्यासु दीप्तामवलोकयन्तो ह्रेषन्ति चेद्बन्धपराजयाय' ॥७२॥

सन्ध्यास्विती सूर्योदयमध्याह्नसायमर्धरात्रेषु दीप्तां दिशमवलोकयन्तो ह्रेषन्ति ।

'अतीव ह्रेषन्ति किरन्ति बालान्निद्रारताश्च प्रवदन्ति यात्राम् ।
रोमत्यजो दीनखरस्वनाश्च पांसून्ग्रसन्तश्च भयाय दृष्टाः' ॥७३॥

बालाः पुच्छस्थाः ।

'समुद्गवद्दक्षिण[७९अ]पार्श्वशायिनः पदं समुत्क्षिप्य च दक्षिणं स्थिताः ।
जयाय शेषेष्वपि वाहनेष्विदं फलं यथासंभवमादिशेद्बुधः' ॥ ७४ ॥

समुद्गवत् जानुनी योजयित्वा शेषेषु गजकरभादिषु यथा संभवमिति तेषां धूमाग्निकणाभावात् ।

'आरोहति क्षितिपतौ विनयोपपन्नो
यात्रानुगोऽन्यतुरगं प्रतिह्रेषते च ।
वक्त्रेण वा स्पृशति दक्षिणमात्मपार्श्वं
योऽश्वः स भर्तुरचिरात्प्रचिनोति लक्ष्मीम् ॥ ७५ ॥
मुहुर्मुहुर्मूत्रशकृत्करोति न ताड्यमानोऽप्यनुलोमयायी ।
अकार्यभीतोऽश्रुविलोचनश्च शिवं न भर्तुस्तुरगोऽभिधत्ते' ॥७६॥

अकार्यभीतो मशकसूकरादिर्विना ।

**इति राजोपकरणप्रकाण्डे वाजिलक्षणशाखा समाप्ता ।**
**कुसुमं चाष्टानवतितम् ।**

---

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ ९९ ]

अथोद्दिष्टक्रमानुसारेणावसरप्राप्तं रथलक्षणं यद्यप्यस्ति तथापि तस्य निर्मेयत्वान्निर्माणस्य च स्वेच्छाधीनत्वादिभादिवद्धेयोपादेयतायोगाभावाल्लक्षणं विस्तरभयान्न वितन्यते। तथापि संक्षेपेण तत्स्वरूपम्। यथा—

'लोहसारमयश्चक्रसुगमो मञ्चकासनः।
स्वान्दोलाचित्तरूढस्तु[1] मध्यमासनसारथिः॥ १॥
शस्त्रास्त्रसन्धार्युदर इष्टच्छायो मनोरमः।
एवंविधो रथो राज्ञा रक्ष्यो नित्यं सदश्वकः'॥ २॥

अथ छत्रलक्षणम्

'मयूरहंसपुच्छस्रशुकसारसपक्षजम्।
बलाकापत्रजं वापि छत्रं धार्यं तथैकजम्॥ ३॥
मिश्रपक्षं न कर्तव्यं दुकुलेन तदच्छादयेत्।
वृत्तं चित्रपताकाभिर्भरितं मौक्तिकोम्भितम्॥ ४॥
दण्डोऽस्य कार्यः सौवर्णो नवसप्ताष्टपर्ववान्।
षड्हस्तो नृपते राज्ञी-कुमारा-विप्रमन्त्रिणाम्[1]॥ ५॥
सार्धपञ्चकहस्तोऽन्याविकृतां पञ्चहस्तकः।
चतुर्हस्तो परेषां च विप्राणां चतुरश्रकम्'॥ ६॥
वृत्तमेव तथान्येषां व्यासाद्दण्डार्धमेव च।
[७९ब]स्वर्णरौप्यप्रवालानां ताम्रवैडूर्ययोरपि॥ ७॥
चन्दनक्षीरिवृक्षस्य स्वर्णरुक्मोम्भितोमनः[1]।
स्वर्णरौप्यमयश्चापि चित्ररत्नविभूषितः।
दण्डः कार्यश्च रक्षैषा भूभुजां भूमिरक्षिणाम्'॥ ८॥

वराहस्तु पर्वफलमाह:—

'मातृ २ भू ४ धन ६ कुलक्षयावहा १० रोग मृत्युजननाश्च पर्वभिः।
द्वयादिभिर्द्विकविवर्धितैः क्रमात् द्वादशान्तविरतैः समैः फलम्'॥९॥

समैः समसङ्ख्याकैः, तस्माद्द्वादशान्तं समपर्वकलनायां चतुःषट्दशाष्टद्वादशसङ्ख्यायां विकल्पः। विषमपूर्वफलं च स एवाह।

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'यात्रा प्रसिद्धिर्द्विषतां विनाशो लाभाः प्रभूता वसुधागमश्च ।
वृद्धिः पशू( ११ )नाममभिवाञ्छितानि( १३ )स्त्यायेष्वयुग्मेषु-
तदीश्वराणाम्' ॥ १० ॥ इति
तस्मात्त्रयोदशतः परं फलमात्रं न विशेषफलमिति सिद्धम् ।

इति छत्रलक्षणाभिधं कुसुममेकोनशतम् ।

---

[ १०० ]

अथ चामरलक्षणम् ।

'देवैश्चमर्यः किल बालहेतोः सृष्टा हिमक्ष्माधरकन्दरेषु ।
आपीतवर्णाश्च भवन्ति तासां कृष्णाश्च लाङ्गूलभवाः सिताश्च' ॥१॥

इति बालैककारणत्वात्तासां ताभ्यश्चामरार्थं बालादाने न काचिच्छंकेति मुनिमतम् ।

तत्र महाराजचामरे विशेषः ।—

'एकतः शुक्लवर्णं तत्परतोऽसितवर्णकम् ।
चालयेच्च महीपानां जाग्रतामनुवासरम् ॥ २ ॥
शोभैषेषां स्मृतिश्चैषां शुद्धानां पालनादयः ।
पापिनां तु सदा कार्यमिति तद्द्वयमर्थवत् ॥ ३ ॥
अध्यर्धहस्तप्रमितोऽस्य दण्डो हस्तोऽथवारत्निसमोऽनुरूप[1]ः ।
काष्ठाच्छुभात्काञ्चनरौप्यगुप्ताद्रत्नैस्तथा नात्र मतश्च वेणुः' ॥ ४ ॥

नात्र मतश्च वेणुरिति विधानाच्छत्रदण्डवेणोरप्यौचितीति ।

'यष्ट्यातपत्राङ्कुशवेत्रचापवितानकुन्तध्वजचामराणाम् ।
व्यापीततन्त्री मधुकृष्णवर्णा वर्णक्रमे[८०अ]णैव भवन्ति दण्डाः'॥५

व्यापीतो ब्राह्मणस्येत्यादि क्रमेण वर्णाः। तन्त्रीवर्णः पीतलोहितः, मधुवर्णं ईषत्पीतः।

इति चामरलक्षणम् ।

---

1 Corrupt.

For Private and Personal Use Only

[ १०१ ]

अथासनलक्षणम्।

'क्षीरवृक्षोद्भवं कार्यं राजभद्रासनं शुभम्।
अध्यर्धहस्तमुच्छाया त्रिहस्तो विस्तरात्तथा ॥ १ ॥
अर्धमायामतस्तच्च चतुरस्रं हितप्रदम्।
नाष्टाश्रिजा तु तत्कार्यं न वृत्तं दीर्घमेव च ॥ २ ॥
स्ववर्णरौप्यताम्रैश्च चित्रितं रचनायुतम्।
प्रशस्तरत्नभरितं तच्च कार्यं विचक्षणैः ॥ ३ ॥
न रत्नप्रतिरूपश्च विधेयं तच्छुभार्थिभिः।
चत्वारः पुरुषास्तस्य विन्यस्याद्द्विगुणास्तथा ॥ ४ ॥
सिंहास्तद्द्विगुणादास्यो विभूतिसुखमिच्छता।
तत्रापि तूलभरितं राज्ञः कार्यं सुखासनम् ॥ ५ ॥
वैय्याघ्रचर्मास्तरणं तदूर्ध्वं च वरासनम्' ॥ ६ ॥

अत्र वराहाचार्यः काष्ठविशेषेण फलमाह।

'यः सर्वः श्रीपर्ण्या पर्यङ्को निर्मितः स धनदाता।
असनकृतो रोगहरस्तिंदुकसारेण वित्तकरः ॥ ७ ॥
यः केवलशिंशपया विनिर्मितो बहुविधं स वृद्धिकरः।
चन्दनमयो रिपुघ्नो धर्मयशोदीर्घजीवितकृत् ॥ ८ ॥
यः पद्मकपर्यङ्कः स दीर्घमायुः श्रियं श्रुतं वित्तम्।
कुरुते शालेन कृतः कल्याणं शाकरचितश्च ॥ ९ ॥
केवलचन्दनरचितं काञ्चनगुप्तं विचित्ररत्नयुतम्।
अध्यासन्पर्यङ्कं विबुधैरपि पूज्यते नृपतिः ॥ १० ॥
शुभदौ तु सालशाकौ परस्परं संयुतौ पृथक्चैव।
तद्वत् पृथक्प्रशस्तौ सहितौ च हरिद्रककदम्बौ ॥ ११ ॥
अम्भःस्पन्दनचन्दनवृक्षाणां स्पन्दनाच्छुभाः पादाः।
फलतरुणा शयनासनमिष्टफलं भवति सर्वेण ॥ १२ ॥
गजदन्तः सर्वेषां प्रोक्ततरूणां प्रशस्यते योगे।
कार्योऽलङ्कारविधिर्गजदन्तेन प्रशस्तेन ॥ १३ ॥

1 Corrupt.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रशस्तेनेत्युक्तं तत्र च्छेदवेलायमङ्गानुसारेण फलं गजचेष्टितेषूह्यम् ।

[८०अ]एकद्रुमेण धन्यं वृक्षद्वयानिर्मितं च धन्यतरम् ।
त्रिभिरात्मजवृद्धिकरं चतुर्भिरर्थं यशश्चाग्र्यम् ॥ १४ ॥
पञ्चवनस्पतिरचिते पञ्चत्वं याति तत्र यः शेते ।
षट्सप्ताष्टनवकाणां काष्ठैर्घटिते कुलविनाशः ॥ १५ ॥

इत्यासनलक्षणं कुसुमम् ॥

---

## [ १०२ ]

अत्रैव प्रसङ्गात्वस्त्रासनगतः फलविशेषो लिख्यते ।

वस्त्रस्य कोणेषु वसन्ति देवा नराश्च पाशान्तदशान्तमध्ये ।
शेषास्त्रयश्चात्र निशाचरांशास्तथैव शय्यासनपादुकासु ॥ १ ॥
लिप्ते मषीगोमयकर्दमाद्यैश्छिन्नैः प्रदग्धे स्फुटिते च विन्द्यात् ।
पुष्टं नवेऽल्पाल्पतरं च भुङ्क्ते पापं शुभं चाधिकमुत्तरीये ॥२॥
रक्षांशेष्वथवापि मृत्युः पुंजन्मतेजश्च मनुष्यभागे ।
भागेऽमराणामथ भोगवृद्धिः प्रान्तेषु सर्वत्र वदन्त्यनिष्टम् ॥ ३ ॥
कङ्कप्लवोलूककपोतकाकक्रव्याद्गोमायुखरोष्ट्रसर्पैः ।
छेदाकृतिर्दैवतभागगापि पुंसां भयं मृत्युसमं करोति ॥ ४ ॥

इति वस्त्रासनलक्षणाभिधं कुसुमम् ।

---

## [ १०३ ]

अथ शरलक्षणम् ।

शरत्काले ग्रहीतव्या वंशाः काञ्चीकीरात्तजाः ।
कुमारजन्मभूजा वा शरांस्तेषां प्रकल्पयेत् ॥ १ ॥
स्निग्धा निमग्नपर्वाणः सारवन्तः समाहिताः ।
रजवो मधुवर्णाभाः सुजाता शरदादृढाः ॥ २ ॥
स्नायुश्लिष्टा सुनेत्राश्च सुपुङ्खा कलनासमाः ।
तैक्ष्ण्यधौताश्च कर्तव्या रुक्मपुङ्खविभूषिताः ॥ ३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा विषमपर्वाणाः फलैश्च व्रजवर्जितैः ।
एकस्त्रिपुङ्खः कर्तव्यो राजहंसच्छरोत्तरः[1] ॥ ४ ॥
रुक्मपुङ्खः सुवर्णाग्रोऽप्ययाफलसुभूषितः[1] ।
स्नायुबद्धं बलं तस्य रुक्मबद्धं च कारयेत् ॥ ५ ॥
वर्णैश्च लक्षणोपेतैश्चित्रितं तं प्रकल्पयेत् ।
ग्रहणं तस्य कर्तव्यं सांवत्सरकरान्नृपैः ॥
तस्यार्चा च सदा कार्या साभिषेकसमा भवेत् ॥ ६ ॥

## इति शरलक्षणाख्यं कुसुमम् ।

---

अथ धनुर्लक्षणम्

(८१अ) शृङ्गं दारु च लोहं च धनुर्द्रव्यं गुणस्य च ।
वंशत्वग्भङ्गचर्माणि वांशे ये च त्वचो गुणाः ॥ १ ॥
अन्ययोश्चर्मभङ्गोत्थो नो मानं शार्ङ्गलौहयोः ।
दारुचापश्चतुर्हस्तस्तदर्धोनस्त्रिधा मतः
श्रेष्ठादिभेदात्तन्मध्यं वृत्तं मुष्ट्यर्हमुच्यते ॥ २ ॥

गुणस्य चेति गुणस्य ज्याया अपि द्रव्यं त्रितयमिति शेषः । तदाह वंशत्वगिति । तत्र वंशरचिते धनुषि वंशत्वगेव गुणः अन्ययोस्तु शार्ङ्गलौहयोश्चर्ममयो वंशभङ्गोत्थो वेति । अन्यत्स्पष्टम् ।

स्वल्पा कोटिस्तु वार्क्षाणां शार्ङ्गलोहमये पुनः ।
कामिनीभ्रूलताकारा कोटिः कार्या सुसंस्कृता ॥ ३ ॥
पृथग्वा दारुमिश्रे वा लोहशार्ङ्गे तु कारयेत् ।
शार्ङ्गस्नायुचितं कार्यं रौक्यबिंदुविभूषितम् ॥ ४ ॥
विद्युद्दग्धादि वृक्षोत्थं काष्ठं यत्नेन वर्जयेत् ।
सजातिहतशृङ्गं च लौहं तत्स्याच्चतुर्विधम् ॥ ५ ॥
स्वर्णं रजतं ताम्रं कार्ष्णायसमथापि वा ।
सरत्नं तत्र सौवर्णं शार्ङ्गं त्रिविधमुच्यते ॥ ६ ॥

---

1 Corrupt.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माहिषं शारभं चैव रौहितं वृक्षजेषु च ।
अष्टस्वप्यधिकमुक्तं चान्दनं वैतसं तथा ॥ ७ ॥
सालशाल्मलिशालानां ककुभस्यार्जुनस्य च ।
वंशस्य च तदुत्पन्नं काष्ठं तत्र शुभं विदुः ॥ ८ ॥
वंशो गङ्गातटाज्जातो गोमत्याः साल एव च ।
वेतसश्च वितस्ताया धनुष्कर्मणि शस्यते ॥ ९ ॥
राज्ञा चापस्य कर्तव्या पूजा शरवरस्य च ।
खण्डस्य च विशेषेण स्थितिश्चैषा सुरालये ॥ १९ ॥

इति धनुर्लक्षणकुसुमम् ॥

---

[ १०५ ]

अथ रत्नलक्षणम् ।

तत्र पराशरस्तदुत्पत्तिप्रकारमाह ।

भुवः प्रभावाज्जातानि रत्नानि विविधानि च ।
शिलाश्च रत्नरूपत्वं कालाद्गच्छन्ति च स्वयम् ॥ १ ॥
वज्रेन्द्रनीलमरकतकर्केतरपद्मरागरुधिराख्याः ।
वैडूर्यपुलकविमलकराजमणिस्फटिकशशिकान्ताः ॥२॥
[८१ब] सौगन्धिकगोमेदकशङ्खमहानीलपुष्परागाख्याः ।
ब्रह्ममणि ज्योतीरससस्यकमुक्ताप्रवालानि ॥ ३ ॥
सर्वाण्येतानि शस्तानि धार्याण्येव महीभुजा ।
सुवर्णप्रतिबद्धानि जयारोग्यसमृद्धये ॥ ४ ॥

अत्र वराहमिहिरः ।

रत्नेन शुभेन शुभं भवति नृपाणामनिष्टमशुभेन ।
यस्मादतः परीक्ष्यं दैवं रत्नाश्रितं तज्ज्ञैः ॥ ५ ॥
रत्नजातिषु सर्वासु चत्वार्युत्कृष्टतापदम् ।
वज्रं मौक्तिकशोणे च नीलं तल्लक्षणं ब्रुवे ॥ ६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेषां गुरुत्वं रागश्च स्वच्छत्वं रश्मिशालिता।
अन्तःप्रभत्वं वैमल्यं सुसंस्थानत्वमेव च॥ ७॥
गुणवन्तो विनिर्दिष्टा धार्यास्ते गुणसंयुताः।
खण्डाः सशर्करा ये च निष्प्रभा मलिनास्तथा॥
न ते धार्या नरेन्द्राणां जयश्रीजीवितैषिणाम्॥ ८॥

इति सामान्यलक्षणम्। अथ विशेषलक्षणे सर्वरत्नमूर्धन्यवज्रलक्षणम्।

अम्भस्तरति यद्वज्रमभेद्यं विमलं च यत्।
षट्कोणं लघु शुद्धं तद्धार्यं वज्रं महीक्षिता॥ ९॥
प्रभा च शक्रचापाभा यस्यार्काभिमुखी भवेत्।
तं वज्रं धारयन्राजा सर्वाञ्जयति शाश्वतान्॥ १०॥

अत्र वराहाचार्यः।—

रक्तं पीतं च शुभं राजन्यानां सितं तु विप्राणाम्।
शैरीषं वैश्यानां शूद्राणां शस्यतेऽसिनिभम्॥ ११॥

शैरीषं शुक्लपीतम्। अशुभवज्रलक्षणानि स एवाह।

काकपदमक्षिकाकेशधातुयुक्तानि शर्करैर्विद्धम्।
द्विगुणाश्रि दग्धकलुषत्रस्तविशीर्णानि न शुभानि॥ १२॥

द्विगुणाश्रिद्विगुणाभ्री रश्मिभिर्युतम्।

यानि च बुद्बुददलिताग्रचिपिटवासीफलप्रदीर्घाणि।
सर्वेषां चैतेषां मूल्याद्भागोऽष्टमो हानिः॥ १३॥
वज्रं न किञ्चिदपि धारयितव्यमेके
पुत्रार्थिनीभिरबलाभिरुशन्ति तज्ज्ञाः।
शृङ्गाटकत्रिपुटधान्यकसंस्थितं य-
च्छ्रोणीनिभं च[८२अ] शुभदं तनयार्थिनीनाम्॥ १४॥
स्वजनविभवजीवितक्षयं जनयति वज्रमनिष्टलक्षणम्।
अशनिभयविषादिनाशनं शुभमुपभोगकरं च भूभुजाम्॥१५॥

अथैतदन्मूल्यकथनम्। तत्रादौ तदुपयोगिमानकथनम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सितसर्षपाष्टकं तण्डुलो भवेत्तण्डुलैस्तु विंशत्या ।
तुलितस्य द्वे लक्षे मूल्यं द्विद्व्यूनिते चैतत् ।। १६ ।।
पादत्र्यंशार्धोनं त्रिभागपञ्चांशषोडशांशाश्च ।
भागश्च पञ्चविंशः शतिकः साहस्त्रिकश्चैवम् ।। १७ ।।

अत्रार्थः । विंशतितण्डुलप्रमितस्य हीरस्य कार्षापणानां द्वे लक्षे मूल्यम् । द्विद्व्यूनितस्यास्य द्वाभ्यां द्वाभ्यां तण्डुलाभ्यामूनितस्य पादेत्यादिमूल्यम् । तथा च—अष्टादश तण्डुलमितस्य पादेत्यादिमूल्यम् । तथा च अष्टादशतण्डुलमितस्य पादोनं लक्षद्वयम् । षोडशमितस्य त्रिभागहीनम् । चतुर्दशमितस्यार्धमेकलक्ष-मितियावत् । द्वादशमितस्य लक्षतृतीयांशो मूल्यम् षष्ट्यधिकसषट्शतषट्षष्टि-सहस्राणि । दशमितस्य पञ्चांशः चत्वारिंशत्सहस्राणि । अष्टमितस्य षोडशांशाः सार्धद्वादशसहस्राणि । षण्मितस्य पञ्चविंशो भागः अष्टसहस्राणि । चतुर्मितस्य शतांशः सहस्रद्वयम् । द्विमितस्य सहस्रांशः शतद्वयम् । अन्तरे स्वधियोह्यम् ।

अथैतद्भेदनिरूपणम् ।

वेण्णातटे विशुद्धं शिरीषकुसुमप्रभं कौसलकम् ।
सौराष्ट्रिकमाताम्रं वज्रं कृष्णं तु शूर्परके ।। १८ ।।

शिरीषकुसुमप्रभं श्वेतपीतप्रभम् । आताम्रमीषद्रक्तम् ।

ईषत्ताम्रं हिमवति मतङ्गजं वल्लपुष्पसंकाशम् ।
आपीतं च कलिङ्गे श्यामं पौण्ड्रेषु संजातम् ।। १९ ।।

ईषत्ताम्रमत्राताम्रवर्णम् । वल्लपुष्पसंकाशं मनाक् पाण्डुरम् ।

अथैषां देवताकथनम्

ऐन्द्रं षडश्रि शुक्लं याम्यं सर्पास्यरूपमसितं च ।
कदलीकाण्डनिकाशं वैष्णवमिति[८२ब]सर्वसंस्थानम् ।। २० ।।

ऐन्द्रमिन्द्रदैवतम् । सर्पास्यरूपं सर्पमुखरूपम् । कदलीकाण्डनिकाशं पीतनीलम् ।

वारुणमबलागुह्योपमं भवेत्कर्णिकारपुष्पनिभम् ।
शृङ्गाटकसंस्थानं व्याघ्राक्षिनिभं च हौतभुजम् ।। २१ ।।

अबलागुह्योपमं शृङ्गाटकसंस्थानं त्रिकोणम् । व्याघ्राक्षिनिभं नीललोहितम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वायव्यं च यवोपममशोककुसुमोपमं समुद्दिष्टम् ।
स्रोतः खनिः प्रकीर्णकमित्याकरसंभवस्त्रिविधः ॥ २२ ॥

यवोपमं मध्यस्थूलम् । अशोककुसुमोपमं लोहितम् । स्रोतो जलप्रवाहः । खनिराकरः । प्रकीर्णकं यस्यां भूमौ मणयो जायन्ते यथा समुद्रे । इति वज्र-स्त्रिविधः ।

## इति हीरमणिनिरूपणाख्यं कुसुमम् ।

---

## [ १०६ ]

अथैतदधरवर्तिमुक्तालक्षणम् । अत्र वराह एतदुत्पत्तिस्थानानि वक्ति ।

द्विपभुजगशुक्तिशङ्खाभ्रवेणुतिमिसूकरप्रसूतानि ।
मुक्ताफलानि तेषां बहुसाधु च शुक्तिजं भवति ॥ १ ॥
सिंहलकपारलौकिकसौराष्ट्रिकताम्रपर्णिपारशवाः ।
कौबेर्यपाण्ड्यवाटकहैमक इत्याकरा अष्टौ ॥ २ ॥

हैमको हिमवान् । मार्कण्डेयः ।—

मौक्तिकानां तु सर्वेषां वृत्तत्वं गुण उच्यते ।
स्वच्छता सुशुक्लत्वं महत्त्वं चापि कीर्तितम् ॥ ३ ॥

वराहाचार्यः ।—

ऐरावतकुलजानां पुष्यश्रवणेन्दुसूर्यदिवसेषु ।
ये चोत्तरायणभवा ग्रहणेऽर्केन्दोश्च भद्रेभाः ॥ ४ ॥

ऐरावतकुलजातानामेतादृशयोगजातानां भद्राख्यजातानां च कुम्भकुहरेषु मुक्ता जायन्ते ।

तथा च—

तेषां किल जायन्ते मुक्ताः कुम्भेषु सरदकोशेषु ।
बहवो बृहत्प्रमाणा बहुसंस्थानाः प्रभायुक्ताः ॥ ५ ॥
नैषामर्घः कार्यो न च वेधोऽतीव ते प्रभायुक्ताः ।
सुतविजयारोग्यकरा महापवित्रा धृता राज्ञाम् ॥ ६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दंष्ट्रामूले शशिकान्तिसप्रभं बुहुगुणं च वारा[८३अ]हम् ।
तिमिजं मत्स्याक्षिनिभं महत्पवित्रं विजयदं च ।। ७ ।।
वर्षोपलवज्जातं वायुस्कन्धाच्च सप्तमाद्भ्रष्टम् ।
ह्रियते किल खाद्दिव्यैस्ताडित्प्रभं मेघसंभूतम् ।। ८ ।।
तक्षकवासुकिकुलजाः कामगमा ये च पन्नगास्तेषाम् ।
स्निग्धा नीलद्युतयो भवन्ति मुक्ताः फणाप्रान्ताः ।। ९ ।।
शस्तेऽवनिप्रदेशे रजतमये भाजने स्थिते च यदि ।
वर्षति देवोऽकस्मात्तज्ज्ञेयं नागसंभूतम् ।। १० ।।
अपहरति विषमलक्ष्मीं क्षपयति शत्रून्यशो विकासयति ।
भौजङ्गं नृपतीनां धृतमकृतार्घं विजयदं च ।। ११ ।।
कर्पूरस्फटिकनिभं चिपिटं विषमं च वेणुजं ज्ञेयम् ।
शङ्खोद्भवं शशिनिभं वृत्तं भ्राजिष्णु रुचिरं च ।। १२ ।।
शङ्खतिमिवेणुवारणवराहभुजगाभ्रजान्यवेध्यानि ।
अमितगुणत्वात्तेषामर्घः शास्त्रे न निर्दिष्टः ।। १३ ।।
एतानि सर्वाणि महागुणानि सुतार्थसौभाग्ययशस्कराणि ।
रुक्शोकहन्तॄणि च पार्थिवानां मुक्ताफलानीप्सितकामदानि ।।१४।।

अत्र मार्कण्डेयः ।—

सर्वेभ्यो भुवि दुष्प्राप्यं मौक्तिकं मेघसंभवम् ।
धारणात्तस्य नृपतेः सर्वसिद्धिः प्रजायते ।। १५ ।।

अथैषां धारणार्थं दैवतकथनम् ।

अतसीकुसुमश्यामं वैष्णवमैन्द्रं शशाङ्कसंकाशम् ।
हरितालनिभं वारुणमसितं यमदैवतं भवति ।। १६ ।।
परिणतदाडिमगुलिकागुञ्जाताम्रं च वायुदैवत्यम् ।
निर्धूमानलकमलप्रभं च विज्ञेयमाग्नेयम् ।। १७ ।। इति

अथ मूल्यार्हाणां मूल्यकलना ।

माषकचतुष्टयधृतस्यैकस्य शताहता त्रिपञ्चाशत् ।
कार्षापणा निगदिता मूल्यं तेजोगुणयुतस्य ।। १८ ।।

For Private and Personal Use Only

गुञ्जापञ्चकं माषः ।

माषकदलहान्यातो द्वात्रिंशद्विंशतिस्त्रयोदश च ।
अष्टौ शतानि च शतत्रयं त्रिपञ्चाशतायुक्तम् ॥ १९ ॥

इत्थं सार्धत्रिमाषस्य द्वाविंशच्छतानि त्रिमाषस्य विंशतिः सार्धं द्विमाषस्य [८३ ब]त्रयोदश । द्विमाषस्य अष्टौ । सार्धमाषस्य त्रिपञ्चाशद्युतात्रिशतीति ।

पञ्चत्रिंशं शतमिति चत्वारः कृष्णला नवतिमूल्याः ।
सार्धास्तिस्रो गुञ्जाः सप्ततिमूल्यावृतं रूपम् ॥ २० ॥

गुञ्जात्रयस्य मूल्यं पञ्चाशद्रूपिका गुणयुतस्य ।
रूपकपञ्चत्रिंशत्त्रयस्य गुञ्जार्धहीनस्य ॥ २१ ॥

पलदशभागो धरणं तद्यदि मुक्तास्त्रयोदशसुरूपाः ।
त्रिशती सपञ्चविंशा रूपकसङ्ख्याकृतं मूल्यम् ॥ २२ ॥

अयमर्थः ।– द्वात्रिंशद्गुञ्जा धरणम्, एतन्मानेन यदि त्रयोदशमौक्तिकानि स्युस्तदा सपञ्चत्रिंशत्का त्रिशती मूल्यमित्येकैकस्येत्यर्थः ।

(८४अ) षोडशकस्य द्विशतीः त्रिंशतिरूपस्य सप्ततिः सशता
यत्पञ्चविंशतिधृतं तस्य शतं त्रिशतासहितम् ॥ २३ ॥

षोडशमौक्तिकानि चेद्धरणमिदं तदैकैकं द्विगुञ्जामितमितमिति एकैकस्य सार्धद्वादशरूपका मूल्यं जायते । विंशतिमौक्तिकानि चेद्धरणमितत्येकैकं किंचिदधिकसार्धगुञ्जामितं तत्र प्रत्येकस्य सार्धा अष्टौ रूपका मूल्यम् । पञ्चविंशतिश्चेद्धरणमितं तदा किंचिद् मात्राधिकसपादगुञ्जामितं तज्जायते । तत्र प्रत्येकस्य सार्धपञ्चरूपका मूल्यं जायते इति ।

त्रिंशत्सप्ततिमूल्यं चत्वारिंशच्छतार्धमूल्यं च ।
षष्टिः पञ्चोना वा धरणं पञ्चाष्टकं मूल्यम् ॥ २४ ॥

मुक्ताशीत्या त्रिंशच्छतस्य सा पञ्चरूपकविहीना ।
द्वित्रिचतुःपञ्चशता द्वादशषट्पञ्चकत्रितयम् ॥ २५ ॥

मौक्तिकत्रिंशच्चेद्धरणं किंचिदधिकगुञ्जामितमेकैकं तदा सप्ततिमूल्यमिति । एकैकस्य किंचिदूनसपादरूपकद्वयं जायते । मौक्तिकचत्वारिंशच्चेद्धरणं तदा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शतार्धं मूल्यमिति एकैकस्य सपादरूपकं मूल्यम् । पञ्चपञ्चाशच्चेद्धरणमिति तदा चत्वारिंशन्मूल्यमित्येकैकस्य सार्धैकादशकलामूल्यम् । एवमग्रेऽपि कला-मानं योज्यमिति ।

पिक्कापिच्चार्धार्घा रवकः सिक्थं त्रयोदशाद्यानाम् ।
संज्ञाः परतो निगराश्चूर्णाशीतिपूर्वाणाम् ॥ २६ ॥

त्रयोदशमौक्तिकानि धरणमिति त्रयोदशकमारभ्य पञ्चपञ्चाशदन्तं पिक्कादिनिगरान्तं क्रमेण मौक्तिकसंज्ञा । त्रयोदशमौक्तिकानां धरणमितत्वे [८४ ब]तन्मौक्तिकानामपि पिक्का संज्ञा । एवं षोडशानां धरणमितत्वे पिच्छ-संज्ञा । इत्यादि पञ्चपञ्चाशतो धरणमितत्वे रवसंज्ञेत्यन्तम् । अशीतिमौक्तिकानि धरणमित्यारभ्य पञ्चशतीधरणमित्यन्तं चूर्णसंज्ञा मौक्तिकानामिति ।

## इति मौक्तिकलक्षणशाखा ॥

---

## [ १०७ ]

अथोद्देशक्रमप्राप्तं **मरकतलक्षणम्** ।

शुकपक्षनिभः स्निग्धः कान्तिमान् विमलस्तथा ।
स्ववर्णचूर्णसंकाशैः सूक्ष्मैर्बिन्दुभिरन्वितः ॥ २ ॥
शस्तो मरकतो ज्ञेयो गम्भीरश्चोन्नतस्तथा ।
धार्यश्च पृथिवीशानां सर्वोपद्रवनाशनः ॥ २ ॥

अत्र वराहाचार्यः ।—

शुकवंशपत्रसदृशं शिरीषकुसुमोपमं गुणोपेतम् ।
सुरपितृकार्ये मरकतमतीव शुभदं नृणां विहितम् ॥ ३ ॥

## इति मरकतलक्षणाभिधानं कुसुमम् ।

---

## [ १०८ ]

कुरुविन्दाद्भवेज्जन्म तथा सौगन्धिकादपि ।
स्फटिकात्पद्मरागाणां श्रेष्ठास्ते ह्युत्तरोत्तरम् ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जडरङ्गा भवन्तीह कुरुविन्दभवाश्च ये ।
कषायरङ्गा निर्दिष्टा ये च सौगन्धिकोद्भवाः ।
स्वच्छाश्च रागवन्तश्च विज्ञेयाः स्फटिकोद्भवाः ॥ २ ॥

अत्र वराहाचार्यः ।—

' सौगन्धिककुरुविन्दस्फटिकेभ्यः पद्मरागसंभूतिः ।
सौगन्धिकजा भ्रमराञ्जनाब्जजम्बूरसद्युतयः ॥ २ ॥

जम्बूरसद्युतयो लोहितवर्णाः ।

कुरुविन्दभवाः शबला मन्दद्युतयश्च धातुभिर्विद्धाः ।
स्फटिकभवा द्युतिमन्तो[८५अ]नानावर्णा विशुद्धाश्च ॥ ४ ॥
स्निग्धः प्रभानुलेपी स्वच्छोऽर्चिष्मान् गुरुः सुसंस्थानः ।
अन्तःप्रभोऽतिरागो मणिरत्नगुणाः समस्तानाम् ॥ ५ ॥
कलुषा मन्दद्युतयो लेखाकीर्णाः सधातवः खण्डाः ।
दुर्विद्धा न मनोज्ञाः सशर्कराश्चेति मणिदोषाः ॥ ६ ॥
भ्रमरशिखिकण्ठवर्णो दीपशिखासप्रभो भुजङ्गानाम् ।
भवति मणिः किल मूर्धनि योऽनर्घेयः स विज्ञेयः ॥ ७ ॥

यस्तं बिभर्ति मनुजाधिपतिर्न तस्य दोषा भवन्ति विषरोगकृताः कदाचित् ।
राष्ट्रे च नित्यमभिवर्षति तस्य देवः शत्रूंश्च नाशयति तस्य मणेः प्रभावात् ॥८॥

अथात्रार्घकलना—

षड्विंशतिः सहस्राण्येकमणेः स्यात्पलप्रमाणस्य ।
कर्षत्रयस्य विंशतिरुपदिष्टा पद्मरागस्य ॥ ९ ॥
अर्धपलस्य द्वादश कर्षस्यैकस्य षट्सहस्राणि ।
यश्चाष्टमाषकधृतं तस्य सहस्रत्रयं मूल्यम् ॥ १० ॥
माषकचतुष्टयं दशशतक्रयं द्वौ तु पञ्चशतमूल्यौ ।
परिकल्प्यमन्तराले मूल्यं हीनाधिकगुणानाम् ॥ ११ ॥
वर्णन्यूनस्यार्धं तेजोहीनस्य मूल्यमष्टांशम् ।
अल्पगुणो बहुदोषो मूल्यात्प्राप्नोति विंशांशम् ॥ १२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आधूम्रं व्रणबहुलं स्वल्पगुणं प्राप्नुयाच्च द्विशतांशम् ।
इति पद्मरागमूल्यं पूर्वाचार्यैः समुद्दिष्टम् ॥ १३ ॥

## इति पद्मरागाख्यशोणमणिलक्षणमूल्यकथनाभिधं कुसुमम् ।

---

## [ १०९ ]

अथोद्देशक्रम[८५ब]प्राप्तं खड्गलक्षणम् ।
तत्र गर्गोऽङ्गुलप्रमाणेनास्योत्तमादिलक्षणमाह ।

‘ अङ्गुलानि च पञ्चाशत्प्रधानः खड्ग उच्यते ।
तदर्धतो निकृष्टः स्यात्तन्मध्ये मध्यमः स्मृतः ॥ १ ॥
अतोऽधिकं च हीनं च छिन्नवंशं तथैव च ।
न धारयेद्बुधः खड्गम् स विनाशाय केवलम् ’ ॥ २ ॥

तत्र वराहः —

‘ निष्पन्नो न च्छेद्यो निकषैः कार्यः प्रमाणयुक्तः सः ॥
मूले म्रियते स्वामी जननी तस्याग्रतश्छिन्ने ’ ॥ ३ ॥

मार्कण्डेयः

‘ शीघ्रः सुमधुरो यस्य शब्दः खड्गस्य श्रूयते ।
किंकिणीसदृशस्तस्य धारणं श्रेष्ठमुच्यते ॥ ४ ॥
खड्गः पद्मपलाशाग्रो मण्डलाग्रश्च शस्यते ।
[८६अ]करवीरपलाशाग्रसदृशश्चापि शस्यते ॥ ५ ॥
महीधृतसुगन्धश्च पद्मोत्पलसुगन्धभृत् ।
वर्णतश्चोत्पलाकारः सवर्णो गगनस्य च ॥ ६ ॥
ससमाङ्गुलाग्रा शस्यन्ते व्रणास्वदेष्ववस्थिताः[1] ।
श्रीवृक्षपर्वताकारा वंशपत्रनिभाश्च ये ॥ ७ ॥

श्रीवृक्षो बिल्वः ।

काकोलूककबन्धाभा विषमाङ्गुलसंस्थिताः ।
वंशानुगाः प्रभूताश्च न शस्तास्ते कदाचन ॥ ८ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्मिन् त्सरुप्रदेशे व्रणो भवेत्तद्वदेव खड्गस्य।
वनितानामिव तिलको गुह्ये वाच्यो मुखे दृष्ट्वा ॥ ९ ॥

यथा स्त्रीणां मुखे तिलकं दृष्ट्वा गुह्येऽप्यस्तीति वाच्यम्। तथाऽत्रापि मुष्टौ व्रणं विलोक्य मध्येऽग्रे च व्रणो वाच्यः।

अङ्गुलानुसारेण व्रणफलमाह वराहः—

'पुत्रमरणं धनाप्तिर्धनहानिः संपदोऽपि बन्धश्च।
एकाद्यङ्गुलसंस्थैर्व्रणैः फलं निर्दिशेत्क्रमशः ॥ १० ॥
सुतलाभः कलहो हस्तिलब्धिपुत्रमरणधनलाभाः।
क्रमशो विनाशवनिताप्तिचित्तदुःखानि षट्प्रभृति ॥ ११ ॥
लब्धिर्हानिर्वृद्धिः स्त्रीलब्धयो वधो मरणपरितोषाः।
ज्ञेयाश्चतुर्दशादिषु धनहानिश्चैकविंशे स्यात् ॥ १२ ॥
वित्ताप्तिरनिर्वाणं धनागमो मृत्युसंपदोऽस्वत्वम्।
ऐश्वर्यमृत्युराज्यानि च क्रमात्त्रिंशदिति यावत् ॥ २३ ॥
परतो न विशेषफलं वृद्धिविषमसमस्थाश्च पापशुभफलदाः।
केश्चिदफलाः प्रदिष्टास्त्रिंशत्परतोऽप्रमिति यावत्' ॥ १४ ॥

एतच्चेष्टितफलं स एवाह—

'क्वणितं मरणायोक्तं पराजयाय प्रवर्तनं कोशात्।
स्वयमुद्गीर्णे युद्धं ज्वलिते विजयो भवति खड्गे' ॥ १५ ॥

एतत्परिभाषां च स एवाह—

'नाकारणं विवृणुयान्न विघट्टयेच्च पश्येन्न तत्र वदनं न वदेच्च मूल्यम्।
देशं न चास्य कथयेन्न विमानयेच्च नैव स्पृशेन्नृपतिरप्रयतोऽसियष्टिम् ॥१६॥
खड्गं प्रशस्तं मणिहेमचित्रं कोशे सदाचन्दनचूर्णयुक्ते।
संस्थापयेद्भूमिपतिः प्रयत्ना[८६ब]द्रक्षेत्तथैनं स्वशरीरवच्च ॥१७॥

एतत्पानमपि स एवाह—

'इदमौशनसं च शस्त्रपानं रुधिरेण श्रियमिच्छतः प्रदीप्ताम्।
हविषा गुणवत्सुताभिलिप्सोः सलिलेनाक्षयमिच्छतश्च वित्तम्' ॥१८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'वडवोष्ट्रकरेणुदुग्धपानं यदि पापेन समीहतेऽर्थसिद्धिम् ।
झषपित्तमृगाश्ववस्तदुग्धैः करिहस्ताच्छिदये सतालगर्भैः ' ॥ १९ ॥

तालगर्भैस्तालवृक्षनिर्यायैः ।

आर्कं पयो हुडुविषाणमषीसमेतं पारावताखुशकृता च युतः प्रलेपः ।
शस्त्रस्य तैलमथितस्य ततोऽस्य पानं पश्चाच्छितस्य न शिलासु भवेद्विघातः ॥ २० ।

तैलं चात्र तिलस्यैव ।

क्षारे कदल्या मथितेन युक्ते दिनोषिते पायितमायसं तत् ।
सम्यक् शितं चाश्मनि नैति भङ्गं न चान्यलोहेष्वपि तस्य कौण्ठ्यम् ॥

कदलीं दग्धायसक्षारम् । तन्मथिते तत्सहिते ।

इति खड्गलक्षणं नाम कुसुमम् ।

---

[ ११० ]

अथ सेनानीलक्षणम् ।

बृहत्तत्त्वविधानज्ञः फल्गुसारविशेषवित् ।
राज्ञा सेनापतिः कार्यो ब्राह्मणः क्षत्रियोऽपि वा ॥ १ ॥
कुलीनः शीलसम्पन्नो धनुर्वेदविशारदः ।
अश्वशिक्षासुशिक्षश्च कुशलः श्लक्ष्णभाषिता ॥ २ ॥
निमित्ते शकुनज्ञाने वेत्ता वैद्यश्चिकित्सिते ।
पुरुषान्तरविज्ञाने षाड्गुण्ये च विनिश्चितः ।
कृतज्ञः कर्मणां शूरस्तथा क्लेशसहोऽप्यृजुः ॥ ३ ॥

इति सेनानीलक्षणाभिधं कुसुमम् ।

---

[ १११ ]

अथ भृतकलक्षणम् ।

तत्र भृतकेति भृतकाश्च भृतिकाश्चेत्येकशेषसमासेनोभयोरपि दासीदासयोरुद्देशोऽत्र ग्राह्यः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहार्यश्चानृशंसश्च दृढभक्तश्च पार्थिवे ।
ताम्बूलादिधरः कार्यो दासी वाप्यथ तद्गुणा ॥ १ ॥

अहार्यः लोभदानादिनापरैः प्रतारयितुमशक्यः । भारते
'अभिप्रायं यो विदित्वा हि भर्तुः सर्वाणि कर्माणि करोत्यत[८७अ]न्द्रः ।
वक्ता हितानामनुरूप आर्य शक्तिज्ञ आत्मेव हि सोनुकम्प्यः' ॥२॥

एतावन्मह्यं देयमिति स्वशक्तितुल्यं जानन् ।
वाक्यं तु येनाद्रियते विशिष्टं प्रत्याहतश्चापि नियुज्यमानः ।
प्रज्ञाभिमानी प्रतिकूलवादी त्याज्यः स तादृक् त्वरयैव भृत्यः ॥३॥
अपेक्षाराजचरितं सर्वेऽपि भृतका स्मृताः ।
तन्निम्नयोगक्षेमत्वादिति सामुद्रिकं वदे ॥ ४ ॥
यथा तदनुसारेण मन्त्र्यादिभृतकान्तकम् ।
शोधनायां सुजातायां राज्यस्थैर्यं दृढं भवेत् ॥ ५ ॥
किं नामैतन्न विदितं यदनेन न जायते ।
यत्राकृत्यैव जन्तूनां सदसत्त्वं विभाव्यते ॥ ६ ॥
आहुश्चेयं कृता विद्या समुद्रेणेति तत्र च ।
विवदन्ते महात्मानो ये कर्मशरणा भुवि ॥ ७ ॥
सत्यं विधातृविहिता रचने यं ततोऽधिकम् ।
प्रबलं कर्म विज्ञेयं न्याय्यं को विनिवारयेत् ॥ ८ ॥

अयमर्थः —
सत्यं प्रारब्धोपनतं फलमत्रोपभुज्यते ।
तत्तदनुसारेण जन्तूनां रेखाचिह्नादि भाव्यते । ॥ ९ ॥

परन्तु भगवदेकशरणानां न जातु दुष्कर्मफलोदयो भवेत् ।

अस्ति च कर्मानुसारि ग्रहदशादि दुष्टफले—तत्प्रसादकमन्त्राद्युपासनेन दुष्टफलनिवृत्त्या सुफलोदयः । अस्ति च विज्ञानाग्निदग्धानां कर्मणां पुनरङ्कुरोद्भावना । देहपाताद्यदर्शनादस्ति प्रारब्धं बलवदिति । तत्रोन्मुक्तवेगाविद्धशरन्यायेनावतीर्णवर्षोद्भतनदीवाहन्यायेन वा तस्य प्रत्यावर्तयितुमशक्यत्वेऽपि तस्यातिबलवदुन्मुक्तशरेणोन्मार्गविक्षेपणादिना चोन्मुक्तशरवत् नदीवाहवच्च प्रत्यावर्तने लक्ष्यानुगमनं तत्तदनर्थविधानं च यथा दृष्टं तथा प्रारब्धमपि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शक्यत एव शिथिलयितुमित्यतिप्रबलप्रतियोगिकर्मणां परथा तु [८७ब]तदेवं सर्वथा भोग्यमिति । अथवा भाविकर्मणां पर...यकत्वेन[1] परिहारो विधेयः ।

तथा च दैवपौरुषानुयोगे परशुरामं प्रति पुष्करः । राम उवाच ।

'दैवं पुरुषकारं च किं ज्यायांस्तद्वदस्व मे ।
अत्र मे संशयं देव छेत्तुमर्हस्यशेषतः ॥ १० ॥

पुष्कर उवाच

स्वमेव कर्म दैवाख्यं विद्धि देहान्तरार्जितम् ।
तस्मात्पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥ ११ ॥
प्रतिकूलं तथा दैवं पौरुषेण विहन्यते ।
मङ्गलाचारयुक्तानां नित्यमुत्थानशालिनाम् ॥ १२ ॥
येषां पूर्वकृतं कर्म सात्त्विकं मनुजोत्तम ।
पौरुषेण विना तेषां केषांचित् दृश्यते फलम् ॥ १३ ॥
कर्मणा प्राप्यते लोके राजसस्य तथा फलम् ।
पौरुषेणाप्यते लोके मार्गितव्यं नरैः फलम् ॥ १४ ॥

सात्त्विकं प्रारब्धं विनापि स्वयमेव फलतीति पौरुषापेक्षा नास्ति, राजसं तु पौरुषेणैवोद्बुद्धं भवतीति ।

दैवमेव न जानाति नरः पौरुषवर्जितः ।
तस्मात्पौरुषयुक्तस्य दैवं तुं सफलं भवेत् ॥ १५ ॥
पौरुषं दैवसंपत्त्या काले फलति भार्गव ।
दैवं पुरुषकारश्च कालश्च मनुजोत्तम ।
त्रयमेतन्मनुष्यस्य पिण्डितं स्यात्फलावहम् ॥ १६ ॥
कृषिवृष्टिसमायोगा दृश्यन्ते फलसिद्धयः ।
तास्तु काले प्रदृश्यन्ते नैवाकाले कदाचन ॥ १७ ॥
तस्मात्सदैव कर्तव्यं सधर्मं पौरुषं नृभिः ।
विपत्तावपि यस्येह परलोके ध्रुवं फलम् ॥ १८ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नालसाः प्राप्नुवन्त्यर्थान् न च दैवपरायणाः।
तस्मात्सर्वप्रयत्नेन पौरुषे यत्नमाचरेत्' ॥१९॥

इति पुंस्त्रीलक्षणशाखायां दैवपौरुषकालानुस्यूतता-
भिधानाभिधः स्तबकः।

[ ११२ ]

इति प्रारब्धं पौरुषकालनिमित्तेन सफलं साम्प्रतिकं तु पौरुषं तत्समर्पित-बुद्धिशिखोन्नतशीर्षाणां मनुष्याणामिहान्यत्सर्वं पश्चात्कृत्य फलति। प्रारब्धातिवाहनं केवलं नतमस्तकानां पशुजातीनामिति सि[८८अ]द्धम्।

इति सम्यगालोचितोऽयं लक्षणविभागो न व्यभिचरतीति च स्थिते।

यथादृष्टमिदं सम्यग्विविच्य च विविच्य च।
सामुद्रिकं विनेयानां शिक्षायै दर्श्यते मया॥ १ ॥
तथा च विक्रमादित्यभूपतेर्वसरे किल।
बुधैः कैश्चिदियं दृग्जाविद्या सोऽवर्तयद्यया' ॥ २ ॥

वसर इति भागुरिमतेनावोपसर्गस्याकारलोपेऽवसरे इत्यर्थः। स विक्रमादित्यः।

उदाहृतं चात्र जातु खर्वः कश्चिद् सभामितः।
पीडितोऽस्मीत्यवेत्युक्तिं चक्रेऽस्य विनयान्वितः॥ ३ ॥

सभामितः सभां प्राप्तः, न्यायस्थानीमागत इति यावत्। अस्य विक्रमादित्यस्य।

स विलोक्य तले मिथ्यावाद्यसौ क्रियतां बहिः।
इत्याज्ञप्य सदोध्यक्षान्बोधयामास सादरम्॥ ४ ॥
उक्तं च वैद्यविद्यायां खर्वो जाल्मः कुनीतिभाक्।
रन्ध्रच्छलनिमित्तानुधावी खर्वः प्रकीर्तितः॥ ५ ॥
निश्चितं चामुना कश्चित्पीडितः स्याद्विपर्ययात्।
आत्तौसावौचितीयं सा खर्वस्येति निशम्यताम्॥ ६ ॥

इयमौचिती दूरनिष्कासनात्मिका।

विलोक्यतां च संवादात्प्रत्यक्षीक्रियतामिदम्॥ ७ ॥
निशम्य विस्मितास्ते च संवाद्य कृतनिश्चयाः।
तथोपलभ्य राजानं मोदयामासुरादरात्॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्तीदं कौशलं प्रायो महाविभवभूषणम् ।
मनसोन्मीलितं किञ्चिद्यद्यदत्र विशदायते ॥ ९ ॥

महाविभवेति । अचिन्त्यविभवानां भूपतीनां यत्र कौशले बद्धा स्था ते महाविभवभूषिता भवन्तीत्यर्थः । मनसोन्मीलितं मनः कल्पितं विशदायते तत्प्रत्यक्षीभवति । इति भूपतिं प्रति सदोध्यक्ष्यमोदेना

उक्तं चात्र तरङ्गिण्यां कश्चिदभ्येति वामनः ।
भूमीशं श्रीशकेन्द्राढ्यमवेत्युक्त्या व्यजिज्ञपत् ॥ १० ॥
निशम्यालोक्य तं प्राह खर्वोपरि न कस्यचित् ।
जाल्महस्तसमायातो जाने व्यत्ययमत्र ते ॥ ११ ॥
निशम्यासौ हसित्वास्यबन्धं तं च समादधे ।
इयदाक्षेपतो मेऽद्य[८८ब]प्रतीकार्यं त्वयास्त्यलम् ॥ १२ ॥

आस्यबन्धमिति मुखं बद्ध्वा राजाभिमुखं हासानौचित्यात् । हासश्च राज्ञ आशयबोधनात् ।

स मत्तोप्यतिऽखर्वोस्तीत्येवं श्रुत्वा विहस्य च ।
संविदे पालयामास तमसौ तत्तथाभवत् ॥ १३ ॥

पालयामास प्रतीक्षाञ्चक्रे ।

इत्याकारगतास्त्येव प्रायोऽन्तःप्रकृतिर्नृणाम् ।
विज्ञानशालिनां रिंखा[1] न यथा जायते क्वचिद् ॥ १४ ॥

यथेत्याकारमात्रेणैवान्तरप्रकृतिबोधात् ।

आहुश्च वैद्याः सुश्वेतवर्णो यः श्यावलोचनः ।
सुदुर्दुःखोङ्कःयश्चानुपरुद्धः[1] कुनखी भवेत् ॥ १५ ॥

अन्तरान्तरारक्तः कृष्णोवर्णः श्यावः अङ्कधः स्वकलङ्कावहः । तत्रैव कुनखित्वाद्याधिक्येऽनुपरुद्धो निरनुरोधो गुरूनप्यास्थानेऽपि लज्जयतीति । अत्रापि—

[८९अ]कुशालिाः कुनखा ज्ञेया कामभोगविवर्जिताः ।
वक्रान्तैः स्फुटितैः स्थूलैः नखैर्दारिद्र्यभोगिनः ॥ १६ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महापापानि कुर्वन्ति पुरुषा हरितैर्नखैः ।
इन्द्रगोपकसंकाशैर्नखैर्भवति पार्थिवः ॥ १७ ॥
ताम्रैर्नखैस्तथैश्वर्यं प्राप्नुवन्तीह मानवाः ।
इत्थमङ्कस्तनुस्तीक्ष्णदृगुद्रायतमस्तकः ॥ १८ ॥
तुवरोऽतिकचः सर्पगोनासाभ्यां बिभीषणः ।
इत्थमङ्कः सुश्वेतवर्ण इत्यादिलक्षणलक्षितः ॥ १९ ॥

विशेषः पुनस्तनुरित्यादि तीक्ष्णदृङ्निशितबाण इव यस्य दृग्वेधयित्रीव भवति । तुवरः काले जातश्मश्रुः अतिकचोऽतिघनशिरोरुहः सर्पगोनासाभ्यामपि पुरुषः कदाचिन्मुच्यते न तु तस्मादिति भावः । दंशं विना न कदाचिदप्यसौ नरं मुञ्चतीत्यर्थः । इति

अथ विशेषलक्षणेष्वादौ रोमलक्षणम् ।

दृढपाटलरोमा यः स नीरुग्धृतिमान्भवेत् ।
कातरश्चापि शीतालुरल्पधीर्मृदुरोमवान् ॥ २० ॥
एकरोमा भवेद्राजा द्विरोमा धनवान्भवेत् ।
त्रिरोमा पण्डितः प्रोक्तो बहुरोमा च दुर्धियः ॥ २१ ॥

अत्र वराहाचार्यः—

'रोमैकैकं कूपके पार्थिवानां द्वे द्वे ज्ञेये पण्डितश्रोत्रियाणाम् ।
त्र्याद्यैर्निःस्वा मानवा दुःखभाजः केशाश्चैवं निन्दिताः पूजिताश्च'॥२२॥
ग्रीवायां स्कन्धयो रोमबाहुल्यं मौर्ख्यलक्षणम् ।
रुचिर्जाल्म्येऽधिका तानि चेत्स्युः कोष्ठे च वक्षसि ॥ २३ ॥

कोष्ठमन्तर्जठराभिमुख्ये ।

कुबुद्धयबुद्धी चलता कार्ये क्रोधविधेयता ।
समन्ताद्यस्य रोमाणि कातराणि शरीरिणः ॥ २४ ॥
सुकृष्णरोमा धीदक्षो वध्योक्तौ न्यायपालकः ।
समरोमा च पुरुषः सर्वत्र समसारवान् ॥ २५ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धीदक्ष इति धीग्रहणं शीघ्रं चातुर्येण तात्पर्यज्ञता सूचनाय, रोम्णां च समत्वं शुक्लकृष्णरक्तवर्णसाम्यमिति । [८९ब]

अथालिकलक्षणम्—

अरीखं दीर्घालिकं वा...[1]...धको मन्दधीधनः ।
असत्यवाग्स्वल्पायुर्दुःखभाक् चापि जायते ॥ २६ ॥
घटवत्संवृतं यस्य ललाटं चापि वामनम् ।
स नरो नीचकर्मा स्यात्कृपणश्चातुरस्तथा ॥ २७ ॥
अर्धेन्दुसदृशाकारं च्छत्राभं ...[1] भजाम् ।
अत्युन्नतं चमूपानां संपुटं क्रूरकर्मणाम् ॥ २८ ॥

संपुटं निम्नम् ।

समं च दीप्यमानं यद्रेखाभिस्तच्छुभोदयम् ।
प्रेमस्वधीकथाशास्त्रचातुर्याय[1] मनीषिणाम् ॥ २९ ॥
विषमेण ललाटेन नराः स्युर्दुःखजर्जराः ।
प्राप्नुयुर्वधबन्धं तु बलात्ते क्रूरकर्मणा ॥ ३० ॥
सिराभिः सन्ततं यस्य ललाटं सोऽघवान्भवेत्[1] ।
उन्नताभिस्त्रिशूलाब्जस्वस्तिकाभाभिरुन्नताः ॥ ३१ ॥
त्रिरेखाभिर्ललाटान्तगामिनीभिः समाः शतम् ।
जीवेच्चतसृभिर्नूनं नवत्यब्दान् सपञ्चकान् ॥ ३२ ॥
पञ्चभिः सप्ततिं द्वाभ्यां चत्वारिंशतमेकया ।
विंशतिं ताश्च पञ्चाढ्या सरेखेणापि जीवति ॥ ३३ ॥

उन्नताः परागस्य...[1] चतसृभिरित्यादावपि ललाटान्तगामिनीभिरिति संबध्यते ।

अत्रापि कोचिद्यस्य स्युः समाः कर्णान्तगोचराः ।
पञ्चरेखागभीरश्च सुरोऽसौ शतजीव्यपि ॥ ३४ ॥
रेखाणां लक्षणमिदं दीर्घाणां परिकीर्तितम् ।
वर्षा च वक्रताह्रासस्तथाधिक्येन वामतः ॥ ३५ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इदमुक्तमायुःप्रमाणं दीर्घाणां ललाटान्तगामिनीनां मध्यान्तयोरच्छिन्नानाम्। एतच्च ऋजुताया अप्युपलक्षणम्। व्यतिरेकेणैतत्स्फुटयति। वर्षा चेति। अत्रापि वक्रताच्छेदस्योपलक्षणम्। ह्रास आयुषः। तत्रापि वामतो वक्रताया-माधिक्येन ह्रासः ह्रासयति चोपलक्षणम् अगम्यागमनस्य। तथा च वराहः—

'विच्छिन्नाभिश्चागम्यगामिन' इति।

समुद्रः— 'रेखाः पञ्च[९०]ललाटस्थाः समाः कर्णान्तगोचराः।
भणितं यस्य गम्भीरं तं विद्यात्सकलायुषम्' ॥३६॥ इति।

अथ **शिरोलक्षणम्**—

शिरसा मण्डलाभेन गवाढयश्छत्रतो नृपः।
चिपिटाः पितृमातृघ्नाः करोट्याचिरमृत्यवः॥ ३७॥

मण्डलाभं सूर्यचन्द्रबिम्बमिव वर्तुलम्। छत्र इति छत्राभेन तच्चोर्ध्वतो विस्तीर्णम्। करोटिः शिरोस्थितघटस्य प्रस्फुटमिव दृश्यत इत्यर्थः।

घटमूर्धा मार्गरुचिर्द्विमूर्धा च धनोज्झितः।
महत्त्वाय च निम्नं यदतिनिम्नं धनप्रदम्॥ ३८॥

घटेति तथा च व्यत्ययेन समुद्रवचनम् 'शिरो दीर्घं तु दुःखिनामिति'।

अथ **भ्रूलक्षणम्**—

स्थूलत्वं घनता वापि भ्रुवोर्यस्य विलोक्यते।
अतीव कठिनं तस्य हृदयं विनिवेदयेत्॥ ३९॥
कर्णनेत्रान्तरार्धेन भ्रुवोर्यस्यास्ति विस्तृतिः।
सोऽहंकारेण नृपतीन्पातयेन्नात्र संशयः॥ ४०॥

नेत्रादारभ्य कर्णं यावदन्तरम् अवकाशस्तदर्धमानेन।

मध्योच्चभ्रूयुगोपेतो नरोऽल्पायुर्भवेद्ध्रुवम्।
विषमभ्रूयुगेणापि निःस्वो इन्दुप्रभेण[1] च॥ ४१॥
मध्यनिम्नभ्रुवो येऽपि तेऽगम्या रमयन्त्यलम्।
खण्डितभ्रूयुगेणापि धनहीनो विजायते॥ ४२॥
विशेषः पुनरेकोऽत्र भ्रुवोर्मध्ये यदीक्ष्यते।
जीर्णाढ्यं रोम तेनास्य राज्यलाभो भवेद्ध्रुवम्॥ ४३॥

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इन्दुप्रभेणेति बालेन्द्वाकृतिसाम्यं बोध्यम् । धनहीन इति प्राप्तैर्धनैस्त्यज्यत इत्यर्थः । जीर्णाढ्यमिति एष चान्यत्र भ्रमरसंज्ञयोद्दिष्ट इति रोमावर्तस्तिलकं वास्त्वित्यत्र नास्ति विशेषः ।

भ्रूभ्यां च समकृष्णाभ्यां साधुवृत्तिर्भवेन्नरः ।
श्रवणश्रुतिशक्तश्च सल्लक्षणविभूषितः ॥ ४४ ॥ इति

अथ नेत्रलक्षणम्—

अथाक्षिलक्षणं वक्ष्ये सा दृष्टिरतिदोषदा ।
या पीताभा यया हन्तुमपि ते मुदिताशयाः ॥ ४५ ॥

परमारणे प्रसन्नचेतस इत्यर्थः ।

स्थू[९०ब[लदृष्ट्या भवेन्मन्त्री मन्दाक्षो नृपरुद्धधीः ।
मानी जडोऽरिभावेन वर्तयेन्नात्र संशयः ॥ ४६ ॥

मन्दाक्ष इति लक्ष्यपदम् । अवशिष्टं फलम् ।

नेत्रेण मन्दचेष्टेन लक्ष्यं मौर्ख्यं शरीरिणाम् ।
तीक्ष्णेनापि नेत्रेण हेतुव्याजादिमार्गकः ॥ ४७ ॥
रक्तान्तनेत्राः पुरुषा धैर्यौदार्यगुणान्विताः ।
भवन्ति धनिनो येऽपि मधुपिङ्गललोचनाः ॥ ४८ ॥
कुक्कुटाक्षाः सदा दक्षा बिडालाक्षास्तथाधमाः ।
कुक्कुराक्षाश्च विज्ञेयास्तस्करा नात्र संशयः ॥ ४९ ॥
गवाक्षाः सुभगा नित्यं केकराक्षा दुराशयाः ।
सुकृष्णतारकाक्षाश्च प्राप्नुवन्त्यक्षिपाटनाम् ॥ ५० ॥

सुकृष्णेति तारका कनीनिका ।

तथा च वराहाचार्यः—

'अतिकृष्णतारकाणामक्ष्णामुत्पाटनं भवतीति' ।

समुद्रः— रक्ताक्षा धनवन्तस्तु व्याघ्राक्षाश्चान्तकोपमाः ।
बिडालसिंहनेत्रा ये भवन्ति पुरुषाधमाः ॥ ५१ ॥
मण्डलाक्षाश्च जिह्माक्षाः क्रूरप्रकृतयो नराः ।
नीलोत्पलाक्षा विद्वांसः प्रौढाक्षा विभावान्विताः ॥ ५२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्याभितोक्षिकूटस्थतिलकाः[1] पीतपीतकाः।
दृश्यन्ते कुनयी मूर्धवाली[1] योऽपि नरो ध्रुवम् ॥ ५३ ॥

प्रौढाक्षाः स्मितभरित्रिनेत्राः। कुनयी परघातककुत्सितनयवान्।

समाक्षः पुरुषो यस्तु श्रुतिशाल्युपकारधीः।
प्रबुद्धः सत्यभाषी च शान्तचित्तोऽप्यसौ ध्रुवम् ॥ ५४ ॥

समाक्ष इति विजातीयपशुपक्ष्यादिसादृश्याननुगामिनेत्र इति।

अथ ओष्ठलक्षणम्--

बिम्बोपमैरवक्रैश्च नरा ओष्ठैर्महिभुजाः।
तन्वोष्ठा दुर्विधा रूक्षा धराधनविवर्जिताः ॥ ५५ ॥

दुर्विधा दरिद्राः।

मध्यनिम्नाधरो यः स्यात्सुभगोऽसौ न संशयः।
स्थूलौष्ठः स्फुटितौष्ठश्च नरो धर्यश्चापि दुःखितः ॥ ५६ ॥
(९१अ) रक्तौष्ठो यो नरस्तस्य पुण्यवृद्धिः प्रजायते।
परोपकारनिरतो मितसत्येष्टभाष्यपि ॥ ५७ ॥ इति

अथ कर्णलक्षणम्—

ह्रस्वकर्णो महाभोगी कृपणो दीर्घकर्ण्यपि।
धनी क्रूरः सिरानद्धकर्णश्च सततं सुखी ॥ ५८ ॥
रोमशाभ्यां च दीर्घायुर्व्यालम्बाभ्यां तु सौख्यभाक्।
निर्मांसाभ्यां पापमृत्यू विशीर्णाभ्यां सुभोगिता ॥ ५९ ॥

ह्रस्वकर्णो भोगी भवति किन्तु कृपणः। दीर्घकर्णो धनी न तु भोगी। व्यालम्बाभ्यां मांसोन्नद्धाभ्यां, विशीर्णाभ्यामितस्ततः प्रसृताभ्याम्।

समाभ्यां चैव कर्णाभ्यां समोचितगुणो मतः।
विशेषाकारराहित्यं साम्यं नाम प्रकीर्तितम् ॥ ६० ॥ इति

अथ नासालक्षणम्—

तन्वा नसा मृदुश्चाप्रनतया धृतिमान्धनी।
स्थूलया शीलरहितः कामुको जनहार्दभाक् ॥ ६१ ॥

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुकाभया च सुखितः शुष्कया चिरजीव्यपि ।
दीर्घया भोगवांश्चौरस्तथा कुञ्चितयानया ॥ ६२ ॥
उच्चया जनवाल्लभ्यं मृद्वया सौभाग्यपात्रता ।
च्छिन्नयागम्यगामी च प्रभक्षः सव्यनिश्रया ॥ ६३ ॥

च्छिन्नयेति छिन्नयेवेतीव शब्दोऽत्राध्याहार्यः ।

क्रोधी विवृतरोकाभ्यां सौभाग्यं पुटसाम्यतः ।
अधश्चोर्ध्वं स्तम्भपैन्यं काठोधी[1] सत्यलक्षणम् ॥ ६४ ॥

विवृतत्वं वैषम्येणोद्घाटितत्वम् । सौम्यत्वं स्वल्पमण्डलत्वम् । स्तम्भपैन्यं नासास्तम्भस्थौल्यम् ।

समया नासया दूरदीर्घदर्शितत्वमुद्यमः ।
प्रबुद्धतातितीक्ष्णत्वं सर्ववाल्लभ्यमेव च ॥ ६५ ॥

समुद्रः—

'ह्रस्वनासा नरा ये तु धर्मशीला भवन्ति ते ।
हस्तिनासा नरा ये तु सर्वे ते जनवल्लभाः' ॥६६॥ इति

अथ ग्रीवालक्षणम्—

ह्रस्वग्रीवच्छलान्वेषी हेतौ स्वल्पेऽपि सद्भयः ।
शू[९१ब]रः स्यान्महिषग्रीवो वृषग्रीवस्तु मृत्युभाक् ॥ ६७ ॥
दीनचित्तस्तनुग्रीवोऽल्पबुद्धिरपि जायते ।
स्थूलग्रीवस्तु ग्रहिलो बद्धमुक्त्वापि[1] जायते ॥ ६८ ॥
कम्बुग्रीवान्प्रशंसन्ति कुम्भग्रीवी च पार्थिवः ।
दीर्घग्रीवात्र शंसन्ति बकग्रीवांश्च पण्डिताः ॥ ६९ ॥
प्रलम्बकण्ठोवद्...द्धिः स्वश्चिपिटकन्धरः[1] ।
सिरावनद्धग्रीवो वा साम्यं धीमत्वलक्षणम् ॥ ७० ॥ इति

**अथास्यलक्षणम्—**

समसंवृतवक्त्रेण राजा भवति मानवः ।
विपरीतमतो यस्यात्तेन क्लेशयुजो नराः ॥ ७१ ॥ इति

---

1 Currupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ मुखलक्षणम्—

महामुखेन दौर्भाग्यं माण्डल्याच्छाट्यसंरतिः।
स्त्रीमुखेनासुतो ज्ञेयो दैर्घ्यं दारिद्र्यकारकम् ॥ ७२ ॥
भीरुणा पापकृत्त्वं च चतुरश्रेण धूर्तता।
निम्नं च वक्त्रं विज्ञेयं तनयक्लेशकारकम् ॥ ७३ ॥
ह्रस्वेनानेन कार्पण्यं संपूर्णेन च भोगिता।
अभागी मूषकमुखो हयवक्त्रश्च दुर्धियः ॥ ७४ ॥
तनुता पीतता वापि यस्येक्षेत विनामयम्।
लक्षणं दुष्टशङ्कायाः वक्रायाः प्रकृतेश्च तत् ॥ ७५ ॥ इति

अथ दन्तलक्षणम्—

स्निग्धता यापि नैविद्यं तैक्ष्ण्यं साम्यं चतुर्थकम्।
लक्षणं दशनानां च शुभं तैः शुभभागिनः ॥ ७६ ॥
वक्रदन्तश्च पुरुषो हेतुव्याजप्रदूषकः।
स्थूलर्जुदीर्घदन्तो यः स भवेन्न्यायकोविदः ॥ ७७ ॥
द्वात्रिंशद्दशनो राजा भोगी स्यादेकहानितः।
त्रिंशद्दन्ता नरा ये ते सुखदुःखप्रभागिणः ॥ ७८ ॥
एकोनत्रिंशद्दशनाः पुरुषा दुःखजीविनः।
अष्टाविंशतिदन्ता ये ते दुःखस्यातिभाजनम् ॥ ७९ ॥ इति

अथ स्वरलक्षणम्—

उच्चत्राणिर्महासत्त्वस्तनुवाग्दुष्टचिन्तकः।
समवाक्कुशली तीक्ष्णवागहंकारभाजनम् ॥ ८० ॥
वाचश्च गौरवं चिह्नमुपकारमते खलु।
तत्काले हस्तसंज्ञापि तैक्ष्ण्यगाम्भीर्यसूचिका ॥ ८१ ॥ इति

(९२ अ) अथ स्कन्धलक्षणम्—

वृषस्कन्धो गजस्कन्धः कदलीस्कन्ध एव च।
महाभोगा महाधन्याः सर्वे ते पार्थिवोपमाः ॥ ८२ ॥
तन्वंसो विजयी राजा स्वधर्मनियतस्थितिः।
शुभाशयश्च सुश्लिष्टस्कन्धो वीर्यबलोद्धतः ॥ ८३ ॥ इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ **कपोललक्षणम्**—

यस्य गल्लौ हि सम्पूर्णौ पद्मपत्रसमप्रभौ ।
भोगवान्स्त्रीप्रियश्चैव सर्वविद्याधरः स्मृतः ॥ ८४ ॥
सिंहव्याघ्रगजेन्द्राणां कपोलसदृशौ यदि ।
कृषिभोगी भवेन्नित्यं बहुपुत्रश्च जायते ॥ ८५ ॥ इति

अथ **जिह्वालक्षणम्**—

कृष्णजिह्वा भवेद्यस्य स नरो दुःखभाजनम् ।
समलायां च जिह्वायाम् पुमान्स्यात्पापकारकः ॥ ८६ ॥
स्थूलजिह्वास्तथा क्रूरा नरा अनृतभाषिणः ।
सितजिह्वा नरा ये च शौचाचारविवर्जिताः ॥ ८७ ॥
पद्मपत्रसमा जिह्वा यस्यासौ मिष्टभोगभुक् ।
रक्तजिह्वो भवेद्योसौ विद्यां लक्ष्मीं च प्राप्नुयात् ॥ ८८ ॥ इति

अथ **तालुलक्षणम्**—

कृष्णं तालु नृणां येषां भवन्ति कुलनाशकाः ।
पद्मपत्रसमं यस्य स नरो भूपतिर्भवेत् ॥ ८९ ॥
श्वेतं तालु नृणां येषां धनवन्तो भवन्ति ते ।
रक्तं तालु नृणां येषां धनभोक्तार एव ते ॥ ९० ॥
पीतं तालु नृणां येषां ते स्युर्नूनं नराधिपाः ।
भोगिनश्चैव ते ज्ञेयाः समुद्रवचनं यथा ॥ ९१ ॥ इति

अथ **स्तनललक्षणम्**—

उन्नतोपचितौ येषां घनास्निग्धौ पयोधरौ ।
ते नरा मैथुने शूरा भोगवन्तश्च कर्मभिः ॥ ९२ ॥
नोन्नतौ च न वा स्निग्धौ शिथिलौ च पयोधरौ ।
निर्मांसौ च कुरूपौ च ते नरा दुःखभागिनः ॥ ९३ ॥ इति

अथ **वक्षोलक्षणम्**—

विस्तीर्णं मासलं वक्षो भूपतेर्जायते ध्रुवम् ।
समेन वक्षसा साधुक्रियानिष्ठश्च सन्मतिः ॥ ९४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवेपनं चोन्नतं च हृदयं धनिनां मतम् ।
सिरालं रोमशं चैव दुर्विधानां प्रकीर्तितम् ॥ ९५ ॥ इति

अथ कुक्षिलक्षणम्—

स्थूलकुक्षिर्ग्रही भीतिविकलश्चापि जायते ।
कुक्षौ गमीरी नृपतिरुत्ताने स्त्रीमुखेक्षकः ॥ ९६ ॥
समे च कुक्षौ[९२ ब]भोगी स्यान्निःस्वो घटगलोदरः ।
सिंहोदरो नरश्चापि धनधान्यसमृद्धिमान् ॥ ९७ ॥

समुद्रः—

मृगोदरो नरो धन्यश्चमूरूदरसन्निभः ।
मण्डूकसदृशो यस्य स नरः पार्थिवो भवेत् ।
व्याघ्रोदरो गजपतिः श्वशृगालोदरोऽधमः ॥ ९८ ॥ इति

अथ पृष्ठलक्षणम्—

सिंहपृष्ठो नरो यस्तु धनं तस्य विनिर्दिशेत् ।
कूर्मपृष्ठो भवेद्राजा धनसौभाग्यवान् भवेत् ॥ ९९ ॥ इति

अथांसलक्षणम्—

अंसौ पृष्ठं द्वयमिदं दीर्घं धीधैर्यकारकम् ।
मालिन्यायतनं येन जायतेऽस्य न संशयः ॥ १०० ॥
तादृशं धीधैर्यकौशलमस्य भवेद्येन मालिन्यमेवास्य जायते ।
अरोमशमभग्नं च द्वयमेतत्प्रशस्यते ।
भग्नं सरोमनिर्मांसं दारिद्र्याय भवेन्नृणाम् ॥ १०१ ॥ इति

अथ नाभिलक्षणम्—

वर्तुला च गभीरा च नाभिः पुंसां प्रशस्यते ।
उन्नता विरला नाभिः पुंसां दुःखप्रदायिनी ॥ १०२ ॥ इति

अथ कटिलक्षणम्—

विस्तीर्णा कनकस्निग्धा शुभा पुंसां कटिर्मता ।
निर्मांसा तु कटिर्येषां ते नरा दुःखभागिनः ॥ १०३ ॥
सिंहव्याघ्रसमा येषां कटिस्ते दण्डनायकाः ।
ऋक्षवानरतुल्या च कटिर्येषां न ते शुभाः ॥ १०४ ॥ इति

For Private and Personal Use Only

अथ हस्ताधिकारः—

प्रलम्बपीनपाणिश्च नरः सर्वगुणोत्तरः ।
ह्स्वरोमशबाहुश्च दासः प्रेष्योऽपि वा भवेत् ॥ १०५ ॥
वामावर्तभुजश्चोक्तलक्षणैर्लक्षितोऽपि यः ।
पृथिवीशः स विज्ञेयो गृहे श्रीश्चास्य सुस्थिता ॥ १०६ ॥
यस्य मीनसमा रेखाः कर्मसिद्धिः शुभास्य तु ।
धनाढयश्च स विज्ञेयो बहुपुत्रो न संशयः ॥ १०७ ॥
आतपत्रं करे यस्य दण्डेन सहितं पुनः ।
चामरद्वितयं चापि चक्रवर्ती स जायते ॥ १०८ ॥
स्वस्तिके जनसौभाग्यं मीने सर्वत्र पूज्यता ।
श्रीवत्से वाञ्छिता लक्ष्मीर्गवाढ्यो दामलाञ्छितः ॥ १०९ ॥
ध्वजवज्राङ्कुशच्छत्रं शङ्ख[९३अ]पद्मादयस्तले ।
पाणिपादेषु दृश्यन्ते यस्यासौ श्रीपतिः पुमान् ॥ ११० ॥
शक्तितोमरदण्डासिधनुश्चक्रगदोपमा ।
यस्य हस्ते भवेद्रेखा तं राजानं विनिर्दिशेत् ॥ १११ ॥

इयं च रेखोर्ध्वरेखा बोध्या । अत्र विशेषः ।

मणिबन्धात्समुत्थाय या रेखा चोर्ध्वगामिनी ।
सोर्ध्वरेखा समाख्याता पञ्चधासौ शुभोदया ॥ ११२ ॥
अङ्गुष्ठगामिनी सा चेत्राज्यलाभप्रदायिनी ।
तर्जनी धाविनी नूनं नृपाध्र्यावाहिनी मता ॥ ११३ ॥
मध्यमां च यदा गच्छेदाचार्यत्वप्रदा मता ।
अनामाश्रयिणी सार्थवाहकत्वप्रबोधिनी ॥ ११४ ॥
कनिष्ठगामिनी चेत्सा श्रैष्ठ्यं सर्वत्र कारयेत् ।
यदैषाङ्गुलिमाक्षिप्य मध्यामारोहति ध्रुवम् ॥ ११५ ॥
तदासौ निष्फला ज्ञेया महाहानिकरी परम् ।
मणिबन्धात्पितृरेखा करभाद्विभवायुषोः ॥ ११६॥
अखण्डया पीवरया तया शोभनमादिशेत् ।
द्वे रेखे यान्ति तिस्रोऽपि तर्जन्यङ्गुष्ठकान्तरे ॥ ११७ ॥

---

1. Currupt.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येषां रेखा इमास्तिस्रः संपूर्णा दोषवर्जिताः ।
तेषां गोत्रधनायूंषि सम्पूर्णान्यन्यथा न तु ॥ ११८ ॥
गत्वा मिलितयोः प्रान्ते द्रव्यपित्रोश्च रेखयोः ।
गृहबन्धो विनिर्देश्यो गृहे भङ्गोऽथवा भवेत् ॥ ११९ ॥

गृहबन्धो गृह एव स्थितिः ।

एकया यवपङ्क्त्या च श्रेष्ठो बहुधनोचितः ।
द्वाभ्यां च यवमालाभ्यां राजा मन्त्री धनी बुधः ॥ १२० ॥
मणिबन्धे यवश्रेण्यस्ति स चेत्सुनृपो भवेत् ।
यदि ताः पाणिपृष्ठेऽपि ततोऽधिकफलं भवेत् ॥ १२१ ॥
त्यागाय शोणगम्भीराः सुखाय मधुपिङ्गलाः ।
सूक्ष्माः श्रिये भवेयुस्ताः सौभाग्याय समूलकाः ॥ १२२ ॥
छिन्नाः सपल्लवा रूक्षा विषमाः स्थानविच्युताः ।
विवर्णाः स्फुटिताः कृष्णा नीलाः शून्याश्च नोत्तमाः ॥ १२३ ॥
क्लेशं सपल्लवा रेखा विच्छिन्ना वित्तसंशयम् ।
कदनं पुरुषाद्रव्यविनाशं विषमावहेत् ॥ १२४ ॥
मध्यमाप्राप्तरेखा या देशिनी स्याद्यदाधिका ।
प्रचुरस्तत्पितुः पक्षः[९३ब]श्रियश्च विपदोऽन्यथा ॥ १२५ ॥
अनामिकाया रेखायाः कनिष्ठा स्याद्यदाधिका ।
धनवृद्धिकरी पुंसां मातृपक्षो बहुस्तथा ॥ १२६ ॥
अधू रेखा कनिष्ठानां रेखाः स्युः गृहिणीप्रदाः ।
समाभिः शुभशीलास्ता विषमाभिः कुशीलिकाः ॥ १२७ ॥
अधूरेखावसानाभी रेखाभिर्मणिबन्धतः ।
स्पष्टाभिर्भ्रातरः स्पष्टेतराभिर्जामयः स्मृताः ॥ १२८ ॥
उल्लङ्घ्यन्ते च यावन्त्योऽङ्गुल्यो जीवति रेखया ।
पञ्चविंशतितो ज्ञेयास्तावन्त्यः शरदो बुधैः ॥ १२९ ॥

अत्र विशेषः ।

कनिष्ठाङ्गुलिमूला च रेखा गच्छत्यनामिकाम् ।
अविच्छिन्ना च वर्षाणि त्रिंशदायुर्विनिर्दिशेत् ॥ १३० ॥

For Private and Personal Use Only

कनिष्ठाङ्गुलितो रेखा गच्छेद्यदि प्रवेशिनीम् ।
सप्तति तस्य वर्षाणि विबुधो निर्दिशेद्ध्रुवम् ॥ १३१ ॥
प्रदेशिनी मध्यगताशीति वर्षाणि जीवति ।
मध्यां व्यतीत्य च गता नवत्यब्दानि जीवति ॥ १३२ ॥
मर्मान्तरगता रेखा शतं वर्षाणि जीवयेत् ।
कनिष्ठान्तर्गता रेखा नदीमृत्युश्च कारयेत् ॥ १३३ ॥
ऊर्ध्वरेखा भवेद्यस्य शृङ्गिभिर्वा विहन्यते ।
अधूरेखा द्रव्यरेखा कर्मरेखा ततः परम् ॥ १३४ ॥
अङ्गुष्ठमूलादारभ्य कौमारं यौवनं जरा ।
रेखात्रिके दर्शनीयं कर्मार्थायुश्च तत्र वै ॥ १३५ ॥
मणिबन्धमुखाचायू रेखाया येऽत्र पल्लवाः ।
संपदस्ते बहिर्ये च विपदोऽङ्गुलिसंमुखाः ॥ १३६ ॥
यवैरङ्गुष्ठमध्यस्थैर्विद्याख्यातिविभूतयः ।
शुक्लपक्षे तथा जन्म दक्षिणाङ्गुष्ठगैश्च तैः ॥ १३७ ॥
कृष्णपक्षे तथा जन्म वामाङ्गुष्ठागतैर्यवैः ।
यवैरङ्गुष्ठमूलस्थैस्तत्संख्याः सूनवो नृणाम् ॥ १३८ ॥
अनामिकान्तपर्वस्था प्रीतिरेखा प्रभुत्वकृत् ।
ऊर्ध्वा पुनस्तत्रे तस्य धर्मरेखैवमुच्यते ॥ १३९ ॥
अङ्गुष्ठा पितृरेखान्तस्तिर्यग्रेखापदप्रदा ।
अपत्यरेखाः सर्वाः स्युर्मत्स्याङ्गुष्ठतलान्तरे ॥ १४० ॥
श्लिष्टाम्यङ्गुलिमध्यानि द्रव्यसंचयहेतवे ।
तानि चेच्छिद्रमुक्तानि दानशीलो भवेन्नरः ॥ १४१ ॥
एकोऽप्यधिमुखस्तस्य मत्स्यः श्रीवृद्धिकारणम् ।
संपूर्णौ किं पुनर्द्वौ स्तः पाणि[९४अ]मूलास्थितौ नृणाम् ॥ १४२ ॥
तुला वामकरे वज्रं करमध्ये तु दृश्यते ।
वाणिज्यं सिध्यते तस्य पुरुषस्य न संशयः ॥ १४३ ॥
ऊर्ध्वरेखा करा येऽप्यरेखाः स्युरङ्गुलित्रये ।
नानाभोगसुखासनाः समुद्रवचनं यथा ॥ १४४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आवर्ता दक्षिणे शस्ता सावर्ताङ्गुलिपर्वसु ।
ताम्राः स्निग्धाः शिखोत्तुङ्गाः पर्वार्धाश्च नखाः शुभाः ॥१४५॥
नखेषु बिन्दवः श्वेताः पाण्योश्चरणयोरपि ।
आगन्तवः प्रशस्ताः स्युरिति भोजनृपोऽभ्यधात् ॥ १४६ ॥
त्रिकोणरेखया सीरमुसलोलूखलादिना ।
वस्तुना हस्तजातेन पुरुषः स्यात्कृषीवलः ॥ १४७ ॥
पाणेस्तलेन शोणेन धनी नीलेन मद्यपः ।
पीतेनागम्यनारीगः कृष्णेन च धनोज्झितः ॥ १४८ ॥
अरेखं बहुरेखं वा येषां पाणितलं नृणाम् ।
तेस्युरल्पायुषो निस्स्वा दुःखिता नात्र संशयः ॥ १४९ ॥
इति **पुरुषलक्षणशाखायां पाणिगुच्छकः ।**

अथ **लिङ्गलक्षणम्**—

दक्षिणावर्तलिङ्गेन पुरुषः पुत्रवान्भवेत् ।
वामावर्तेन लिङ्गेन नरः कन्याप्रजो मतः ॥ १५० ॥
स्थूलदीर्घं यस्य लिङ्गं स नरो दुःखभाग् भवेत् ।
प्रलम्बवक्रलिङ्गाश्च पुरुषाः सुखभोगिनः ॥ १५१ ॥
एकैकधारालिङ्गेन नरो भवति पार्थिवः ।
द्विधारा धनवन्तश्च बहुधारे दरिद्रता ॥ १५२ ॥
समपादोपविष्टस्य गुल्फौ स्पृशति मेहनम् ।
भोगवान्स तु विज्ञेयो वार्थतुरगमेहनः ॥ १५३ ॥
समपादोपविष्टस्य महीं स्पृशति मेहनम् ।
स भवे दुःखितः प्रोक्तो दारिद्र्येन च पीडितः ॥ १५४ ॥
दीर्घलिङ्गेन दारिद्र्यं स्थूललिङ्गेन दुःखिता ।
कृशलिङ्गेन सौभाग्यं ह्रस्वलिङ्गेन भूपता ॥ १५५ ॥

अथ **शुक्रलक्षणम्**—

मीनगन्धेन शुक्रेण धनवान्पुत्रवान् भवेत् ।
हविर्गन्धेन शुक्रेण गवाढ्यो जायते नरः ॥ १५६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मधुगन्धेन शुक्रेण नरः स्त्रीजनवल्लभः ।
पद्मगन्धेन यूपी स्यान्महीगन्धेन पार्थिवः ॥ १५७ ॥
लाक्षागन्धेन स्यान्निस्स्वो मांसगन्धेन[९४ब]तस्करः ।
वसागन्धेन व्यसनी मद्यगन्धेन दुःखितः ॥ १५८ ॥
कटुगन्धेन शुक्रेण पुरुषो दुर्भगो भवेत् ।
क्षारगन्धेन शुक्रेण नरा दारिद्र्यभागिनः ॥ १५९ ॥ इति

अथ शुक्रवर्णलक्षम्—

पयोवर्णेन शुक्रेण भवेद्राजा न संशयः ।
श्यामवर्णेन शुक्रेण बद्धभोगी भवेन्नरः ॥ १६० ॥ इति

अथ जङ्घालक्षणम्—

तुरङ्गजङ्घा धनिनो राजानो मृगजङ्घकाः ।
दीर्घजङ्घाः स्थूलजङ्घा जायन्ते पथिगामिनः ॥ १६१ ॥
सिंहजङ्घा व्याघ्रजङ्घा धनकीर्तिसमन्विताः ।
रोमयुक्ता च जङ्घा च दारिद्र्यं सापि यच्छति ॥ १६२ ॥
शृगालसमजङ्घा ये लक्ष्मीस्तेषां न जायते ।
मीनजङ्घश्च यो लक्ष्मीं स प्राप्नोति न संशयः ।
काकजङ्घा नरा ये च तेषां राज्यं विनिर्दिशेत् ॥१६३॥ इति

अथ गतिलक्षणम्—

हंसहस्त्यश्वगत्या च पुरुषाः स्युर्नराधिपाः ।
वृषभा[1]... कानाञ्च गतिर्भोगवतां भवेत् ॥ १६४ ॥
जलोर्मिसदृशा येषां काकोलूकसमागतिः ।
द्रव्यक्षयकरी ज्ञेया दुःखशोककरी तथा ॥ १६५ ॥
श्रोष्ट्राणां महिषाणां च खरसूकरयोस्तथा ।
गतिर्येषां समाख्याता ते नराः भाग्यवर्जिताः ॥ १६६ ॥ इति

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ **पादाङ्गुलिलक्षणम्**—

अङ्गुष्ठौ विपुलौ येषां ते नरा दुःखभागिनः ।
क्लिश्यन्ते विकृताङ्गुष्ठा नराश्च पथिगामिनः ॥ १६७ ॥
उन्नतैश्च समस्निग्धैरसितैः सुखभागिनः ।
वृत्तै रक्तैस्तथा जाता नखैर्ये स्युर्नराधिपाः ॥ १६८ ॥
यस्य प्रदेशिनी दीर्घा ह्यङ्गुष्ठं च व्यतिक्रमेत् ।
स्त्रीभोगं लभते नित्यं पुरुषो नात्र संशयः ॥ १६९ ॥
मध्यमायां तु दीर्घायां दीर्घां हानिं विनिर्दिशेत् ।
अनामिकायां दीर्घायां विद्याभोगी भवेन्नरः ॥ १७० ॥
सा च ह्रस्वा भवेद्यस्य स स्यात्पारदारिकः ।
कनिष्ठायां च दीर्घायां सुवर्णस्य च भागिनः ॥ १७१ ॥
यस्य प्रदेशिनी स्थूला भीतिस्तस्य कनिष्ठिका ।
ह्रस्वा क्लेशाय भोगायाङ्गुष्ठ दीर्घा प्रदेशिनी ॥ १७२ ॥
[९५अ]यस्य पादतले रेखाङ्कुशश्चापि विराजते ।
सेनानां नायकं विद्याद्गजानामधिपं तथा ॥ १७३ ॥
कुटिलाश्च तथा शून्या यस्याङ्गुल्यो भवन्ति हि ।
तं सर्वदुःखितं नित्यं धनहीनं विनिर्दिशेत् ॥ १७४ ॥
असंहताभिर्ह्रस्वाभिरङ्गुलीभिश्च मानवाः ।
दासा वा दासकर्माणः समुद्रवचनं यथा ॥ १७५ ॥
अङ्गुल्योऽपि समा दीर्घाः संहताश्च समुन्नताः ।
येषां प्रदक्षिणावर्ताः पार्थिवास्ते न संशयः ॥ १७६ ॥
जानुनी मांसले स्निग्धे ऊरू विस्तीर्णवर्तुलौ ।
इष्टिकाभा कटी शस्ता मध्यं तु कुलिशोपमम् ॥ १७७ ॥
इति दिङ्मात्रमेतस्य कीर्तितं शास्त्रतो मया ।
महामतिविनोदाय प्रसङ्गे शोभतेऽखिलम् ॥ १७८ ॥
संक्रामितमिदं सर्वं यत्तैरुक्तं महात्मभिः ।
आक्षेपमात्रमप्येते बिन्दुच्युत्या न मे भरः ॥ १७९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**आक्षेपेति** । अयं भावः—

अत्र वैद्यसूक्ष्मनये सूक्ष्ममेव किञ्चिदवश्यं वर्णनीयमासीत् । तत्त्वत्र न लभ्यते इति यदभियुक्ता आक्षिपन्ति । **बिन्दुच्युतेति** । बिन्दुच्युतिन्यायेन यथा बिन्दुः च्युतः स्थितश्चार्थान्तरप्रतीतिं करोति तथात्रापि काचित्कणिका चेत् च्युता मषकतिलकादिलक्षणा सर्वमेतत् शिथिलयति । तथा चोक्तनयने सुलक्षणे कुलक्षणे वा पुरुषे प्रत्यभिज्ञाने तत्रैव स्थानान्तरस्थितसूचकबिन्दुसदृश तिलमात्रेणापि चान्तरं[९५ब]महदापतति ।

सुलक्षणे कुलक्षणं कुलक्षणे सुलक्षणमिति तदपि कथनीयमासीत् । यन्न कथितं तदाक्षेपमात्रं त एवेति भावः । निदर्शितं च प्राच्यैरपि बिन्दुच्युतिस्थितिभ्यामर्थान्तरप्रतीतिर्यथा—

'काले जलधरजाले सहकारमनोहरे ।
कान्तः सर्वगुणोपेतो बाले दुःखेन लभ्यते' ॥ १८० ॥ इति

अत्रार्थः—हे बाले जलधरजाले काले वर्षाकाले सहकारकुसुममनोहरे कान्तः सर्वगुणोपेतः स दुःखेन लभ्यते । स तावद्गुरुजनाज्ञया धर्मपतिर्दूरे लग्नः । अधुना च समयोगक्षेमया भवत्या यदि मदर्थं प्रयस्यते तथापि कान्तः कमनीयः सर्वगुणोपेतश्च कथं लभ्यते । कुलसरणिं व्यतीत्य भवदनुरोधेन यद्यपि क्रियते तथापि तादृशकान्ताभावाद्धर्महानिः । कुलाङ्गनात्वानुतापश्च शिष्यत इति प्रबोधनायागतां सखीं प्रति बालायां लिखन्त्यां तदाश्वासनार्थं, तत्र श्वशुरे समायाते तत्रासौ शीर्णं बिन्दुं पातयामास । बालेन्दुः खे न लभ्यते इति बिन्दौ च पातिते गुरुदर्शनोचितोऽसौ श्लोको जातः ।

तथा च एतादृशकाले मेघाच्छादितत्वात् आकाशे बालेन्दुः कोमलचन्द्रो न लभ्यते । इति

(९६अ) अथ **स्त्रीलक्षणशाखा** । तत्राध्यादौ सामान्यलक्षणमुभयानुगतं यथा ।

आवर्ता दक्षिणे पुंसां स्त्रीणां वामे शुभप्रदाः ।
स्पन्दनं स्फुरणं लक्ष्म तिलको मषको व्रणः ॥ १ ॥

अत्र वराहाचार्यो विशेषमाह—

उत्पातगण्डपिटका दक्षिणतो वामतस्त्वभिघाताः ।
धन्या भवन्ति पुंसां तद्विपरीताश्च नारीणाम् ॥ २ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ स्त्रीणां विशेषलक्षणानि

पादौ समाङ्गुली स्निग्धौ भूम्यां यदि प्रतिष्ठतः।
यस्याः सकोमलौ रक्तौ सा कन्या गृहमण्डिनी ॥ ३ ॥

प्रतिष्ठतः इति समुद्रया भूमिं स्पृशतः । तथा च समुद्रः—

समन्तात्भूमिसंलग्नं यस्याश्चरणयोस्तलम् ।
अष्टौ पुत्रान्प्रसूते सा पत्युः संतानवर्धिनी ॥ ४ ॥ इति
चक्रस्वस्तिकशङ्खाब्जध्वजमीनातपत्रवत् ।
यस्याः पादतले रेखा सा भवेत् क्षितिपाङ्गना ॥ ५ ॥
भवेदखण्डभोगायोर्ध्वा मध्याङ्गुलिसंगता ।
रेखाखुसर्पकाकाभा दुःखदारिद्र्यसूचिका ॥ ६ ॥
यस्याः पादतले रेखा तर्जनीं याति चोर्ध्वगा ।
भर्तारं लभते शीघ्रं प्रिया भर्तुश्च जायते ॥ ७ ॥
पादे प्रदेशिनी यस्या अङ्गुष्ठाग्रं व्यतिक्रमेत् ।
न सा भर्तृगृहे तिष्ठेत्स्वच्छन्दा कामचारिणी ॥ ८ ॥
पादे मध्यमिका यस्या अङ्गुष्ठं च व्यतिक्रमेत् ।
कुशीला दुर्भगा चैव तस्मात्तां परिवर्जयेत् ॥ ९ ॥
यस्यास्त्वनामिका ह्रस्वा तां विदुः कलहप्रियाम् ।
भूमिं न स्पृशते यस्याः खादते सा पतिद्वयम् ॥ १० ॥
पादे कनिष्ठिका यस्या भूमिं न स्पृशते यदि ।
भर्तारं प्रथमं हत्वा द्वितीये सुप्रतिष्ठिता ॥ ११ ॥
अनामिका च मध्या च यस्या भूमिं न च स्पृशेत् ।
पतिद्वयं निहन्त्याद्या द्वितीया च पतित्रयम् ॥ १२ ॥
[९६ब]पतिहीनत्वकारिण्यो हीने ते द्वे यदा च वै ।
उन्नतो मांसलोऽङ्गुष्ठो वर्तुलोऽतुलभोगदः ॥ १३ ॥
वक्रो ह्रस्वश्च चिपिटः सुखसौभाग्यभञ्जकः ।
विधवा विपुलेन स्याद्दीर्घाङ्गुष्ठेन दुर्भगा ॥ १४ ॥
दीर्घाङ्गुलीभिः कुलजा कृशाभिरतिनिर्धना ।
ह्रस्वायुष्या च ह्रस्वाभिर्भुग्नाभिर्भुग्नवर्तिनी ॥



For Private and Personal Use Only

चिपिटाभिर्भवेद्दासी विरलाभिर्दरिद्रिणी ॥ १५ ॥
परस्परं समारूढा यदाङ्गुल्यो भवन्ति हि ।
हत्वा बहूनपि पतीन्परप्रेष्या तदा भवेत् ॥ १६ ॥
यस्याः पथि समायान्त्या रजो भूमेः समुच्छलेत् ।
सा पांस्वला प्रजायेत कुलत्रयविनाशिनी ॥ १७ ॥
राज्ञीत्वसूचकं स्त्रीणां पादपृष्ठं समुन्नतम् ॥ १८ ॥
दरिद्रा मध्यनम्रेण सिरालेन सदाध्वगा ।
रोमाढ्येन भवेद्दासी निर्मांसेन च दुर्भगा ॥ १९ ॥ इति

अथ जङ्घालक्षणम्—

समपार्ष्णिः शुभा नारी पृथुपार्ष्णिश्च दुर्भगा ।
कुटिलोन्नतपार्ष्णिः स्याद्दीर्घपार्ष्णिश्च दुःखभाग् ॥ २० ॥
विषमैरुन्नतैर्गुल्फैर्नार्यस्तु कलहप्रियाः ।
निगूढगुल्फा या नारी सा नित्यं सुखमेधते ॥ २१ ॥
रोमहीने समे जङ्घे सुस्निग्धे क्रमवर्तुले ।
यस्याः सा राजपत्नी स्याद्विसिरे सुमनोहरे ॥ २२ ॥
एकरोमा राजपत्नी द्विरोमापि सुखास्पदम् ।
त्रिरोमा यापि कूपेषु भवेद्वैधव्यदुःखभाग् ॥ २३ ॥ इति

अथ जानुलक्षणम्—

वृत्तं पिशितसमग्रं जानुयुग्मं प्रशस्यते ।
निर्मांसं स्वैरचारिण्या दरिद्रायाश्च विश्लथम् ॥ २४ ॥ इति

अथोरुलक्षणम्—

विश्लथैः करभाकारैर्गुरुभिर्मसृणैर्घनैः ।
सुवृत्तै रोमरहितैर्भवेयुर्भूपवल्लभाः ॥ २५ ॥ इति

अथ कटिलक्षणम्—

चतुर्भिरङ्गुलैः शस्ता कटिर्विंशतिसंयुतैः ।
समुन्नतनितम्बाढ्या चतुरश्रा मृगीदृशाम् ॥ २६ ॥
विनता चिपिटा दीर्घा निर्मांसा संकटा[९७अ]कटिः ।
ह्रस्वा रोमयुता नार्या दुःखवैधव्यसूचका ॥ २७ ॥ इति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ नितम्बलक्षणम्—

नितम्बबिम्बो नारीणामुन्नतो मांसलः पृथुः ।
महाभोगाय संप्रोक्तस्तदन्यो शर्मणे मतः ॥ २८ ॥ इति

अथ स्फिग्लक्षणम्—

कपित्थफलवद्वृत्तौ मृदुलौ मांसलौ घनौ ।
स्फिजौ वलिविनिर्मुक्तौ रतिसौख्यविवर्धनौ ॥२९॥ इति

अथ भगलक्षणम्—

शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः ।
वामोन्नतस्तु कन्यादः पुत्रदो दक्षिणोन्नतः ॥ ३० ॥
आखुरोमा गूढमणिः सुश्लिष्टः संहतः पृथुः ।
तुङ्गः कमलवर्णाभः शुभोऽश्वत्थदलाकृतिः ॥ ३१ ॥
निर्मांसं चातिदीर्घञ्च भगं शुष्कं सिरायुतम् ।
दारिद्र्यदुःखदं तस्यादौर्भाग्यं चैव निर्दिशेत् ॥ ३२ ॥
शङ्खावर्तं भगं यस्या सा गर्भमिह नेच्छति ।
आवर्तस्तु भवेद्यस्या भगस्योपरि मस्तके ॥
तस्या विवर्धते पुत्रो धनधान्यसमन्वितः ॥ ३३ ॥
गुह्यान्ते तिलकं यस्या रक्तं कुंकुमसन्निभम् ।
अथवा दक्षिणे भागे प्रशस्ता सा निगद्यते ॥ ३४ ॥ इति

अथ जघनलक्षणम्—

भगस्य भालं जघनं विस्तीर्णं तुङ्गनासिकम् ।
मृदुलं मृदुरोमाढ्यं दक्षिणावर्तमीरितम् ॥ ३५ ॥
वामावर्तं च निर्मांसं भुग्नं वैधव्यसूचकम् ।
संकटं स्थपुटं गूढं जघनं दुःखदं सदा ॥ ३६ ॥ इति

अथ बस्तिलक्षणम्—

बस्तिः प्रशस्ता विपुला मृद्वी स्तोकसमुन्नता ।
रोमशा च सिराला च रेखाढ्या नैव शोभना ॥ ३७ ॥ इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ गन्धलक्षणम्—

धान्यगन्धा च या नारी निम्बगन्धा च या भवेत् ।
वर्जनीया प्रयत्नेन यदीच्छेच्चिरजीवितम् ॥ ३८ ॥
क्षारगन्धां त्यजेन्नारीं तथैव कटुगन्धिनीम् ।
रक्तगन्धा च या नारी सा नारी दुःखदायिनी ॥ ३९ ॥
गोमूत्रहरितालाभ्यां यस्या गन्धः प्रवर्तते ।
दुष्टगन्धा च या नारी[९७ब]तां नारीं परिवर्जयेत् ॥ ४० ॥
तुम्बीपुष्पसमागन्धा लाक्षागन्धानुकारिणी ।
तस्या नैव भवेद्भर्ता दुःखिता चैव जायते ॥ ४१ ॥
चम्पकादित्यपुष्पाणां यदि गन्धो भवेत्स्त्रियः ।
सुभगा सा भजेन्नित्यं भर्तारं वशवर्तिनी ॥ ४२ ॥
यावच्छुछुन्दरीगन्धा मत्स्यगन्धा च या भवेत् ।
उग्रगन्धा च या नारी तां नारीं परिवर्जयेत् ॥ ४३ ॥ इति

अथ नाभिलक्षणम्—

गम्भीरा दक्षिणावर्ता नाभी स्यात्सुखसंपदे ।
वामावर्तसमुत्थाना व्यक्तग्रन्थिर्न शोभना ॥ ४४ ॥
नाभेरधो भवेद्यस्या लक्षणं मषकोपमम् ।
कुङ्कुमोदकसंकाशं प्रशस्तासौ निगद्यते ॥ ४५ ॥ इति

अथ पार्श्वलक्षणम्—

मध्यं वलित्रयोपेतं कृशं शुभमरोमशम् ।
सूते सुतान्बहून्नारी पृथुकुक्षिः सुखास्पदम् ॥ ४६ ॥
क्षितीशं जनयेत्पुत्रं मण्डूकाभेन कुक्षिणा ।
उन्नतेन वलीभाजा सावर्तेनापि कुक्षिणा ॥ ४७ ॥
वन्ध्या प्रव्रजिता दासी क्रमाद्योषा भवेदिह ।
समैः समांसैः पृथुभिर्योषा या स्यात्समाश्रिता ॥ ४८ ॥
पार्श्वैः सौभाग्यसुखयोर्निधानं स्यादसंशयम् ।
यस्या दृश्यसिरे पार्श्वे उन्नते रोमसंयुते ॥ ४९ ॥
निरपत्या च दुःशीला साभवेद्दुःखशेवधिः ॥ ५० ॥ इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथोदरलक्षणम्—

उदरेणातितुच्छेन विसिरेण मृदुत्वचा ।
योषिद्भवति भोगाढ्या नित्यं मिष्टान्नसेविनी ॥ ५१ ॥
कुम्भाकारं दरिद्राया जठरं च मृदङ्गवत् ।
कूष्माण्डाभं यवाभं च दुष्पूरं जायते स्त्रियः ॥ ५२ ॥
सुविशालोदरा नारी निरपत्या च दुर्भगा ।
प्रलम्बजठरा हन्ति श्वशुरं देवरं तथा ॥ ५३ ॥
मध्ये क्षामा च सुभगा भोगाढ्या सवलित्रया ।
ऋज्वी तन्वी च रोमाली यस्याः सा शर्मनर्मभूः ॥ ५४ ॥
कपिला कुटिला स्थूला विच्छिन्ना रोमराजिका ।
वैरवैधव्यदौर्भाग्यं विदध्यादिह योषिताम् ॥ ५५ ॥ इति

अथ हृदयलक्षणम्—

निर्लोमहृ[९८अ]दयं यस्याः समं निम्नत्ववर्जितम् ।
ऐश्वर्यं चाप्यवैधव्यं प्रियप्रेम च सा लभेत् ॥ ५६ ॥
विस्तीर्णहृदया योषा पुंश्चली निर्दया तथा ।
उद्भिन्नरोमहृदया पतिं हन्ति विनिश्चितम् ॥ ५७ ॥
अष्टादशाङ्गुलतरमुरः पीवरमुन्नतम् ।
सुखाय दुःखाय भवेद्रोमशं विषमं पृथु ॥ ५८ ॥ इति

अथ स्तनलक्षणम्—

घनौ वृत्तौ दृढौ पीनौ समौ शस्तौ पयोधरौ ।
स्थूलाग्रौ विरलौ शुष्कौ वामोरूणां न शोभनौ ॥ ५९ ॥
दक्षिणोन्नतवक्षोजा पुत्रिणीष्वग्रजा मता ॥
वामोन्नतकुचा सूते कन्यां सौभाग्यसुन्दरीम् ॥ ६० ॥
अरघट्टघटीतुल्यौ कुचौ दौःशील्यसूचकौ ।
पीवरास्यौ सान्तरालौ पृथूपान्तौ न शोभनौ ॥ ६१ ॥
मूले स्थूलौ क्रमकृशावाग्रे तीक्ष्णौ पयोधरौ ।
सुखदौ पूर्वकाले तु पश्चादत्यन्तदुःखदौ ॥ ६२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुदृशां चूचुकयुगं शस्तं श्यामं सवर्तुलम् ।
अन्तर्मग्नं च दीर्घं च कृशं क्लेशाय जायते ॥ ६३ ॥
यस्याः पयोधरे वामे तिलकं चासितं भवेत् ।
कर्णे कण्ठे सुगात्राया सा कन्या सुखदायिनी ॥ ६४ ॥ इति

अथ जत्रुलक्षणम्—

पीवराभ्यां च जत्रुभ्यां धनधान्यनिधिर्वधूः ।
श्लथाभ्यां चैव निम्नाभ्यां विषमाभ्यां दरिद्रिणी ॥ ६५ ॥ इति

अथ स्कन्धलक्षणम्—

अबन्धावनतौ स्कन्धावदीर्घावकृशौ शुभौ ।
वक्रौ स्थूलौ च रोमाढ्यौ प्रैष्यवैधव्यसूचकौ ॥ ६६ ॥
निगूढसन्धी निम्नाग्रौ शुभावंसौ सुसंहतौ ।
वैधव्यदौ समुच्चाग्रौ निर्मांसावतिदुःखदौ ॥ ६७ ॥ इति

अथ कक्ष्यलक्षणम्—

कक्ष्ये सुसूक्ष्मरोम्णी च तुङ्गे स्निग्धे च मांसले ।
शस्ते न शस्ते गम्भीरे सिराले स्वेदमेण्डले ॥ ६८ ॥ इति

अथ करलक्षणम्—

स्यातां दोषौ सुनिर्दोषौ गूढास्थिग्रन्थिकोमलौ ।
विसिरौ च विरोमाणौ सरलौ च मृगी[९८ब]दृशाम् ॥ ६९ ॥
वैधव्यं स्थूलरोमाणौ ह्रस्वौ दौर्भाग्यसूचकौ ।
परिक्लेशाय नारीणां परिदृश्यसिरौ भुजौ ॥ ७० ॥
अम्भोजमुकुलाकारं मध्योन्नतमरन्ध्रकम् ।
प्रशस्तं शस्तरेखाढ्यमल्परेखं शुभावहम् ॥ ७१ ॥
विधवा बहुरेखेणारेखेणापि दरिद्रिणी ।
भिक्षुकी ससिराढ्येन नारी करतलेन वै ॥ ७२ ॥
मत्स्येन सुभगा नारी स्वस्तिकेन वसुप्रदा ।
पद्मेन भूपतेः पत्नी जनयेद्भूपतिं सुतम् ॥ ७३ ॥
चक्रावर्तः स्त्रियः पाणौ नन्द्यावर्तः प्रदक्षिणः ।
शङ्खातपत्रकमठा नृपमातृत्वसूचकाः ॥ ७४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुलामानाकृतीरेखे वणिक्पत्नीत्वसूचिके ।
गजवाजिवृषाकाराः करे वामे मृगीदृशाम् ॥ ७५ ॥
रेखा प्रासादवज्राभा ब्रूयुस्तीर्थिकरं शुभम् ।
कृषीवलस्य पत्नी स्याच्छकटेन युगेन वा ॥
चामराङ्कुशकोदण्डै राजपत्नी भवेद्ध्रुवम् ॥ ७६ ॥
अङ्गुष्ठमूलान्निर्गत्य रेखा याति कनिष्ठिकाम् ।
यदि सा पतिहन्त्री स्याद्दूरतस्तां त्यजेत्सुधीः ॥ ७७ ॥
त्रिशूलासिगदाशक्तिदुन्दुभ्याकृतिरेखया ।
नितम्बिनी कीर्तिमती त्यागेन पृथिवीतले ॥ ७८ ॥
अङ्गुल्यश्च सुपर्वाणो दीर्घावृत्ताः क्रमात्कृशाः ।
शुभा ह्रस्वाः कृशा वक्रा विरला दुःखसूचकाः ॥ ७९ ॥
अरुणाः सशिखास्तुङ्गाः करजाः सुदृशां शुभाः ।
निम्ना विवर्णाः शुक्लाभाः पीता दारिद्र्यकारकाः ॥ ८० ॥
नखेषु बिन्दवः श्वेताः प्रायः स्युः स्वैरिणी स्त्रियाः ।
अन्तर्निमग्नवंशास्थिः पृष्ठिः स्यान्मांसला शुभा ॥ ८१ ॥
पृष्ठेन रोमयुक्तेन वैधव्यं लभते ध्रुवम् ।
भग्नेन विततेनापि ससिरेणातिदुःखिता ॥ ८२ ॥ इति

अथ **ग्रीवालक्षणम्**—

(९९ अ) ग्रीवया लम्बया चण्डी दरिद्रा ह्रस्वया तया ।
कुलस्य नाशिनी नारी दीर्घया च भवेत्पुनः ॥ ८३ ॥
यस्या ग्रीवा सुवृत्तास्याद्रेखात्रितयसंयुता ।
दक्षिणावर्तसंकाशा सा भाग्येनाधिका भवेत् ॥ ८४ ॥ इति

अथ **चिबुकलणम्**—

चिबुकं द्व्यङ्गुलं शस्तं वृत्तं पीनं सुशोभनम् ।
स्थूलं द्विधा संविभक्तमायतं रोमशं त्यजेत् ॥ ८५ ॥
हनुश्चिबुकसंलग्ना निर्लोमा सुघना शुभा ।
वक्रा ह्रस्वा कृशा स्थूला रोमशा न शुभप्रदा ॥ ८६ ॥ इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ **कपोललक्षणम्**—

शस्तौ कपोलौ वामाक्ष्याः पीनौ वृत्तौ समुन्नतौ ।
रोमशौ परुषौ निम्नौ निर्मांसौ परिवर्जयेत् ॥ ८७ ॥
यस्यास्तु हसमानाया गण्डे भवति कूपकः ।
न सा भर्तृगृहे तिष्ठेत्स्वच्छन्दा कामचारिणी ॥ ८८ ॥ इति

अथ **अथास्यलक्षणम्**—

समं समांसं सुस्निग्धं सामोदं वर्तुलं मुखम् ।
जनितृवदनाच्छाद्यं धन्या नारीह जायते ॥ ८९ ॥

**अथाधरलक्षणम्**—

पाटलो वर्तुलः स्निग्धो लेखाभूषितमध्यभूः ।
सीमन्तिनीनामधरो धराजानिप्रियो भवेत् ॥ ९० ॥
श्यावः स्थूलोऽधरौष्ठः स्याद्वैधव्यकलहप्रियः ।
रोमशौ चातिलम्बौ च यस्या ओष्ठपुटौ पुनः ।
विषमौ चातिस्थूलौ च पतिघ्नी वनिता भवेत् ॥ ९१ ॥ इति

अथ **दन्तलक्षणम्**—

गोक्षीरसन्निभाः स्निग्धा द्वात्रिंशद्दशनाः शुभाः ।
अधस्तादुपरिष्टाच्च समाः स्तोकसमुन्नताः ॥ ९२ ॥
पीनाः श्यावाश्च दशनाः स्थूलदीर्घा द्विपङ्क्तयः ।
शुक्राकाराश्च विरला दुःखदौर्गत्यकारणम् ॥ ९३ ॥
अधस्तादधिकैर्दन्तैर्मातरं भक्षयेत्स्फुटम् ।
पतिहीना च विकटैः कुटिला विरलैर्भवेत् ॥ ९४ ॥ इति

अथ **जिह्वालक्षणम्**—

जिह्वेष्टमिष्टभोक्त्री स्याच्छोणा मृद्वी तथा सिता ।
दुःखाय मध्यसंकीर्णा पुरोभागे सुविस्तरा ॥ ९५ ॥
सितया तोयमरणं श्यामया कलहप्रिया ।
दरिद्रा स्यान्मांसल[९९ब]या लम्बया भक्ष्यभक्षिणी ॥
विशालया रसनया प्रमदार्तिप्रसादभाक् ॥ ९६ ॥ इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ तालुलक्षणम्—

श्वेतेन तालुना दासी दुःखिता कृष्णतालुना ।
हरितेन च रूक्षेण रक्ततालुः सुशोभना ॥ ९७ ॥ इति

अत्रान्यत्र विस्तारः

सिततालुनि वैधव्यं पीते प्रव्रजिता भवेत् ।
कृष्णे पतिवियोगार्ता रूक्षे भूरिकुटुम्बिनी ॥ ९८ ॥
कण्ठे स्थूला सुवृत्ता च ...[1] च लोहिता ।
य...,शुभा....[1] स्थूला कृष्णा च दुःखदा ॥ ९९ ॥ इति

अथ स्मितलक्षणम्—

अलक्षितद्विजं किञ्चित् किञ्चित्स्फुल्लकपोलकम् ।
स्मितं प्रशस्तं सुदृशामनिमीलितलोचनम् ॥ १०० ॥ इति

अथ नासालक्षणम्—

दीर्घेण नासिकाग्रेण नारी भवति कोपिनी ।
ह्रस्वेन तु भवेद्दासी परकर्मकरी तथा ॥ १०१ ॥
चिपिटा नासिका यस्या वैधव्यं साथ गच्छति ।
नातिदीर्घा न विस्तीर्णा सरला सौख्यकारिणी ॥ १०२ ॥
समवृत्तपुटा नासा लघुच्छिद्रा शुभावहा ।
स्थूलाग्रा मध्यनम्रा च न प्रशस्ता समुन्नता ॥
आकुञ्चितारुणाग्रा च वैधव्यक्लेशदायिनी ॥ १०३ ॥ इति

अथ लोचनलक्षणम्—

दीर्घायुः चक्षुर्दैर्घ्यं[1] युगपत् द्वित्रिपिण्डितम् ।
उन्नताक्षी न दीर्घायुर्वृत्ताक्षी कुलटा भवेत् ॥ १०४ ॥
मेषाक्षी केकराक्षी च महिषाक्षी न शोभना ।
पिङ्गनेत्रा भवेन्नारी अप्रिया चैव भामिनि ॥

1 Corrupt.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुःशीला सा च विज्ञेया वैधव्यं लभते पुनः ॥ १०५ ॥
रमणी मधुपिङ्गाक्षी धनधान्यसमृद्धिभाक् ॥
पक्ष्मभिः सुघनैः स्निग्धैः कृष्णैः सूक्ष्मैः सुभाग्यभाक् ॥१०६॥ इति

अथ भ्रूलक्षणम्—

भ्रुवौ सुवर्तुले तन्व्यौ स्निग्धे कृष्णे असंहते ।
प्रशस्ते मृदु[1] भानौ सुभ्रुवः कार्मुकाकृती ॥ १०७ ॥ इति

अथ कर्णलक्षणम्—

कर्णौ लम्बौ शुभावर्तौ सुखदौ च शुभावहौ ।
शष्कुलीरहितौ निन्द्यौ सिरालौ कुटिलौ कृशौ ॥ १०८ ॥ इति

अथ ललाटलक्षणम्—

भालः सिरा[१००अ]विरहितो विरोमार्धेन्दुसन्निभः[1] ।
अनिम्नस्त्र्यङ्गुलोनार्धाः[1] सौभाग्यारोग्यकारणम् ॥ १०९ ॥
व्यक्तस्वस्तिकरेखं च ललाटं राज्यसंपदे ।
प्रलम्बमलिकं यस्या देवरं हन्ति सा ध्रुवम् ॥ ११० ॥
रोमशेन सिरालेन प्रांशुना रोगिणी मता ।
सीमन्तः सरलः शस्तो मौलिः शस्तः समुन्नतः ।
गजकुम्भनिभो वृत्तः सौभाग्यैश्वर्यसूचकः ॥ १११ ॥
स्थूलमूर्धा च विधवा दीर्घशीर्षा च बन्धकी ।
विशालेनापि शिरसा भवेद्दौर्भाग्यभागिनी ॥ ११२ ॥

समुद्रः ।

यथा मुखं तथा गुह्यं यथा चक्षुस्तथा भगः ।
यथा हस्तौ तथा पादौ बाहू जङ्घे तथैव च ॥ ११३ ॥
यस्यास्तु हसमानाया ललाटे तिलको भवेत् ।
वाहनानां समस्तानां साधिपत्यं च गच्छति ॥ ११४ ॥
ललाटं त्र्यङ्गुलं यस्याः शरीरं रोमवर्जितम् ।
निर्मलं च समं देहं सायुःसौख्यधनप्रदा ॥ ११५ ॥

1 Currupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्याक्षीणि प्रलम्बानि ललाटमुदरं भगः ।
सापि संहरते त्रीणि श्वशुरं देवरं पतिम् ।। ११६ ।। इति

अथ **केशलक्षणम्**—

स्थूलकेशा पतिघ्नी स्याद्दीर्घकेशा धनप्रदा ।
परुषैः कपिलैः क्रूरा स्कन्धकेशी च शोभना ।। ११७ ।। इति

अथ **स्वरलक्षणम्**—

हंसस्वरा क्रौञ्चस्वरा कोकिलभ्रमरस्वरा ।
चक्रवाकस्वरा या च धनधान्यविवर्धिनी ।। ११८ ।।
हंसस्वरा मेघवर्णा नारी या दीर्घलोचना ।
यस्य गेहे तु सा गच्छेत् तद्गृहं पुण्यभाजनम् ।। ११९ ।।
तीक्ष्णस्वरातिगम्भीरस्वरातिमधुरस्वरा ।
अष्टौ सा जनयेत्पुत्रान्धनधान्यसमन्विता ।। १२० ।। इति

अथ **लाञ्छनावर्ततिलकलक्षणम्**—

कल्यावर्ता वरा नारी नाभ्यावर्ता वृतात्मजा ।
पृष्ठावर्ता पतिघ्नी सा तस्मादेतां विवर्जयेत् ।। १२१ ।।
वृत्तः पृष्ठे तथावर्तो यस्या भवति निश्चितम् ।
बहून्रमेत पुरुषान्दुःखितान्कुरुते पुनः ।। १२२ ।।
वामावर्तो भवेद्यस्या वामे यदि च मस्तके ।
निर्लक्षणतया सा स्याद्भिक्षामात्रैकजीविनी ।। १२३ ।।
दक्षिणो दक्षिणे भागे यस्यावर्तस्तु मस्तके ।
तस्या नित्यं प्रजायेत कमला करवर्तिनी ।। १२४ ।।
यस्यास्तु हृदये नार्या रक्ताभस्तिलको भवेत् ।
लाञ्छनश्च भवेद्रक्तं सा नारी शोभना भवेत् ।। १२५ ।।
लभते वित्तसंपत्तिं पतिं च वशवर्तिनम् ।
पुत्रत्रयं प्रसूते सा तथा कन्याचतुष्टयम् ।। १२६ ।।
स्तने वामे च कृष्णाभं लाञ्छनं तिलकोपमम् ।
क्षिप्रं वैधव्यमाप्नोति जायते सा च दुःखिता ।। १२७ ।।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्रुवोरन्तर्ललाटे वा मषको राज्यसूचकः ।
वामे कपोले मषकः शोणो मिष्टान्नदः स्त्रियः ॥ १२८ ॥
तिलकं लाञ्छनं चापि हृदि सौभाग्यकारणम् ।
यस्या दक्षिणवक्षोजे शोणे तिलकलाञ्छने ॥
कन्याचतुष्टयं सूते सुतानामपि च त्रयम् ॥ १२९ ॥
तिलकं लाञ्छनं शोणं यस्या वामे कुचे भवेत् ।
एकं पुत्रं प्रसूयादौ ततः सा विधवा भवेत् ॥ १३० ॥
गुह्यस्य दक्षिणे भागे तिलकं यदि योषितः ।
तदा क्षितिपतेः पत्नी सूते वा क्षितिपं सुतम् ॥ १३१ ॥
नासाग्रे मषकः शोणो महिष्या एव जायते ।
कृष्णः स एव भर्तृघ्न्याः पुंश्चल्याः परिकीर्तितः ॥ १३२ ॥
नाभेरधस्तात्तिलको मषको लाञ्छनं शुभम् ।
मषकस्तिलकं चिह्नं गुह्यदेशे दरिद्रकृत् ॥ १३३ ॥
करे कर्णे कपोले वा कण्ठे वामे स्फुरेद्यदि ।
एषां त्रयाणामेकं तु प्राग्गर्भे पुत्रदं भवेत् ॥ १३४ ॥
भालगेन त्रिशूलेन निर्मितेन स्वयम्भुवा ।
नितम्बिनीसहस्राणां स्वामित्वं योषिदाप्नुयात् ॥ १३५ ॥
पाणौ प्रदक्षिणावर्तो धन्यो वामो न शोभनः ।
नाभौ श्रुतावुरसि वा दक्षिणावर्त ईरितः ॥ १३६ ॥
सुखाय दक्षिणावर्तः पृष्ठवंशस्य दक्षिणे ।
अन्तःपृष्ठे नाभिसमो बह्वायुःपुत्रवर्धनः ॥ १३७ ॥
राजपत्न्याः प्रशस्येत भगमौलौ प्रदक्षिणः ।
स चेच्छकटभङ्गः स्याद्बहुपत्यसुखप्रदः ॥ १३८ ॥
कटिगो गुह्यवेधेन पत्यपत्यनिपातनः ।
[१०१अ]स्यातामुदरवेगेन पृथ्वावर्तौ न शोभनौ ॥ १३९ ॥
एकेन हन्ति भर्तारं भवेदन्येन पुंश्चली ।
कण्ठगो दक्षिणावर्तो दुःखवैधव्यसूचकः ॥ १४० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सीमन्ते च ललाटे च त्याज्यो दूरात्प्रयत्नतः ।
सा पतिं हन्ति वर्षेण यस्या मध्ये कृकाटिकम् ।
प्रदक्षिणो वा वामो वा रोम्णामावर्तकः स्त्रियः ॥१४१॥
एको वा मूर्धनि द्वौ वा वामे वामगती यदि ।
आदशाहं पतिघ्नौ तौ त्याज्यौ दूरात्सुबुद्धिना ॥ १४२ ॥
कट्यावर्ता च कुटिला नाभ्यावर्ता पतिव्रता ।
पृष्ठावर्ता च भर्तृघ्नी कुलटा वाथ जायते ॥ १४३ ॥ इति

समुद्रः—

ललाटे दृश्यते यस्याः कृष्णं तिलकमुत्तमम् ।
पञ्च सा जनयेत्पुत्रान् धनधान्यसमाकुला ॥ १४४ ॥
यस्यास्तु हसमानाया ललाटे स्वस्तिको भवेत् ।
वाहनानां सहस्रस्य साधिपत्यं ध्रुवं लभेत् ॥ १४५ ॥

अथ संक्षेपेण **सुलक्षणषोडशकम्**—

पीनोरुः पीनगण्डा, समसितदशना, पद्मपत्रायताक्षी ।
बिम्बोष्ठी, तुङ्गनासा, गजपतिगमना, दक्षिणावर्तनाभिः ॥
स्निग्धाङ्गी, चारुवेशा, मृदुपृथुजघना, सुस्वरा, चारुकेशा, ।
भर्ता तस्याः क्षितीशो भवति च सुभगा पुत्रयुक्ता च नारी॥१४६॥
ऊरू शुभौ करिकरप्रतिमावरोमावश्वत्थ यत्र सदृशं विपुलं च गुह्यम् ।
श्रोणी ललाटमुरुकूर्मसमुन्नतं च गूढो मणिश्च विपुलां श्रियमातनोति ॥१४७॥

अथ **कुलक्षणषोडशकम्**—

पिङ्गाक्षी, गण्डकूपा, खरपरुषरवा, स्थूलजङ्घोर्ध्वकेशी,
रूक्षाक्षी, वक्रनासा प्रविरलदशना कृष्णताल्वोष्ठजिह्वा ।
शुष्काङ्गी संहतभ्रूः कुचयुगविषमा वामना वातिदीर्घा
कन्यैषा वर्जनीया धनसुखरहिता दुष्टशीला च नित्यम् ॥१४८॥इति

अथ **नारीरञ्जनविधाः**—

बाल्ये खेलनकैः काले दत्तापूर्वफलाशनैः ।
मोदते यौवनस्था तु वस्त्रालंकरणादिभिः ॥ १४९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इष्टेष्येन्मध्य[१०१ब]वयाः प्रौढा रतक्रीडासु कौशलैः ।
वृद्धा तु मधुरालापैर्गौरवेण च रज्यते ॥ १५० ॥

अथासां बाल्यादिलक्षणम्——

षोडशाब्दा भवेद्बाला त्रिंशताद्भुतयौवना ।
पञ्चपञ्चाशता मध्या वृद्धा स्त्री तदनन्तरम् ॥ १५१ ॥

अथ पद्मिन्यादिलक्षणम्—

पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा ।
तत्र इष्टविधानेनानुकुल्या स्त्री विचक्षणैः ॥ १५२ ॥
पद्मिनी बहुकेशा च स्वल्पकेशा च हस्तिनी ।
शङ्खिनी दीर्घकेशा च वक्रकेशा च चित्रिणी ॥ १५३ ॥
चक्रस्तना पद्मिनी स्याद्धस्तिनी कुञ्चितस्तनी ।
दीर्घस्तनी शङ्खिनी स्याच्चित्रिणी च समस्तनी ॥ १५४ ॥
पद्मिनी शुभ्रदन्ता च हस्तिन्युन्नतदन्तभाक् ।
शङ्खिन्युद्गतदन्ता च समदन्ता च चित्रिणी ॥ १५५ ॥
पद्मिनी पद्मगन्धा च मधुगन्धा च हस्तिनी ।
शङ्खिनी क्षीरगन्धा च मत्स्यगन्धा च चित्रिणी ॥ १५६ ॥
हंसस्वरश्च पद्मिन्या गूढशब्दा च हस्तिनी ।
रूक्षः शब्दश्च शङ्खिन्याः काकशब्दा च चित्रिणी ॥१५७॥
पद्मिन्या मुखसौरभ्यं हस्तिन्यास्तच्च वक्षसि ।
शङ्खिन्याः कटिगं तत्स्याच्चित्रिण्याः पादगं च तत् ॥ १५८ ॥
वाञ्छन्ति प्रेम पद्मिन्यो हस्तिन्यो बहुतत्पराः ।
चित्रिण्यो मानमिच्छन्ति शङ्खिन्यः कीर्तिकामुकाः ॥ १५९ ॥
बिम्बौष्ठी चारुवक्त्राक्षी सुनसा मंदहासिनी ।
स्कन्धग्रीवा सुरूपा च सुभगा च सुशोभना ॥ १६० ॥
पीनौ स्तनौ च कठिनौ वर्तुलौ कनकद्युती ।
ईदृशं लक्षणं यस्याः पद्मिनीं तां विदुर्बुधाः ॥ १६१ ॥
दीर्घाङ्गुलिर्दीर्घबाहुर्दीर्घपादा समाङ्गुलिः ।
दीर्घनिद्रासमायुक्ता ग्रीष्मे च रमते सदा ॥ १६२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामक्रीडां समामिच्छेत् पीनौष्ठी च सदा मदा ।
ईदृशं लक्षणं यस्या हस्तिनीं तां विदुर्बुधाः ॥ १६३ ॥
गन्धमाल्यप्रिया नित्यं वस्त्राभरणसादरा ।
ताम्बूलभृतगल्ला च देवब्राह्मणतत्परा ॥ १६४ ॥
रमते क्षणमेकं तु बहुपुत्रा प्रजायते ।
[१०२अ]ईदृशं लक्षणं यस्याः शङ्खिनीं तां विदुर्बुधाः ॥१६५॥
गन्धमालारता नित्यं वस्त्राभरणतत्परा ।
ताम्बूलपानकामा च बालेव चपला सदा ॥ १६६ ॥
स्वस्तिप्रीतिरता नित्यं क्षिप्रनिद्रा च या भवेत् ।
एभिस्तु लक्षणैर्युक्ता चित्रिणी संप्रकीर्तिता ॥ १६७ ॥

इति नीतिकल्पे **स्त्रीलक्षणशाखा** समाप्ता ॥

---

## [ ११२ ब ]

ॐ अथात्र प्रसङ्गात् **सौभाग्यकुसुमम्** ।

जात्यं मनोभवसुखं सुभगस्य सर्वमाभासमात्रमितरस्य मनोवियोगात् ।
चित्रे हि भावयति दूरगतापि यं स्त्री गर्भे बिभर्ति सदृशं पुरुषस्य तस्य ॥१॥

जात्यमनाहार्यं । सुभगस्य स्त्रीवल्लभस्य । उपलक्षणमिदं स्त्रिया अपि पतिप्रियायाः ।

दाक्षिण्यमेकं सुभगत्वहेतुर्विद्वेषणं तद्विपरीतचेष्टा ।
मन्त्रौषधाद्यैः कुहकप्रयोगैर्भवन्ति दोषा बहवो न शर्म ॥ २ ॥

दाक्षिण्यमानुकूल्यं स्त्रीणामनुकूलाचरणात्पुरुषः प्रियो भवति । एवं पुंसामपि स्त्री । एतद्विपरीतचेष्टाननुकूलाचरणम् । विद्वेषणं दौर्भाग्यकारणम् । मन्त्रेति । मन्त्रा वशीकारमन्त्राः । औषधानि द्रव्यविशेषाः आदिग्रहणाद्भोजनपानलिङ्गलेपादिग्रहणम् । अन्ये च कुहकप्रयोगा विस्मयोत्पादकाश्चतुरविहिता-उपायाः । एते चोपतापकराः शरीरोपद्रवकरा भवन्ति न शर्मकरा इति ॥

वाल्लभ्यमायाति विहाय मानं दौर्भाग्यमासादयतेऽभिमानः ।
कृच्छ्रेण संसाधयतेऽभिमानी कार्याण्ययत्नेन वदन्प्रियाणि ॥ ३ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेजो न तद्यत् प्रियसाहसत्वं वाक्यं न चानिष्टमसत्प्रणीतम् ।
कार्यस्य गत्वान्तमनुद्धता ये तेजस्विनस्ते न विकत्थना ये ॥ ४ ॥
सर्वोपकारानुगतस्य लोकः सर्वोपकारानुगतो नरस्य ।
कृत्वौपकारं द्विषतां विपत्सु या कीर्तिरल्पेन न सा शुभेन ॥५॥
[१०२ब]यः सार्वजन्यं सुभगत्वमिच्छेत् गुणान्स सर्वस्य वदेत् परोक्षम् ।
प्राप्नोति दोषानसतोप्यनेकान् परस्य यो दोषकथां करोति ॥ ६ ॥
तृणैरिवाग्निः सुतरां विवृद्धिमाच्छाद्यमानोऽपि गुणोऽभ्युपैति ।
स केवलं दुर्जनतात्वमेति हर्तुं गुणान् वाञ्छति यः परस्य ॥७॥

## इति सौभाग्यकारणाख्यं द्वादशं कुसुमम् ।

---

## [ ११३ ]

अथ **सहायसुहृल्लक्षणाख्यम्** । तत्र पुष्करः परशुरामं प्रति—

‘ सहायवरणं कार्यं तत्र राज्यं प्रतिष्ठितम् ।
यदप्यल्पतरं कार्यं तदप्येकेन दुष्करम् ॥ १ ॥
पुरुषेणासहायेन किमु राज्यं महत्परम् ।
तस्मात्सहायान्वरयेत् कुलीनान्नृपतिः स्वयम् ॥ २ ॥
शूरानुत्तमजातीयान् बलयुक्तांश्श्रुतान्वितान् ।
रूपसत्वगुणौदार्यसंयुक्तान्क्षमयान्वितान् ॥ ३ ॥
क्लेशक्षमान्महोत्साहान्धर्मज्ञांश्च प्रियंवदान् ।
हितोपदेशकान् राज्ञां स्वामिभक्तान्यशोर्थिनः ’ ॥ ४ ॥

विदुरः—

‘ जात्या समीक्ष्य मेधावी बुद्धया संपाद्य चासकृत् ।
श्रुत्वा दृष्ट्वाथ विज्ञाय प्राज्ञैर्मैत्रीं समाचरेत् ’ । ५ ॥

अयं मन्त्र्यादिजातिर्नवेति जातिसमीक्षणम् । बुद्धया प्रत्यक्षेण फलाद्युपलम्भेन संपाद्योपपन्नमेतन्न मिथ्येति निश्चित्य श्रुत्वातेभ्यस्तत्रापि बलादि दृष्ट्वा संवादेनासद्वाराबधारणात् ततोऽपि विज्ञाय कार्यत्वेन विनिश्चित्येति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'अवृत्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः।
हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणम्' ॥ ६ ॥

तस्माद्विनयपराक्रमक्षमाचारवानेव सहायो वरणीयः। इति।

'परिच्छेदेन क्षेत्रेण वेश्मना परिचर्यया।
परीक्षेत कुलं राजन्भोजनाच्छादनेन च ॥ ७ ॥

परिच्छेदः परिच्छदः ज्ञानं वा। परितश्चर्या चरणं परिचर्या। क्षेत्रादिनात्यन्तनिर्धनतानिरासः। तादृशस्य भेदसंभवात्।

प्राज्ञोपसेवितं वैद्यं धार्मिकं प्रियदर्शनम्।
मित्रवन्तं सुवासं च सुहृदं परिपालयेत् ॥ ८ ॥

वैद्यं विद्यावन्तम्।

[१०३अ]द्वौ कुलीनः कुलीनो वा मर्यादां यो न लङ्घयेत्।
धर्मापेक्षी मृदुर्दान्तः स कुलीनो मतेश्वरः ॥ ९ ॥

मतेश्वरः स्वामिभक्तः।

ययोश्चित्तेन वै चित्तं नैभृतं नैभृतेन वा।
समेति प्रज्ञया प्रज्ञा तयोर्मैत्री न जीर्यति ॥ १० ॥

नैभृता गूढेङ्गितादि, प्रज्ञा परीक्ष्यकारिणी बुद्धिः।

दुर्बुद्धिमकृतप्रज्ञं छन्नं कूपं तृणैरिव।
विवर्जयेत मेधावी तस्मिन्मैत्री विनश्यति ॥ ११ ॥

अकृतप्रज्ञं कृतघ्नम्।

अवलिप्तेषु मूर्खेषु रौद्रसाहसिकेषु च।
तथैवापेतधर्मेषु न मैत्रीमाचरेद्बुधः ॥ १२ ॥

रौद्रेषु कोपनेषु। साहसिकेषु अविमृष्यकारिषु।

कृतज्ञं धार्मिकं सभ्यमक्षुद्रं दृढभक्तिकम्।
जितेन्द्रियं स्थितं स्थित्या मित्रमत्यागि चेष्यते ॥ १३ ॥
मार्दवं सर्वभूतानामनसूया क्षमा धृतिः।
आयुष्याणि बुधाः प्राहुर्मित्राणां चापि पालनम् ॥ १४ ॥
अपनीतं सुनीतेन योऽर्थं प्रत्यानिनीषति।
मतिमास्थाय सुदृढां तदाकापुरुषव्रतम् ॥ १५ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आयत्यां प्रतिकारज्ञस्तदात्वे दृढनिश्चयः ।
अतीते कार्यशेषज्ञो नरो हन्त न हीयते ॥ १६ ॥

आयत्यां कालान्तरसंभावितापदि, तदात्वे प्राप्तायां सत्यां तस्यां धैर्येण सहनम् । अतीतायां शेषसंभावनेन प्रतीकारज्ञः ।

प्रियो भवति दानेन प्रियो वादेन चापरः ।
मन्त्रमूलबलेनान्यो यः प्रियः प्रिय एव सः ॥ १७ ॥

अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन् ।
लभते बुद्धयवज्ञानमवमानं च भारत ॥ १८ ॥

द्वेष्यो न साधुर्भवति न मेधावी न पण्डितः ।
प्रियो शुभानि कर्माणि द्वेष्योपायानि भारत ॥ १९ ॥

प्रियोऽपि सन्नशुभानि कर्माणि चेत्करोति तदा द्वेष्यो भवति । द्वेष्योऽपि सन्नपापानि चेत् कुरुते प्रियो भवतीति भावः ।

न स क्षयो महाराज यं लब्ध्वा वृद्धिमावहेत् ।
क्षयस्त्विह स मन्तव्यो यं लब्ध्वा बहु नाशयेत् ॥ २० ॥

तस्मात्क्षयं दृष्ट्वा न मित्रमवमानयेत् । अल्पवृद्धिं वा दृष्ट्वा[१०३ब] सहायेन कथंचित् नाशितेऽपि द्रव्यादौ पाकं पर्यालोच्य प्रतीक्षयेदिति ।

समृद्धया गुणतः केचिद्भवन्ति धनतो परे ।
धनवृद्धान्गुणैर्हीनान्दूरतः परिवर्जयेत् ॥ २१ ॥

सदोषं दर्शनं येषां संवासात्सुमहद्भयम् ।
अर्थादाने महान्दोषः प्रदाने सुमहद्भयम् ॥ २२ ॥

ये पापा इति विख्याताः संवासैः परिगर्हिताः ।
युक्ताश्चान्यैर्महादोषैर्ये नरास्तान्विवर्जयेत् ॥ २३ ॥

न तन्मित्रं यस्य कोपाद्बिभेति यद्वा मित्रं शङ्कते नोपचर्यं ।
यस्मिन्मित्रे पितरीवाश्वसेत तद्वै मित्रं सङ्गतानीतराणि ॥ २४ ।

यस्य चेतसि संबन्धो मित्रभावेन वर्तते ।
स एव बन्धुस्तन्मित्रं स गतिस्तत्परायणम् ॥ २५ ॥

अल्पचित्तस्य वै पुंसो वृद्धाननुपसेविनः ।
परिप्लवमतेर्नित्यमध्रुवो मित्रसंग्रहः ॥ २६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चलचित्तमनात्मानमिन्द्रियाणां वशानुगम् ।
अर्थाः समतिवर्तन्ते हंसाः शुष्कं सरो यथा ॥ २७ ॥

अकस्मादथ कुप्यन्ति प्रसीदन्त्यमिमित्ततः ।
शीलमेतदसाधूनां मन्त्रं पारिप्लवं तथा ॥ २८ ॥

सत्कृताश्च कृतार्थाश्च मित्राणां न भवन्ति ये ।
तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥ २९ ॥

अर्थयेदेव मित्राणि सति वासति वा धने ।
योऽनर्थः सन्विजानाति मित्राणां सारफल्गुताम् ॥ ३० ॥

अनर्थो धनप्रयोजनः, मित्राणां सारफल्गुतां विजानाति स सन्साधुरित्यर्थः। राजव्यवहारस्यातिविषमत्वान्न केवलं शुभैव । सुहृत्सहायसद्राज्ञामवश्यविधेया यावत्यपि सम्पदपि विधेयेति सामान्येन सहायसुहृद इत्युद्दिष्टम् ।

तथा च पुष्करः

एवं विधान्सहायांस्तु शुभकर्माणि योजयेत् ।
गुणहीनानपि तथा विज्ञाय नृपतिः स्वयम् ॥
कर्मस्वेव नियुञ्जीत यथा योग्येषु चोदितान् ॥ ३१ ॥

**सहायसम्पत्तिनिरूपणाभिधं कुसुमम् ।**

---

## [ ११४ ]

**अथ यामिकलक्षणम् ।**

पुरुषान्तरतत्त्वज्ञा[१०४अ]जितनिद्रा जितक्लमाः ।
काले च समसर्गा ये काले निर्दयमानसाः ॥ १ ॥

शङ्कमानाश्च परितः प्रांशवश्चातिलोलुपाः ।
राजाध्यक्ष्येष्वपि सदा भयहीनाः शुचिव्रताः ॥
एवंविधास्तथा कार्या राज्ञा प्राहरिका भटाः ॥ २ ॥

**इति यामिककथनाभिधं कुसुमम् ।**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ ११५ ]

अथ द्वाःस्थलक्षणम् ।

प्रांशुः सुरूपो दक्षश्च प्रियवादी न चोद्धतः ।
चित्तग्राहश्च सर्वेषां प्रतीहारो विधीयते ॥ १ ॥

तथा प्रांशवोऽध्यायताः[1] शूरा दृढभक्ता निराकुलाः ।
राज्ञा तु रक्षिणः कार्याः स्वे परे च सदाहिताः ॥ २ ॥

स्वे स्वकीयाः परे तद्विपरीताः ।

इति द्वाःस्थलक्षणाभिधं कुसुमम् ।

[ ११६ ]

अथ दूतलक्षणम् ।

यथोक्तवादी दूतः स्याद्देशभाषाविशारदः ।
शाब्दः क्लेशसहो वाग्मी देशकालविभाषकः ॥ १ ॥

विज्ञाय देशं कालं च हितं यत्स्यान्महीक्षितः ।
वक्ताऽपि तस्य यः काले स दूतो नृपतेर्भवेत् ॥ २ ॥

संजयः ।

अस्तब्धमक्लीबमदीर्घसूत्रं सानुक्रोशं श्लक्ष्णमहार्यमन्यैः ।
अरोगजातीयमुदारवाक्यं दूतं वदन्त्यष्टगुणोपपन्नम् ॥ ३ ॥

अत्रैव सन्धिकारकलक्षणम् ।

षाड्गुण्यविधितत्त्वज्ञो देशभाषाविशारदः ।
सन्धिविग्रहकृत्कार्यो राज्ञा नीतिविचक्षणः ॥ ४ ॥

इति दूतसन्धिकारकलक्षणाभिधं कुसुमम् ।

[ ११७ ]

अथ चरलक्षणम्—

कथिताः सततं धीरै राजानश्चरचक्षुषः ।
कियत्पश्यन्ति चक्षुर्भ्यां राजानो वितताक्षिणः ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विततास्क्षिणः विस्तृतव्यवहाराः ।

स्वदेशे परदेशे च जातशीलान्विचक्षणान् ।
अनाहार्यान् क्लेशसहान्नियुञ्जीत सदाचरान् ॥ २ ॥
जनस्याविदितान्सौम्यानविज्ञातान्परस्परम् ।
वणिजो मन्त्रकुशलान्सांवत्सरपुरोहितान् ॥ ३ ॥
तथा प्रव्राजकाकारांश्चरान् राजा नियोजयेत् ।
नैकस्य राजा सन्दध्याच्चरस्यापि च भाषणे ॥ ४ ॥
द्वयोः संवादमाज्ञाय सन्दध्यान्नृपतिस्ततः ।
परस्पर[१०४ब]स्याविदितौ यदि स्यातां तताबुभौ ॥ ५ ॥
तस्माद्राजा प्रयत्नेन गूढांश्चारांश्च योजयेत् ।
राज्यस्य मूलमेतावद्यन्नृपाश्चारदृष्टयः ॥ ६ ॥
चाराणामपि यत्नेन राज्ञा कार्यं परीक्षणम् ।
रागोपरागौ भृत्यानां जनस्य च गुणागुणान् ॥ ७ ॥
शुभानामशुभानां च विज्ञानं चैव कर्मणाम् ।
राज्ञां सर्वं चरायत्तं तेषु यत्नः सदा भवेत् ॥ ८ ॥
कर्मणा केन मे लोके जनः सर्वोऽनुरज्यते ।
विरज्यते तथा केन ज्ञेयमेतन्महीक्षिता ॥ ९ ॥

इति **चरकथनाभिधं कुसुमम्** ।

---

[ ११८ ]

अथ **पुररक्षकलक्षणम्** ।

आयव्ययज्ञो लोकानां देशोत्पत्तिविशारदः ।
कृताकृतज्ञो भृत्यानां कार्योऽयमक्षरक्षिता ॥

अक्षं व्यवहारः देशव्यवहाररक्षक इत्यर्थः ।

इति **पुररक्षककथनाभिधं** कुसुमम् ॥ ११८ ॥

[ ११९ ]

अथ **हस्तिरक्षकलक्षणम्** ।

हस्तिशिक्षाविधानज्ञो वन्यजातिविशारदः ।
क्लेशक्षमस्तथा राज्ञो गजाध्यक्षः प्रकीर्तितः ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्रैव प्रसङ्गात् **गजारोहिलक्षणम्** ।

एतैरेव गुणैर्युक्तः स्वाधीनश्च विशेषतः ।
काले मन्त्रविधानज्ञः शस्त्रास्त्रक्षपणक्षमः ॥ २ ॥
शूरश्च बलवांश्चैव कोपादीहाविचक्षणः ।
गजारोहो नरेन्द्रस्य सर्वकर्मसु शस्यते ॥ ३ ॥ इति ।

इति **करिपालकथनाभिधं कुसुमम्** ।

[ १२० ]

**अथाश्वपाललक्षणम्**—

हयशिक्षाविधानज्ञोऽश्वचिकित्सितपारगः ।
अश्वाध्यक्षो महीभर्तुः स्वासनश्च प्रशस्यते ॥ १ ॥
स्वासनः स्थिरकटिः ।

इति **अश्वपालकथनाख्यं कुसुमम्** ।

[ १२१ ]

अथ **सारथिलक्षणम्** ।

शूरश्च बहुयुक्तश्च गजाश्वरथकोविदः ।
क्लेशधारी भवेद्राज्ञः सदा क्लेशसहश्च यः ॥ १ ॥
निमित्तशकुनज्ञानहयशिक्षाविशारदः ।
हयायुर्वेदतत्त्वज्ञो भूमिभागविशेषवित् ॥ २ ॥
बलाबलज्ञो रथिनः स्थिरदृष्टिर्विशारदः ।
शूरश्च कृतविद्यश्च सारथिः परिकीर्तितः ॥ ३ ॥

इति **सारथिकुसुमम्** ॥

---

[ १२२ ]

धर्मायव्ययदुर्गवस्वधिकृत इति द्वन्द्वान्तस्थितस्याधि[१०५अ]कृतशब्दस्य धर्मादिचतुर्भिः संबन्ध इति धर्माध्यक्षः, आयव्ययाध्यक्षः, दुर्गाध्यक्षो, वस्वध्यक्ष इति सिद्धम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्रादौ **धर्माध्यक्षलक्षणम्** ।

समः शत्रौ च मित्रे च धर्मशास्त्रविशारदः ।
विप्रमुख्यः कुलीनश्च धर्माधिकरणो भवेत् ॥ १ ॥

इति **धर्माधिकारिकुसुमम्** ॥

[ १२३ ]

**अथायव्ययाधिकारिलक्षणम्** ।

आयद्वारेषु सर्वेषु धनाध्यक्षसमा नराः ।
व्ययद्वारेषु सर्वेषु कर्तव्याः पृथिवीक्षिता ॥ १ ॥

**इत्यायव्ययाधिकारिलक्षणम्** ।

---

[ १२४ ]

अथ **दुर्गाधिकारिलक्षणम्** ।

अनाहार्यश्च शूरश्च तथा प्राज्ञः कुलोद्गतः ।
दुर्गाध्यक्षो बलीयांश्च सततं चोद्यतोऽस्त्रवित् ॥

इति **दुर्गाधिकारिकुसुमम्** ।

[ १२५ ]

अथ **वस्त्वध्यक्षलक्षणम्** ।

लोहवस्त्राद्यन्तरविद्रत्नानां च विभागवित् ।
विज्ञाता फल्गुसाराणमनाहार्यः शुचिव्रतः ।
निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्तितः ॥ १ ॥

इति **वस्त्वधिकारिकुसुमम्** ।

[ १२६ ]

अथ **सूदलक्षणम्** ।

सूदशास्त्रविधानज्ञाः पराभेद्याः कुलोद्गताः ।
सूदा महानसे धार्या नीचश्मश्रुनखा जनाः ॥ १ ॥

अत्रैव प्रसङ्गाद्भोज्यादिकल्पना ।

भोज्यं भक्ष्यं तथा लेह्यं चोष्यं पेयं तथैव च ।
कल्पना पञ्चधा धीरै भोज्यस्यैषा प्रकीर्तिता ॥ २ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कटुतोयोदकक्काथं शोधितानामसंशयम् ।
पुराणं धान्यजातीनां गन्धमाशु व्यपोहति ॥३॥
श्रेष्ठं सार्षपकं तैलं शाकानां परिशोधने ।
मांसं कठिनमायाति कौमल्यं चार्द्रकाम्बुना ॥ ४ ॥
वारणक्षारसंयोगात् मत्स्यस्यास्थि विलीयते ।
गण्डिकाभिः पलाशस्य क्षीरमावर्तते द्रुतम् ॥ ५ ॥
घृतं सुगन्धी भवति दग्धक्षिप्तैस्तथा यवैः ।
पद्मचारिणि योगेन[1] कांचिकस्याम्लिका भवेत् ॥ ६ ॥
गुडाम्यं शुद्धिमायाति क्षीरेण च तथा द्रुतम् ।
क्षारयोगेन चाश्वस्य तथाम्लत्वं विनश्यति ॥ ७ ॥
[१०५ब]लवणाधिकविक्षेपसंजातविरसं ध्रुवम् ।
सिकतापिण्डिकाक्षेपैः सुरसत्वमवाप्नुयात् ॥ ८ ॥
तृणकक्षारयोगेन पुष्पाणि च फलानि च ।
सर्वाणि द्रुतमायान्ति द्रुतानां कल्पनास्त्वियम् ॥ ९ ॥
नातिदीप्तेन नातीवमन्देनोदर्चिषा बुधः ।
अन्नं धमेन्नातिरसं न वाल्परसं तथा ॥ १० ॥

इत्थं तदध्यक्षलक्षणम् ।

अनाहार्यः शुचिर्दक्षश्चिकित्सकवचोरतः ।
सूदशास्त्रविधानज्ञः सूदाध्यक्षः प्रकीर्तितः ॥ ११ ॥

इति सूदक्रियापौरोगवलक्षणाभिधं कुसुमम् ।

## [ १२७ ]

## अथास्त्राचार्यलक्षणम् ।

अस्त्रमुक्ते, पाणिमुक्ते, अमुक्ते, मुक्तधारिते ।
अस्त्राचार्यो नियुद्धे च कुशलश्च तथेष्यते ॥ १ ॥

इति अस्त्राचार्यकुसुमम् ।

---

1 Corrupt.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ १२८ ]

अथ **स्थपतिलक्षणम्** ।

वास्तुविद्याविधानज्ञो लघुहस्तो जितक्रमः ।
दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्तितः ॥ १ ॥

इति **स्थपतिलक्षणम्** ।

[ १२९ ]

अथ **लेखकलक्षणम्** ।

सर्वदेशाक्षराभिज्ञाः सर्वशास्त्रविशारदाः ।
लेखकाः कथिता धीरैः सर्वाधिकरणे बुधैः ॥ १ ॥
शीर्षोपेतान्सुसंपूर्णान् समश्रेणिगतान्समान् ।
अक्षरान्विलिखेद्यस्तु लेखकः स वरः स्मृतः ॥ २ ॥
सोपायवाक्यकुशलः सर्वलेख्यविशारदः ।
